तास्तु प्रायेण दृश्यन्ते सर्वत्र[2] व्यवहारतः ।
प्रथमं प्रोषितपतिका वासकसज्जा ततश्च विरहोत्का
।। १२१ ।।
अथ खण्डिता मता स्यात् कलहान्तरिताभिसारिका चैव।
कथिता च विप्रलब्धा स्वाधीनपतिस्तथा चान्या
।। १२२ ।।
शृङ्गारकृतावस्थाभेदात् ताश्चाष्टधा भिन्नाः ।

[1] See the Introduction for a discussion on Rudraṭa.
[2] See fn. 4 on page 52.

तत्र [1]प्रोषितपतिका—

दूरदेशं गते कान्ते भवेत् प्रोषितभर्तृका ।। १२३ ।।
अस्यास्तु जागरः कार्श्यं निमित्तादिविलोकनम् ।
मालिन्यमनवस्थानं प्रायः शय्यानिषेवणम् ।। १२४ ।।
जाड्यचिन्ताप्रभृतयो विक्रियाः कथिता बुधैः ।
(१२५ क-ख)

यथा ममैव—

दूरे तिष्ठति सोऽधुना प्रियतमः प्राप्तो [2]वसन्तोदयः
कष्टं कोकिलकूजितानि सहसा जातानि दम्भोलयः ।
अङ्गान्यप्यवशानि यान्ति[3] तनुतां यातीव मे चेतना
हा कष्टं मम दुष्कृतस्य महिमा चन्द्रोऽपि चण्डायते।।

अथ वासकसज्जिका—

भरताद्यैरभिदधे स्त्रीणां वारस्तु वासकः[4] ।। १२५ ।।
(ग-घ)

स्ववासकवशात्[5] कान्ते समेष्यति गृहान्तरम्[6] ।
सज्जीकरोति चात्मानं या सा वासकसज्जिका
।। १२६ ।।

[1] *RAS*-2 and MSS. 5 & 6 read *proṣitabhartṛkā*; *RAS*-1 and MS. 4 read *proṣitapatikā*.

[2] *RAS*-2 and MSS. 5 & 6 read *vasantodayaḥ*; *RAS*-1 and MS. 4 read *vasantotsavaḥ*.

[3] *RAS*-2 reads *yānti tanutām*; *RAS*-1 and others read *yācitakatām*.

[4] See in the Introduction, the topic X on the meaning of the word *vāsaka* in Vāsakasajjā, etc.

[5] Only *RAS*-1 reads *svavāsakagate*; *RAS*-2 and MSS. 4, 5, 6, 7, 8, 9 & 10 read *svavāsakavaśāt*.

[6] *RAS*-1 and MSS. 5 & 6 read *gṛhāntikam*; all others read *gṛhāntaram*, which is to be construed with *sajjīkaroti*.

अस्यास्तु चेष्टाः संपर्कमनोरथविचिन्तनम् ।
सखीविनोदो हृल्लेखो मुहुर्दूतीनिरीक्षणम् ।। १२७ ।।
[1]प्रियाभिगमनमार्गाभिवीक्षणप्रमुखा मताः ।
(१२८ क-ख)

यथा ममैव–

केलीगेहं [2]गमितशयनं भूषितं चात्मदेहं[3]
दर्शं दर्शं दयितपदवीं सादरं वीक्षमाणा ।
[4]कामक्रीडां मनसि विविधां भाविनीं कल्पयन्ती
सारङ्गाक्षी रणरणिकया निःश्वसन्ती समास्ते ।।

अथ विरहोत्कण्ठिता–

अनागसि प्रियतमे चिरयत्युत्सुका तु या ।। १२८ ।।
(ग-घ)
विरहोत्कण्ठिता भाववेदिभिः सा समीरिता ।
अस्यास्तु चेष्टा [5]हृत्तापो वेपथुश्चाङ्गसादनम्
।। १२९ ।।
अरतिर्बाष्पमोक्षश्च स्वावस्थाकथनादयः ।
(१३० क-ख)

[1] MSS. 4 & 10 read what is given in the text; others read: *priyābhigamamārgābhivīkṣāprabhṛtayo matāḥ.*

[2] *RAS*-1 and MS. 4 read *lalitaśayanam*; *RAS*-2 and MSS. 5 & 6 read *gamitaśayanam.*

[3] *RAS*-1 reads *ātmageham*; *RAS*-2 and MSS. 4, 5 & 6 read *ātmadeham.*

[4] *RAS*-1 and MS. 4 read *bhāvakrīḍām*; *RAS*-2 and MSS. 5 & 6 read *kāmakrīḍām.*

[5] MSS. 7, 8 and 9 read *saṃtāpo*; others read *hṛttāpo.*

यथा ममैव—

चिरयति [1]मनःकान्ते कान्ता निरागसि सोत्सुका
मधु मलयजं माकन्दं वा निरीक्षितुमक्षमा ।
गलितपतितं नो जानीते करादपि कङ्कणं
परभृतरुतं श्रुत्वा बाष्पं विमुञ्चति वेपते ॥

अथ खण्डिता—

उल्लङ्घ्य समयं यस्याः प्रेयानन्योपभोगवान् ॥ १३० ॥
(ग-घ)

[2]भोगलक्ष्माञ्चितः प्रातरागच्छेत् सा हि खण्डिता ।
अस्यास्तु चिन्ता निःश्वासस्तूष्णींभावोऽश्रुमोचनम्
॥ १३१ ॥
खेदभ्रान्त्यस्फुटालापा इत्याद्या विक्रिया मताः ।
(१३२ क-ख)

यथा ममैव—

प्रभाते प्राणेशं नवमदनमुद्राङ्किततनुं
वधूर्दृष्ट्वा रोषात् किमपि कुटिलं जल्पति मुहुः ।
मुहुर्धत्ते चिन्तां मुहुरपि परिभ्राम्यति मुहु-
र्विधत्ते निःश्वासं मुहुरपि च बाष्पं विसृजति ॥

अथ कलहान्तरिता—

या सखीनां पुरः पादपतितं वल्लभं रुषा ॥ १३२ ॥
(ग-घ)

[1] Only *RAS*-1 reads *manāk kānte*.
[2] Only *RAS*-1 reads-*lakṣmāṅkitaḥ*.

निरस्य पश्चात् तपति कलहान्तरिता तु सा ।
अस्यास्तु भ्रान्तिसंतापौ मोहो निःश्वसितं ज्वरः ॥ १३३ ॥

मुहुः प्रलाप इत्याद्या इष्टाश्चेष्टा मनीषिभिः । (१३४ क-ख)

यथा ममैव–

[1]निःशङ्का नितरां निरस्य दयितं पादानतं प्रेयसी
कोपेनाद्य कृतं मया किमिदमित्यार्ता सखीं जल्पति ।
सोद्वेगं भ्रमति क्षिपत्यनुदिशं दृष्टिं विलोलाकुलां
रम्यं द्वेष्टि मुहुर्मुहुः प्रलपति श्वासाधिकं मूर्च्छति ॥

अथाभिसारिका–(स्वीया)

मदनानलसंतप्ता याभिसारयति प्रियम् ॥ १३४ ॥ (ग-घ)

ज्योत्स्नातमस्विनीयानयोग्याम्बरविभूषणा ।
स्वयं वाभिसरेद् या तु सा भवेदभिसारिका ॥ १३५ ॥
अस्याः संतापचिन्ताद्या विक्रियास्तु यथोचितम् ।
कान्ताभिसरणे [2]स्वीया लज्जानाशादिशङ्कया ॥ १३६ ॥

[1] Only MS. 4 reads *niḥśaṅkam.*

[2] The *Śṛṅgāratilaka* notes: *kulajānyāṅganā veśyā tridhā syād abhisārikā* (I. 151). The *Nāṭyaśāstra* has the following: *veśyāyāḥ kulajāyāś ca preṣyāyāś ca prayoktṛbhiḥ, ebhir bhāvaviśeṣais tu kartavyam abhisāraṇam.* (GOS, vol. III, p. 211). *preṣyābhisārikā* is missing in the former, and *anyāṅganā* is missing in the latter. Siṃhabhūpāla seems to take both the texts into account, as he mentions 4 types of Abhisārikā, namely, *svīyā* (=*kulajā*); *kanyakā* (=*anyāṅganā*); *veśyā*, and *preṣyā*. *Bhāvaprakāśa* seems to leave out *svīyā* (=*kulajā*). See *B.Pr.*, page 101.

व्याघ्रहुंकारसंत्रस्तमृगशाबविलोचना ।
नील्यादिरक्तवसनरचिताङ्गावगुण्ठना ।। १३७ ।।
स्वाङ्गे विलीनावयवा [1]निःशब्दं पादचारिणी ।
सुस्निग्धैकसखीमात्रयुक्ता याति समुत्सुका ।। १३८ ।।
मृषा[2] प्रिये तु निद्राणे पार्श्वे तिष्ठति निश्चला ।
गर्वातिरेकनिभृता शीतैः स्रग्दामचन्दनैः ।। १३९ ।।
भावज्ञा[3] बोधयत्येनं तद्भावावेक्षणोत्सुका ।

(१४० क-ख)

यथा–

तमःसवर्णं विदधे विभूषणं निनाददोषेण नुनोद नूपुरम् ।
प्रतीक्षितुं न स्फुटचन्द्रिकाभयादियेष दूतीमभि-
सारिकाजनः ।।

यथा वा–

मल्लिकामालभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः ।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ।।

(काव्यादर्शे २. २१३)

[1] MS. 4 reads *niḥśabdaṃ pādacāriṇī*; others read *niḥśabdapada-cāriṇī*.

[2] MSS. 8 & 9 read clearly *mṛṣā*; others read *eṣā*.

[3] *RAS*-1 reads *bhāvam ābodhayati*; all others read *bhāvajñā*. This agrees with *mṛṣā* in the *kārikā* 139. The idea intended seems to be this. The *nāyaka* would simply be pretending to be asleep with the intention of finding out *her* reaction. She, on the other hand, would know the fact of his intention (*bhāvajñā*) and consequently having stood for a while by the side, would wake him up, just curious to know *his* reaction. Śāradātanaya says in this context thus: *prabodhayati bhāvajñā bhāvāṃs tasya pratīkṣate* (*B. Pr.*, p. 101, line 18).

(अन्याङ्गनाभिसारिका-कन्यका)

स्वीयावत् कन्यका ज्ञेया कान्ताभिसरणक्रमे ।। १४० ।।

(ग-घ)

(वेश्याभिसारिका)

वेश्याभिसारिका त्वेति हृष्टा वैशिकनायकम् ।
आविर्भूतस्मितमुखी मदघूर्णितलोचना ।। १४१ ।।
अनुलिप्ताखिलाङ्गी च विचित्राभरणान्विता ।
स्नेहाङ्कुरितरोमाञ्चस्फुटीभूतमनोभवा ।।१४२ ।।
संवेष्टिता परिजनैर्भोगोपकरणान्वितैः ।
[1]रशनारावमाधुर्यदीपितानङ्गवैभवा ।। १४३ ।।
चरणाम्बुजसंलग्नमणिमञ्जीरमञ्जुला ।
एषा च मृदुसंस्पर्शैः केशकण्डूयनादिभिः ।। १४४ ।।
प्रबोधयति तद्बोधे प्रणयात् कुपितेक्षणा ।

(१४५ क-ख)

यथा मम[2]–

मासि मधौ चन्द्रातपधवलायां निशि [3]सखीजनालापैः ।
मदनातुराभिसरति प्रणयवती यं स एव खलु धन्यः ।।

अथ प्रेष्याभिसारिका–

बाहुविक्षेपलुलितस्रस्तधम्मिल्लमल्लिका ।। १४५ ।।

(ग-घ)

[1] *RAS*-2 and MS. 5 read *raśanādāma*- Others read *raśanārāva*-

[2] *mama* is found in MS. 4. Like several other illustrative verses, this one also is perhaps Siṃhabhūpāla's own composition.

[3] *RAS*-2 and MSS. 4 & 5 read: *niśi sakhīsahālāpaiḥ*; MS. 6 reads *sakhi sahālāpaiḥ*; *RAS*-1 reads *sakhījanālāpaiḥ*.

[1]**चलितभ्रूविकारादिविलासललितेक्षणा ।**
मैरेयाविरतास्वादमदस्खलितजल्पिता ।। १४६ ।।
प्रेष्याभियाति[2] दयितं चेटीभिः सह गर्विता ।
प्रियं कङ्कणनिक्वाणमञ्जुव्यजनवीजनैः ।। १४७ ।।
विबोध्य निर्भर्त्सयति नासाभङ्गपुरःसरम् ।
(१४८ क-ख)

यथा—

स्रस्तस्रक्कबरीभरं [3]सललितभ्रूवल्लिहालामदा-
[4]व्यक्तालापमितस्ततः प्रतिपदं विक्षिप्तबाहालता ।
[5]सोत्कण्ठं दयिताभिसृत्य शयितं कान्तं क्वणत्कङ्कण-
क्वाणेन प्रतिबोध्य भर्त्सयति यं धन्यः स एकः पुमान् ।।

अथ विप्रलब्धा—

[6]**कृत्वा संकेतमप्राप्ते दयिते व्यथिता तु या ।। १४८ ।।**
(ग-घ)

[1] Only *RAS*-1 reads *cakita*, for *calita* of others.

[2] *RAS*-2 and MSS. 5 & 6 read *abhiyānti* (for *abhiyāti*) and *vījitaiḥ* (for *vījanaiḥ* of others).

[3] This is the reading in *RAS*-2 and MSS. 5 & 6; in MS. 4, the portion after-*bharam* is missing; *RAS*-1 reads *sulalitavyāvṛtti-hālāmadaiḥ*.

[4] Only *RAS*-1 reads: .... *madair avyaktākṣarajalpitam*, etc. . . . and *bāhālatam*.

[5] This is the reading in *RAS*-2 and MSS. 5 & 6; *RAS*-1 reads the second half of the verse thus: *saṃketālayam etya kaṅkaṇa-ravair udbodhya suptaṃ priyaṃ preṣyā premavaśāt tanoti niṭilabhrūvalli-saṃtarjanam.* In MS. 4 the portion is missing. See fn. 3 above.

[6] Only *RAS*-2 reads *śrutvā*.

विप्रलब्धेति सा प्रोक्ता बुधैरस्यास्तु विक्रियाः ।
निर्वेदचिन्ताखेदाश्रुमूर्च्छानिःश्वसितादयः ।। १४९ ।।

यथा ममैव—

चन्द्रबिम्बमुदयाद्रिमागतं
पश्य[1] तेन सखि वञ्चिता वयम् ।
अत्र किं निजगृहं नयस्व मां
तत्र वा किमिति विव्यथे वधूः ।।

अथ स्वाधीनपतिका—

[2]स्वायत्तासन्नपतिका हृष्टा स्वाधीनवल्लभा ।
अस्यास्तु चेष्टाः कथिताः स्मरपूजामहोत्सवः
।। १५० ।।

[3]वनकेलिजलक्रीडाकुसुमापचयादयः ।
(१५१ क-ख)

यथा ममैव—

सलीलं धम्मिल्ले [4]दरहसितकह्लाररचनां
कपोले सोत्कम्पं [5]मृगमदमयं पत्रतिलकम् ।

[1] *RAS*-1 gives the fn. reading of *vañcakena* (instead of *payśa tena*), which is also found in *RAS*-2 and MSS. 4, 5 & 6.

[2] *RAS*-1 reads *svāyattāsannadayitā*; *RAS*-2 reads: *svapatyā saṃnidadhatā*; others read what is given in the text.

[3] *RAS*-1, *RAS*-2 and MSS. 5 & 6 read *pānakeli-*; MSS. 4, 7, 8, 9 & 10 read *vanakeli-*.

[4] *RAS*-2 reads: *daradalita-*(for *darahasita* of others).

[5] *RAS*-1 gives the fn. reading of *mṛgamadamayīṃ patralatikām* which is also found in *RAS*-2 and in MSS. 5 & 6.

कुचाभोगे कुर्वन् ललितमकरीं कुङ्कुममयीं
युवा धन्यः सोऽयं मदयति च नित्यं प्रियतमाम् ।।

उत्तमा मध्यमा नीचेत्येवं सर्वाः स्त्रियस्त्रिधा ।।१५१।।
(ग-घ)

तत्रोत्तमा–

[1]अभिजातैर्भोगतृप्तैर्गुणिभिर्या च काम्यते ।
गृह्णाति कारणे कोपमनुनीता प्रसीदति ।। १५२ ।।
विदधत्यप्रियं पत्यौ स्वयमाचरति प्रियम् ।
वल्लभे सापराधेऽपि तूष्णीं तिष्ठति सोत्तमा ।।१५३।।

अथ मध्यमा–

पुंसः स्वयं कामयते काम्यते या च तैर्वधूः ।
सक्रोधे क्रुध्यति मुहुः सानृतेऽनृतवादिनी ।। १५४ ।।
सापकारेऽपकर्त्री स्यात् स्निग्धे स्निह्यति वल्लभे ।
एवमादिगुणोपेता मध्यमा सा प्रकीर्तिता ।। १५५ ।।

अथ नीचा–

अकस्मात् कुप्यति रुषं प्रार्थितापि न मुञ्चति ।
सुरूपं वा कुरूपं वा गुणवन्तमथागुणम् ।। १५६ ।।
स्थविरं तरुणं वापि या वा कामयते मुहुः ।
ईर्ष्याकोपविवादेषु[2] नियता साधमा स्मृता ।। १५७ ।।

आसामुदाहरणानि लोकत [3]एवावगन्तव्यानि ।

[1] *RAS*-2 and MSS. 5 & 6 read *bhogadṛptaiḥ* (for *bhogatṛptaiḥ* of others).

[2] Only *RAS*-1 reads-*viṣādeṣu*; all others read *vivādeṣu*.

[3] *RAS*-2 and MSS. 5 & 6 read: *loke mantavyāni*; *RAS*-1 and MS. 4 read *lokata evāvagantavyāni*.

स्वीया त्रयोदशविधा द्विविधा च [1]पराङ्गना ।
[2]वेश्यैकैवं षोडशधा ताश्चावस्थाभिरष्टभिः ॥ १५८ ॥
प्रत्येकमष्टधा तासामुत्तमादिप्रभेदतः ।
त्रैविध्यमेवं [3]सचतुरशीतिस्त्रिशती भवेत् ॥ १५९ ॥

(शृङ्गारतिलके १५३-५)

[4]अवस्थात्रयमेवेति केचिदाहुः परस्त्रियाः ।

(१६० क-ख)

यथा—

त्र्यवस्थैव[5] परस्त्री स्यात् प्रथमं विरहोन्मनाः ।
ततोऽभिसारिका भूत्वाभिसरन्ती व्रजेत् स्वयम् ॥
संकेताच्च परिभ्रष्टा विप्रलब्धा भवेत् पुनः ।
पराधीनपतित्वेन नान्यावस्थात्र संगता[4] ॥ इति ।

(भावप्रकाशेऽपि पुटे १५)

[1] *RAS*-1 and MS. 6 read *varāṅganā*; all others read *parāṅganā* clearly, which is correct in the context.

[2] *RAS*-1 reads *vaiśikaivam*!

[3] The *Śṛṅgāratilaka* has the following verses: *trayodaśavidhā svīyā dvividhā ca parāṅganā, ekā veśyā punaś cāṣṭāv avasthābhedato matāḥ. punaś ca tās tridhā sarvā uttamādhamamadhyamāḥ, ittham śatatrayam tāsām aśītiś caturuttarā.* (I. 154-5) These verses of the *ŚT* seem to be in the mind of Siṃhabhūpāla in giving the enumeration of the *nāyikā-s* as *evaṃ sacaturaśītis triśatī bhavet* (*RAS*-I, 159). Bahurūpamiśra also quotes the verses from the *ŚT* (p. 83).

[4] The portion from *avasthātrayam* (160ab) to *saṃgatā iti* is not found in MSS. 7, 8, 9 & 10. Others have it.

[5] After II. 28 of the *Daśarūpaka*, Dhanika has the following comments: *parastriyau tu kanyakoḍhe saṃketāt pūrvaṃ virahotkaṇṭhite; paścād vidūṣakādinā saha abhisarantyau abhisārike; kuto'pi saṃketasthānam aprāpte nāyake vipralabdhe iti tryavasthataivānayor iti. asvādhīnapriyayor avasthāntarāyogāt.* (page 109, my edn.) The *kārikā-s*

अथ नायिकासहायाः–

आसां दूत्यः सखी चेटी लिङ्गिनी प्रतिवेशिनी ॥ १६० ॥ (ग-घ)

धात्रेयिका शिल्पकारी कुमारी कथिनी तथा ॥
कारुर्विप्रश्निका चेति नेतृमित्रगुणान्विताः ॥ १६१ ॥

लिङ्गिनी पण्डितकौशिक्यादिः । प्रतिवेशिनी समीपगृहवर्तिनी । शिल्पकारी वीणावादनादिनिपुणा । कारुः रजक्यादिः । विप्रश्निका दैवज्ञा । शेषाः प्रसिद्धाः । इतररसालम्बनानामनतिनिरूपणीयतया पृथक् प्रकरणारम्भस्यानुपयोगात् तत्तद्रसप्रसङ्ग एव निरूपणं करिष्यामः ।

इति नायिकाप्रकरणम् ।

अथ शृङ्गारस्योद्दीपनविभावाः–

उद्दीपनं चतुर्धा स्यादालम्बनसमाश्रयम् ।
[1]गुणचेष्टालंकृतयस्तटस्थाश्चेति भेदतः ॥ १६२ ॥

तत्र गुणाः–

यौवनं रूपलावण्ये सौन्दर्यमभिरूपता ।
मार्दवं सौकुमार्यं चेत्यालम्बनगता गुणाः ॥ १६३ ॥

quoted with *yathā* in the *RAS* convey the same view, which Dhanika too was perhaps quoting from some earlier source. See also the *Bhāvaprakāśa* (p. 95, lines 10-14) which also quotes this view. This view was also noted (without rejection similarly) by Hemacandra in his *Kāvyānuśāsana* (p. 421, VII. 31). Bahurūpamiśra after quoting this view has this concluding comment: *eteṣāṃ mate na rudraṭoktasaṃkhyāsampattir iti.* (p. 84 in the Triv. Transc.)

[1] The *Rasakalikā* has the following: *ālambanaguṇaś caiva taccesṭās tadalṃkṛtiḥ, taṭasthaś ceti vijñeyaś caturdhoddīpanakramaḥ* (p. 10 in Madras Transc. R. 2241), which is also quoted by Vidyānātha (p. 159) but wrongly attributed to *Śṛṅgāratilaka,* instead of the *RK*. See also fn. for Kārikā I. 190.

तत्र यौवनम्—

सर्वासामपि नारीणां यौवनं[1] तु चतुर्विधम् ।
प्रतियौवनमेतासां चेष्टितानि पृथक् पृथक् ।। १६४ ।।

तत्र प्रथमयौवनम्—

ईषच्चपलनेत्रान्तं स्मरस्मेरमुखाम्बुजम् ।
सगर्वजरजोगण्डमसमग्रारुणाधरम् ।। १६५ ।।
लावण्योद्भेदरम्याङ्गं विलसद्भावसौरभम् ।
उन्मीलिताङ्कुरकुचमस्फुटाङ्कसंधिकम् ।। १६६ ।।
प्रथमं यौवनं तत्र वर्तमाना मृगेक्षणा ।
अपेक्षते मृदुस्पर्शं सहते नोद्धतां रतिम् ।। १६७ ।।
सखीकेलिरता स्वाङ्गसंस्कारकलितादरा ।
न कोपहर्षौ भजते सपत्नीदर्शनादिषु ।। १६८ ।।
नातिरज्यति कान्तस्य संगमे किं तु [2]लज्जते ।

यथा— (१६९ क-ख)

विस्तारी स्तनभार एष गमितो न स्वोचितामुन्नतिं
रेखोद्भासि तथा वलित्रयमिदं न स्पष्टनिम्नोन्नतम् ।
मध्येऽस्या ऋजुरायतार्धकपिशा रोमावली दृश्यते
रम्यं [3]यौवनशैशवव्यतिकरोन्मिश्रं [4]वयो वर्तते ।।

(दशरूपकावलोकेऽपि उद्धृतमिदम्)

[1] Also see the *Saṃgītaratnākara* (Adyar pub.), VII. 1225 to 1230.

[2] *RAS*-1 reads *rajyati*; so also do MSS. 7, 8, 9 & 10; MS. 4 is defective here and reads . . . *jjati*; *RAS*-2 reads *lajjate*.

[3] This verse is also quoted by Dhanika; see page 93; *RAS*-1 and MS. 4 read *śaiśavayauvana-*; *RAS*-2, MSS. 5 & 6 and Dhanika's *Avaloka* read *yauvanaśaiśava-*.

[4] Dhanika's *Avaloka* reads *vayo*; *RAS*-1, *RAS*-2 and other MSS. read *vapuḥ*.

अस्याश्चेष्टा यथा ममैव–

आविर्भवत्प्रथमदर्शनसाध्वसानि
सावज्ञमादृतसखीजनजल्पितानि ।
सव्याजकोपमधुराणि गिरेः सुताया
वः[1] पान्तु नूतनसमागमचेष्टितानि ॥

अथ द्वितीययौवनम्–

स्तनौ पीनौ तनुर्मध्यः पाणिपादस्य रक्तिमा ॥ १६९ ॥
(ग-घ)
ऊरू करिकराकारावङ्गं व्यक्ताङ्गसंधिकम् ।
नितम्बो विपुलो नाभिर्गभीरा जघनं घनम् ॥ १७० ॥
व्यक्ता रोमावली स्नैग्ध्यमङ्गकेशरदाक्षिषु[2] ।
द्वितीययौवने तेन कलिता वामलोचना ॥ १७१ ॥
सखीषु स्वाशयज्ञासु स्निग्धा प्रायेण [3]मानिनी ।
न प्रसीदत्यनुनये सपत्नीष्वभ्यसूयिनी ॥ १७२ ॥
नापराधान् विषहते प्रणयेर्ष्याकषायिता ।
रतिकेलिष्वनिभृता चेष्टते गर्विता रहः ॥ १७३ ॥

यथा–

तन्वी श्यामा शिखरदशना पक्वबिम्बाधरोष्ठा
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।

[1] *RAS*-1 and MS. 4 read *vaḥ*; *RAS*-2 and MSS. 5 & 6 read *tvām*.

[2] MS. 4 reads *-radākṣiṣu*; *RAS*-1 reads *-radākṣiṇi*; *RAS*-2 reads *aṅgake saralekṣaṇam*; MS. 5 reads *aṅgake saralekṣaṇā*; MS. 6 reads *aṅgake sarale'kṣiṇī*; MS. 10 reads . . . *lalitākṣiṇī*.

[3] *RAS*-2 reads *bhāminī* (for *māninī* of others).

श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ॥
(मेघसंदेशे २. १५)

अथ तृतीययौवनम्–

अस्निग्धता नयनयोर्गण्डयोर्म्लानकान्तिता ।
विच्छायता खरस्पर्शोऽप्यङ्गानां श्लथता [1]मनाक्
॥ १७४ ॥
अधरे मसृणो रागस्तृतीये यौवने भवेत् ।
तत्र स्त्रीणामियं चेष्टा रतितन्त्रविदग्धता ॥ १७५ ॥
वल्लभस्यापरित्यागस्तदाकर्षणकौशलम् ।
अनादरोऽपराधेषु सपत्नीष्वप्यमत्सरः ॥ १७६ ॥

यथा आनन्दकोशप्रहसने–

वक्त्रैः प्रयत्नविकचै[2]र्वलिभैश्च गण्डै-
र्मध्यैश्च मांसलतरैः शिथिलैरुरोजैः ।
घण्टापथे रतिपतेरपि नूनमेता
वृन्तश्लथानि कुसुमानि विडम्बयन्ति ॥

अथ चतुर्थयौवनम्–

जर्जरत्वं स्तनश्रोणिगण्डोरुजघनादिषु ।
निर्मांसता च भवति चतुर्थे यौवने स्त्रियाः ॥ १७७ ॥
तत्र चेष्टा रतिविधावनुत्साहोऽसमर्थता ।
सपत्नीष्वानुकूल्यं च [3]कान्तेनाविरहस्थितिः ॥१७८॥

[1] *RAS*-1 and MSS. 4 & 10 read *manāk*; *RAS*-2 and MSS. 5, 6, 7, 8 & 9 read *tanoḥ*.

[2] *RAS*-2 and MS. 5 read *palitaiś ca*; MS. 6 reads *valitaiś ca*; *RAS*-1 and MS. 4 read *valibhaiś ca*.

[3] Only MS. 10 reads *kāntenāpi rahaḥ sthitiḥ*.

यथा आनन्दकोशप्रहसने–

क्षामैश्च गण्डफलकैर्विरलैश्च दन्तै-
  र्लम्बैः कुचैर्गतकथाप्रचुरैः प्रसङ्गैः ।
अङ्गैरयत्नशिथिलैश्च कदाप्यसेव्या
  भर्तुः[1] पणानभिलषन्त्यहहालसाङ्ग्यः ।।

तत्र शृङ्गारयोग्यत्वं [2]सरसाह्लादकारणम् ।
आद्यद्वितीययोरेव न [3]तृतीयचतुर्थयोः ।। १७६ ।।

अथ रूपम्–

अङ्गान्यभूषितान्येव [4]प्रक्षेप्याद्यैर्विभूषणैः ।।
येन भूषितवद् भान्ति तद् रूपमिति [5]कथ्यते ।।१८०।।

यथा–

स्नातुं विमुक्ताभरणा विमाल्या
  भूयोऽसहा भूषयितुं शरीरम् ।

[1] *RAS*-1 gives the fn. reading as *hartum* (for *bhartuḥ*) and *ānatāṅgyaḥ* (for *alasāṅgyaḥ*), which are also found in MSS. 5 & 6. *RAS*-2 reads *smartum* and *ānatāṅgyaḥ.*

[2] *RAS*-1 reads *ratāhlādanakāraṇam*; *RAS*-2 and MSS. 5, 6, 7, 8, 9 & 10 read *sarasāhlādakāraṇam*; MS. 4 reads *rasāhlādanakāraṇam.*

[3] The *Nāṭyaśāstra* has the following: *sarvāsāṃ nārīṇāṃ yauvana-bhedās tu catvāraḥ*, etc. (GOS, vol. III, pp. 240-1)

[4] Rāghavabhaṭṭa (*Śākuntala*, I. 22) gives the reading as *prakṣe-pyādyair vibhūṣaṇaiḥ*; Śāradātanaya has *nikṣepya* in this context.

[5] Śāradātanaya who was earlier than Siṃhabhūpāla says thus: *āvedhyāropyanikṣepyabandhanīyair abhūṣitam, yad bhūṣitam ivābhāti tad rūpam iti kathyate* (page 73; ll. 6 & 7). The *kārikā* I. 163 (*yauvanaṃ rūpalāvaṇye*, etc.) and the definitions of *rūpa*, *lāvaṇya*, etc. are quoted from our work by Rāghavabhaṭṭa in his commentary on the *Abhi-jñānaśākuntala.*

अगाद् बहिः काचिदुदाररूपा
यां वीक्ष्य लज्जां दधिरे सभूषाः ।।

अथ लावण्यम्–

[1]मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु [2]लावण्यं तदिहोच्यते ।। १८१ ।।

यथा–

अङ्गेषु स्फटिकादर्शदर्शनीयेषु जृम्भते ।
अमला कोमला कान्तिर्ज्योत्स्नेव प्रतिबिम्बिता ।।

अथ सौन्दर्यम्–

अङ्गप्रत्यङ्गकानां यः संनिवेशो यथोचितम् ।
सुश्लिष्टः [3]संधिबन्धः स्यात् तत् सौन्दर्यमुदीर्यते ।। १८२ ।।

यथा–.

[1] This is quoted by Mallinātha on *Kumārasaṃbhava* I. 25, with the name of the author as Bhūpālaḥ. Also Rāghavabhaṭṭa quotes this in his commentary on the *Abhijñānaśākuntala.* See also fn. above. Śāradātanaya says thus: *plavamānam ivābhāti yad aṅgaṃ kāntivāriṇi, lāvaṇyam iti tat prāhūḥ* . . . . (*B. Pr.*, page 73; 15-16). Ānandavardhana makes use of the *lāvaṇya* thus: *pratīyamānaṃ punar anyad eva vastv asti vāṇīṣu mahākavīnām, yat tat prasiddhāvayavātiriktaṃ vibhāti lāvaṇyam ivāṅganāsu.* (*Dhvanyāloka*, I. 4) This was perhaps the basis for Siṃhabhūpāla's definition of *lāvaṇya.*

[2] MS. 10 reads *tallāvaṇyam ihocyate*; this is also the reading in Mallinātha's quotation (See fn. 1 above).

[3] Only *RAS*-1 reads *saṃdhibhedaḥ* (for *saṃdhibandhaḥ* of others); MSS. 7, 8, 9 & 10 read *susnigdhaḥ saṃdhibandhaḥ syāt tat saundaryam itīryate.*

दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।
मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः ॥
(मालविकाग्नि. २. ३)

अथाभिरूपता—

यदात्मीयगुणोत्कर्षैर्वस्त्वन्यन्निकटस्थितम् ।
सारूप्यं नयति प्राज्ञैराभिरूप्यं तदुच्यते ॥ १८३ ॥

यथा—

एकोऽपि त्रय इव भाति कन्दुकोऽयं
कान्तायाः करतलरागरक्तरक्तः ।
भूमौ तच्चरणनखांशुगौरगौरः
खस्थः सन् नयनमरीचिनीलनीलः ॥
(भोजचरित्रे २९८)

अथ मार्दवम्—

स्पृष्टं [1]यत्राङ्गमस्पृष्टमिव स्यान् मार्दवं हि तत् ।
(१८४ क-ख)

यथा—

[2]याभ्यां दुकूलान्तरलक्षिताभ्यां
विस्रंसते स्नैग्ध्यगुणेन दृष्टिः ।

[1] *RAS*-1 and MS. 4: *yaccāṅgam*, etc.; others read *yatrāṅgam*.

[2] *RAS*-1 and MS. 4 give the illustrative verse *yābhyām*, etc. and the following comments. Instead of this verse, *RAS*-2 and MSS. 5 & 6 read without any comments the following verse: *lākṣāṃ vidhātum avalambitamātram eva sakhyāḥ kareṇa taruṇāmbujakomalena, kasyāścid agrapadam āśu babhūva raktaṃ lākṣārasaḥ punar abhūt punaruktadūṣyaḥ* (attributed to Utprekṣāvallabha in *Sūktimuktāvali*).

निर्माणकालेऽपि ततस्तदूर्वोः
संस्पर्शशङ्का न विधेः कराभ्याम् ।।

अत्र अमूर्तापि दृष्टिर्विस्रंसते । मूर्तौ करौ किमुतेति श्लक्ष्णत्वातिशयकथनान्मार्दवम् ।

अथ सौकुमार्यम्–

या स्पर्शासहताङ्गेषु कोमलस्यापि वस्तुनः ।। १८४ ।।
(ग-घ)

तत् सौकुमार्यं त्रेधा स्यान्मुख्यमध्याधमक्रमात्[1]
(१८५ क-ख)

अथोत्तमसौकुमार्यम्–

अङ्गं पुष्पादिसंस्पर्शासहं येन [2]तदुत्तमम् ।। १८५ ।।
(ग-घ)

यथा–

[3]महार्हशय्यापरिवर्तनच्युतैः
स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा बाहुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवले ।।

(कुमार. ५. १२)

[1] Only *RAS*-2 reads *uttamādiprabhedataḥ*; all others read *mukhyamadhyādhamakramāt.*

[2] In MSS. 5 & 6 the definitions and illustrations of *uttama-* and *madhyama-saukumārya* are missing.

[3] *RAS*-2 reads the definitions of *uttama-*and *madhyama-saukumārya* together, and gives respectively the following illustrative verse (instead of *mahārhaśayyā-* and *lākṣāṃ vidhātum*, etc.—of these the

अत्र यद्यप्युत्तरार्धे स्थण्डिलस्पर्शसहत्वमुक्तम्, तथापि स्थिराग्रहस्यैव मनसः क्लेशसहिष्णुत्वं प्रतीयते न पुनः शरीरस्येत्यत्रोत्तमसौकुमार्यमुपपद्यते ।

अथ मध्यमसौकुमार्यम्—

न सहेत करस्पर्शं येनाङ्गं मध्यमं हि तत् ।

(१८६ क-ख)

यथा—

लाक्षां विधातुमवलम्बितमात्रमेव
सख्याः करेण तरुणाम्बुजकोमलेन ।
कस्याश्चिदग्रपदमाशु बभूव रक्तं
लाक्षारसः पुनरभून्न तु भूषणाय ।।

(उत्प्रेक्षावल्लभस्येति सूक्तिमुक्तावलिः)

अथाधमसौकुमार्यम्—

येनाङ्गमातपादीनामसहं तदिहाधमम् ।। १८६ ।।

(ग-घ)

यथा—

[1]आमोदमामोदनमादधानं
निलीननीलालकचञ्चरीकम् ।

latter was given in *RAS*-2 as an example of *mārdava* in the place of *yābhyām*, etc.):

(1) *ādātuṃ sakṛd īkṣite'pi kusume hastāgram ālohitaṃ lākṣārañjanavārtayāpi tad idaṃ raktaṃ talaṃ pādayoḥ, aṅgānām anulepanasmaraṇam apy atyantakhedāvahaṃ hantādhīradṛśaḥ kim anyad alakāmodo'pi bhārāyate.*

(2) *māninyā mānanodārthaṃ praṇate dayite sati, tatpāṇisparśamātreṇa lākṣayevāṅkitaṃ padam.*

[1] This verse (*āmodam*, etc.) is quoted in the *Ujjvalanīlamaṇi* of Rūpagosvāmin with the words: *yathā rasasudhākare* (p. 277, NSP). There is some difference in the second half. Perhaps this verse was cited from the *Kandarpasaṃbhava*.

पद्मालयाया मुखपद्ममस्या
निरूढरागं कृतमातपेन ।।

तच्चेष्टा लीलाविलासादयः । तेऽप्यनुभावप्रकरणे वक्ष्यन्ते ।

अथालंकृतिः–

चतुर्धालंकृतिर्वासोभूषामाल्यानुलेपनैः ।

(१८७ क-ख)

तत्र वस्त्रालंकारो यथा–

क्षीरोदवेलेव सफेनपुञ्जा
पर्याप्तचन्द्रेव शरत्त्रियामा ।
नवं नवक्षौमनिवासिनी सा
भूयो बभौ दर्पणमादधाना ।।

(कुमार. ७. २६)

भूषालंकारो यथा–

सा संभवद्भिः कुसुमैर्लतेव
ज्योतिर्भिरुद्यद्भिरिव त्रियामा ।
सरिद् विहङ्गैरिव लीयमानै-
रामुच्यमानाभरणा चकाशे ।।

(कुमार. ७. २१)

माल्यानुलेपनालंकारो यथा–

आलोलैरनुमीयते मधुकरैः केशेषु माल्यग्रहः
कान्तिः कापि कपोलयोः प्रथयते ताम्बूलमन्तर्गतम् ।
अङ्गानामवगम्यते परिमलैरालेपनप्रक्रिया
वेषः कोऽपि विदग्ध एष सुदृशः सूते सुखं चक्षुषोः ।।

अथ तटस्थाः—

तटस्थाश्चन्द्रिका धारागृहचन्द्रोदयावपि ।। १८७ ।।
(ग-घ)

कोकिलालापमाकन्दमन्दमारुतषट्पदाः ।

लतामण्डपभूगेहदीर्घिकाजलदारवाः ।। १८८ ।।

प्रासादगर्भसंगीतक्रीडाद्रिसरिदादयः ।

एवमूह्या[1] यथाकालमुपभोगोपयोगिनः ।। १८९ ।।

तत्र चन्द्रिकाया उद्दीपनत्वं यथा—

दुरासदे[2] चन्द्रिकया सखीजनै-
र्लतानिकुञ्जे ललना निगूहिता ।
चकोरचञ्चुच्युतचन्द्रिकाकणं
कुतोऽपि दृष्ट्वा भजति स्म मूर्छनाम् ।।

धारागृहस्य यथा—

सा[3] चन्द्रकान्तामपि चन्द्रकान्त-
वेदीमधिष्ठातुमपारयन्ती ।
धारागृहं प्राप्य तदप्यनङ्ग-
घोरासिधारागृहमन्वमंस्त ।।

[1] The half *kārikā evam ūhyā,* etc. is missing in *RAS*-2 and in MSS. 5 & 6.

MSS. 4 and 10 read *yathākāmam,* instead of *yathākālam* of others.

[2] Only *RAS*-2 gives a different illustrative verse (instead of *durāsade,* etc.), which is as follows: *udeti rātrāv api ko'yam ātapaḥ sudhāṃśubimbād adhunā suduḥsahaḥ, ghanātapatreṇa na yo nivāryate na nudyate candanakardamair api.* The verse *durāsade,* etc. is quoted in the *Ujjvalanīlamaṇi* (p. 296, NSP).

[3] Only *RAS*-2 reads the foot as *kācid viyuktā kamanīyaratna-* (instead of *sā candrakāntām api candrakānta-* of others).

चन्द्रोदयस्य यथा ममैव[1]–

चन्द्रबिम्बमुदयाद्रिमागतं
पश्य तेन सखि वञ्चिता वयम् ।
अत्र किं निजगृहं नयस्व मां
तत्र वा किमिति विव्यथे वधूः ॥

कोकिलालापस्य यथा–

चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्षं
तदेव जातं वचनं स्मरस्य ॥

(कुमार. ३. ३२)

माकन्दस्य यथा–

[2]चिरलालित एष बालचूतः
स्वकरावर्जितकुम्भवारिसेकैः ।
कुसुमायुधसायकान् प्रसूते
पयसा पन्नगवर्धनं तदेतत् ॥

माकन्द [3]इत्यशोकादीनामुपलक्षणम् ।

[1] In *RAS*-1 *mamaiva* is missing here; it was found in it earlier. See note 1 on p. 61, and the verse there.

[2] *RAS*-2 reads: *navacūtalatā vivardhitā sā*; *RAS*-1 and MS. 4 read: *ciralālita eṣa bālacūtaḥ*. In MSS. 5 & 6 the first foot is missing.

[3] *RAS*-1 reads *aśokānām apy upalakṣaṇam*; *RAS*-2 and MSS. 4, 5 & 6 read *aśokādīnām upalakṣaṇam*.

मन्दमारुतस्य यथा–

भृशं निपीतो भुजगाङ्गनाभि-
विनिर्गतस्तद्गरलेन साकम् ।
तदन्यथा चेत् कथमक्षिणोत् ता-
मदक्षिणो [1]दक्षिणमातरिश्वा ।।

षट्पदस्वनस्य[2] यथा–

मधुव्रतानां मदमन्थराणां मन्त्रैरपूर्वैरिव मञ्जुनादैः ।
मधुश्रियो मानवतीजनानां मानग्रहोच्चाटनमाचरन्ति ।।

लतामण्डपस्य यथा–

एषा पूगवनी[3] प्रफुल्लकुसुमा पर्यन्तचूतद्रुमा
तन्मध्येऽपि सरोवरं [4]निधुवनान्तानन्दमन्दानिलम् ।
तत्तीरे कदलीगृहं विलसितं तस्यान्तरे मल्लिका-
[5]वल्लीमण्डपमत्र सा सुनयना त्वन्मार्गमेवेक्षते ।।

[1] *RAS*-1 gives the fn. reading as *dakṣiṇagandhavāhakaḥ*; only *RAS*-2 gives (instead of the verse *bhṛśaṃ nipīto*) the following illustrative verse: *kusumayan surabhau navamallikāḥ sapadi bhṛṅgaravāhitahuṃkṛtiḥ, yuvatibhī rahitān upakānanaṃ malayavāyur abhartsayata priyān*. This verse seems to be somewhat similar to *Māgha.*, VI. 62.

[2] Only *RAS*-1 reads *ṣaṭpadasvarūpasya*.

[3] *RAS*-1 reads: *pūgavatī praphullakuhalīḥ:* MS. 4 reads *cūtavatī praphullakuhalī*; MS. 5 reads: *pūgavanī praphullakuhalā*; MS. 6 reads: *pūgavatī praphullakuhalā*; *RAS*-2 reads *pūgavanī praphullakusumā*.

[4] Only *RAS*-2 reads: *paricalanmandānilāndolitam*, instead of *nidhuvanānta-* etc.

[5] Only *RAS*-2 reads: (the last foot) *tānīmāni tayā vinā mama sakhe khedaṃ vitanvanty alam.*

भूगेहस्य यथा–

कालागरूद्गारसुगन्धिगन्धधूपाधिवासाश्रयभूगृहेषु[1] ।
न तत्रसुर्माघसमीरणेभ्यः श्यामाकुचोष्माश्रयिणः
पुमांसः ।।

दीर्घिकाया यथा–

एतस्मिन् मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
बाष्पाम्भःपरिपतनोद्गमान्तराले
[2]दृश्यन्तामविरहितश्रियो विभागाः ।।
(मालतीमाधवे ९. १४)

जलदारवस्य यथा–

[3]मनस्विनीनां मनसोऽपि मान-
स्तथापनीतो घनगर्जितेन ।
यथोपगूढाः प्रथितागसोऽपि
क्षणं विदग्धाः कुपिता इवासन् ।।

अत्र जलदारवग्रहणं विद्युदादीनामप्युपलक्षणम् । विद्युतो यथा–

[4]वर्षासु तासु क्षणरुक्प्रकाशात्
त्रस्ता रमा शार्ङ्गिणमालिलिङ्ग ।

[1] *RAS*-2 reads: *-sugandhiṣu śrīdhūpādhivāseṣv iha bhūgṛheṣu*; MSS. 5 & 6 read . . . *śrīdhūpavāsatviṣu*, etc. *RAS*-1 and MS. 4 read what is given in the text.

[2] The reading in the text is the reading in the TSS edition of the *Mālatīmādhava*. *RAS*-1, MSS. 4, 5 & 6 read *saṃdṛṣṭāḥ kuvalayino mayā vibhāgāḥ*.

[3] Only *RAS*-2 gives for illustration of *jaladārava* the verse 3 of the canto VI of *Māgha*., which reads as: *praṇayakopabhṛto 'pi*, etc.

[4] The verse *varṣāsu tāsu*, etc. is quoted from the *RAS* in the *Ujjvalanīlamaṇi* (p. 296, NSP). Perhaps this verse was cited from the *Kandarpasambhava*.

विद्युच्च सा वीक्ष्य तदङ्गशोभां
ह्रीणेव तूर्णं जलदं जगाहे ।।

प्रासादगर्भस्य यथा–

गोपानसीसंश्रितबर्हिणेषु[1] कपोतपालीस्थकपोतकेषु ।
प्रासादगर्भेषु रमाद्वितीयो रेमे पयोदानिलदुर्गमेषु ।।

संगीतस्य यथा–

माधवो मधुरमाधवीलतामण्डपे पटुरटन्मधुव्रते ।
संजगौ श्रवणचारु गोपिकामानमीनबडिशेन वेणुना ।।

क्रीडाद्रेर्यथा–

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्संपर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ।।
(मेघसंदेशे १. २५)

सरितो यथा–

अथोर्मिमालोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः ।
विहर्तुमिच्छा वनितासखस्य तस्याम्भसि ग्रीष्मसुखे
बभूव ।। (रघु. १६. ५४)

इत्याद्यन्यदप्युदाहार्यम् ।

[1] *RAS*-1 and MS. 4 read *kapotaśiñjānakapotakeṣu*; MSS. 5 & 6 read: *kapotasaṃjātakapotakeṣu*; *RAS*-2 reads: *kapotapālīsthakapotakeṣu*.

अथानुभावाः—

[आलम्बनगताश्चेष्टा[1] अनुभावा विवक्षिताः ।]
भावं मनोगतं साक्षात् स्वहेतुं व्यञ्जयन्ति ये ।
तेऽनुभावा इति ख्याता भ्रूविक्षेपस्मितादयः[2] ॥१६०॥
ते [3]चतुर्धा चित्तगात्रवाग्बुद्ध्यारम्भसंभवाः ।
[4]तत्र च भावो हावो हेला शोभा च कान्तिदीप्ती च
॥ १६१ ॥

[1] The half verse *ālambanagatāś ceṣṭā*, etc. is found in MSS. 9 and 10 clearly, but not found in others. The *Rasakalikā* of Rudrabhaṭṭa mentions four types of *uddīpanavibhāva-s*, *ālambanaguṇaś caiva*, etc. (See fn. 1 on page 64), on which Siṃhabhūpāla's division of *uddīpana-s* given in the *kārikā* I.162, seems to be based. The *Rasakalikā*, while dealing with the *ālambanaceṣṭā* (the second *uddīpanavibhāva*), has the following: *ceṣṭā dvedhā yauvanaprabhavo bhāvahāvādiḥ*; *aparas tadanubhāvaś ceti* (page 10, R. 2241). Subsequently also the *Rasakalikā* says: *vibhāvaparipuṣṭe sthāyini ratyādike vāridhisthānīye cetovikārarūpā nirvedādayaḥ kallolasthānīyā jāyante* (This is based on the *Daśarūpaka*: *sthāyiny unmagnanirmagnāḥ kallolā iva vāridhau* IV. 7(ab); see also the *Avaloka* thereon). *teṣām api* (*nirvedādīnām*) *cetovikārarūpatayā sākṣād duradhigamatvena sūcakā ye vāgārambhakaṭākṣavikṣepādayas te . . . anubhāvāḥ* (page 16, ibid.). On this portion of the *RK*, the statement of the *RAS* *ālambanagatāś ceṣṭā anubhāvā vivakṣitāḥ*, etc. seems to be based.

[2] See the *Daśarūpaka* IV. 3(ab), and the *Avaloka*, and the *Laghuṭīkā* thereon (page 171).

[3] The *Bhāvaprakāśa* has the following: *anubhāvaś caturdhā syān manovākkāyabuddhibhiḥ, manaārambhānubhāvā bhāvādyā daśa yoṣitām. vāgārambhānubhāvāś ca dvādaśālāpapūrvakāḥ, gātrārambhānubhāvāś ca līlādyā daśa yoṣitām. buddhyārambhānubhāvāś ca rītivṛttipravṛttayaḥ* (page 6; 11. 13-17). Bhoja had adopted this method earlier. Siṃhabhūpāla has some slight differences from him, which will be made clear in the text itself soon.

[4] The *Rasakalikā* has (ibid., page 10) a list of 18 items in this context, which seems to contain some noted by Siṃhabhūpāla

प्रागल्भ्यं माधुर्यं धैर्यौदार्ये च चित्तजा भावाः ।
निर्विकारस्य चित्तस्य भावः स्यादादिविक्रिया[1]
॥ १९२ ॥

तत्र भावः–

तथोक्तं हि प्राक्तनैरपि–

चित्तस्याविकृतिः सत्त्वं विकृतेः कारणे सति ।
ततोऽल्पा विकृतिर्भावो [2]बीजस्यादिविकारवत् ॥इति
(भावप्रकाशे ८ पुटे)

भावो यथा ममैव–

बाला प्रसाधनविधौ निदधाति चित्तं
दत्तादरा परिणये मणिपुत्रिकाणाम् ।
सा शङ्कते निजसखीजनमन्दहासै-
रालक्ष्यते तदिह भावनवावतारः[3] ॥

under *cittārambhānubhāva-s* and some under *gātrārambhānubhāva-s*. These 18 items of the *Rasakalikā* seem to be adoptd and noted by Vidyānātha as *śṛṅgāraceṣṭā-s* (page 187). This list reads thus: *bhāvo hāvaś ca helā ca mādhuryaṃ dhairyam ity api, līlā vilāso vicchittir vibhramaḥ kilakiñcitam. moṭṭāyitaṃ, kuṭṭamitaṃ bibboko lalitaṃ tathā, kutūhalaṃ ca cakitaṃ vihṛtaṃ hāsa ity api. evaṃ śṛṅgāraceṣṭāḥ syur aṣṭādaśavidhā matāḥ* (p. 187). This is exactly the same in the *RK*. Kumārasvāmin has the following comments: *bhāvādayaś cittārambhāḥ; līlādayo gātrārambhāḥ; ubhaye'py anubhāvāḥ; tad uktam: anubhāvaś caturdhā syān manovākkāyabuddhibhiḥ*—(*BPr.* quoted above) *iti. eteṣāṃ yoṣidālambanaceṣṭārūpāṇāṃ yauvanajanyānām uddīpanavibhāvatvam api prācām ācāryāṇāṃ sammatam*, etc. (ibid.)

[1] See the *Daśarūpaka*, II. 33, which mentions it as one of the *yoṣidalaṃkāra-s* (p. 112).

[2] This is from Śāradātanaya's *Bhāvaprakāśa*, page 8, lines 6 & 7.

[3] This verse was quoted before also. See fn. 2 under Kārikā I. 98 (p. 41).

अत्र पूर्वं शैशवेन रसानभिज्ञस्य चित्तस्य [1]प्रसाधनविधित्सापाञ्चालिकापरिणयादरसखीजनहासशङ्कादीनां तत्प्रथममेव संभूतत्वाद् भावः ।

अथ हावः–

ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविलासकृत् ।
भाव ईषत्प्रकाशो यः स हाव इति [2]कथ्यते ।। १६३ ।।

यथा–

धात्रीवचोभिर्ध्वनिमर्मगर्भैः
क्षणं सरोषस्मितमात्तलज्जा ।
पाञ्चालिकाद्वन्द्वमयोजयत् सा
[3]संबन्धिनी स्वस्य सखीजनस्य ।।

अत्र चित्तविकाराणां रोषहर्षलज्जादीनां कुटिलेक्षणस्मितनताननत्वादिभिरीषत्प्रकाशनाद् अयं हावः ।

अथ हेला–

नानाविकारैः सुव्यक्तः शृङ्गाराकृतिसूचकैः ।
(१६४ क-ख)

[1] *RAS*-2 and MSS. 5 & 6 read—*vidhinā pāñcālikā*, etc. *RAS*-1 and MS. 4 read what is given in the text.

[2] For the definitions of this and other items in this context, see the *Bhāvaprakāśa*, page 8.

[3] *Saṃbandhin* is a common expression even now in South India. If the daughter of 'A' is married to the son of 'B', 'A' and 'B' (and their wives) are known as *saṃbandhin-s*. The idea of the second half intended in this context seems to be that a particular girl in the context, married (playfully) her own *pāñcālikā* (i.e. doll) to other male *pāñcālikā* (*pāñcālaka*?) belonging to her *sakhī*, and thus she became *saṃbandhinī* to her own *sakhījana*. This description indicates that the significance of the term *saṃbandhin*, as is seen now, was also the same in the days of Siṃhabhūpāla.

6

[1]हाव एव भवेद्धेला ललिताभिनयात्मिका ।।१६४।। (ग-घ)

यथा—

विवृण्वती शैलसुतापि भाव-
मङ्गैः स्फुटद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ
मुखेन पर्यस्तविलोचनेन ।। (कुमार. ३. ६८)

अत्र रोमाञ्चमुखसाचीकरणपर्यस्तविलोचनत्वादिविकारैश्चित्त-व्यापारस्यातिप्रकाशत्वेन हेला ।

अथ शोभा—

सा शोभा रूपभोगाद्यैर्यत् स्यादङ्गविभूषणम् ।
(१६५ क-ख)

यथा—

अशिथिलपरिरम्भादर्धशिष्टाङ्गरागा-
मविरतरतवेगादंसलम्बोरुचूलीम्[2] ।
उषसि शयनगेहादुच्चलन्तीं स्खलन्तीं
करतलधृतनीवीं कातराक्षीं भजामः ।।

अथ कान्तिः—

शोभैव कान्तिराख्याता मन्मथाप्यायनोज्ज्वला
।। १६५ ।। (ग-घ)

यथा—

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासः शिथिलितकबरीभारमंसे
वहन्त्याः ।

[1] *RAS*-1 and MSS. 4 & 10 read *hāva eva*; others read *bhāva eva*.

[2] *RAS*-1 and MS. 4 read *-jūṭim*; *RAS*-2 and MSS. 5 & 6 read *-cūlīm*.

भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः
पुनातु ॥ (वेणीसंहारे १. ३)

अत्र पूर्वरतान्तजनिताया वपुःकान्तेरुत्तररतारम्भहेतुत्वान्मन्मथाप्यायकत्वम्[1]।

अथ दीप्तिः—

कान्तिरेव वयोभोगदेशकालगुणादिभिः ।
उद्दीपितातिविस्तारं याता चेद् दीप्तिरुच्यते ॥ १९६ ॥

यथा—

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गिताना-
मङ्गग्लानिं सुरतजनितां जालमार्गप्रविष्टैः ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥
(मेघसंदेशे २. ६)

अत्र प्रियतमालिङ्गनसौधज्योत्स्नादिगुणैः सुरतग्लानिव्यालोपनादुत्तरसुरतोत्साहरूपा दीप्तिः प्रतीयते ।

अथ प्रागल्भ्यम्—

निःशङ्कत्वं प्रयोगेषु प्रागल्भ्यं [2]परिकीर्त्यते ।
(१९७ क-ख)

[1] MS. 4 reads clearly *-āpyāyakatvam* (i.e. *vardhakatvam*); this seems to be better in the context; *RAS*-1, *RAS*-2 and MSS. 5 & 6 read *-āpyāyitatvam.*

[2] *RAS*-1 and MS. 4 read *pragalbhatvaṃ pracakṣate*; *RAS*-2 and MSS. 5 & 6 read *prāgalbhyaṃ paricakṣate*; MSS. 7, 8, 9 and 10 read *prāgalbhyaṃ parikīrtyate.*

यथा—

शिष्यतां निधुवनोपदेशिनः शंकरस्य रहसि प्रपन्नया ।
शिक्षितं युवतिनैपुणं तया यत् तदेव गुरुदक्षिणीकृतम् ।।
(कुमार. ८. १७)

अत्र गुरुदक्षिणीकृतमित्यनेन [1]प्रतिकरणरूपं प्रागल्भ्यं प्रतीयते ।

अथ माधुर्यम्—

माधुर्यं नाम चेष्टानां सर्वावस्थासु मार्दवम् ।। १९७ ।।
(ग-घ)

यथा—

वामं संधिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम् ।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्तादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ।।
(मालविकाग्नि. २. ६)

अत्र पादाङ्गुष्ठेन कुसुमलोलनादिक्रियाणां नृत्तान्तपरिश्रान्तावपि चारुत्वान्माधुर्यम् ।

अथ धैर्यम्[2]—

स्थिरा चित्तोन्नतिर्या तु तद् धैर्यमिति संज्ञितम् ।
(१९८ क-ख)

[1] *RAS*-2 and MSS. 5 & 6 read *parikaraṇarūpam*; *RAS*-1 and MS. 4 read *pratikaraṇarūpam.*

[2] In *RAS*-2 and MSS. 5 & 6, the definition and illustration of *dhairya* are missing.

यथा—

अथ विश्वात्मने गौरी संदिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ।।

(कुमार. ६. १)

अथौदार्यम्—

औदार्यं विनयं प्राहुः सर्वावस्थानुगं बुधाः ।। १६८ ।।

(ग-घ)

यथा—

कल्याणबुद्धेरथवा तवायं न कामचारो मयि शङ्कनीयः ।
ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः ।।

(रघु. १४. ६२)

अत्रानपराधेऽपि निष्कासयतो रामस्यानुपालम्भात् सीताया औदार्यं प्रतीयते । सर्वावस्थासमत्वाविदितेङ्गिताकारत्वरूपयोर्लक्षणयोश्चित्त-धैर्य एवान्तर्भूतत्वाद् [1]भोजराजलक्षितौ स्थैर्यगाम्भीर्यरूपावन्यौ द्वौ चित्तारम्भौ चास्मदुक्ते धैर्य एवान्तर्भूताविति दशैव चित्तारम्भाः ।

अथ गात्रारम्भाः—

लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् ।

[1] These items are said to have been discussed, along with others, in chapter XVII of the *Śṛṅgāraprakāśa*. The printed Mysore edition (vol. III, 1969) mentions on page 680 these *anubhāva-s* along with others. It is noted in the edition (ibid.) that a considerable portion here was missing. Consequently it is not possible to verify and give the details. See V. Raghavan's work on *Śṛṅgāraprakāśa*, page 34. *Bhāvaprakāśa*, which seems to be the basis of our author, leaves out *sthairya* and *gāmbhīrya*, and mentions only ten as: *manaārambhānubhāvā bhāvādyā daśa yoṣitām* (page 6).

मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा ।। १९९ ।।
विहृतं चेति विज्ञेया योषितां दश गात्रजाः ।

तत्र लीला–

प्रियानुकरणं यत्तु मधुरालापपूर्वकैः ।। २०० ।।
चेष्टितैर्गतिभिर्वा स्यात् सा लीलेति निगद्यते ।
(२०१ क-ख)

यथा–

दुष्ट[1] कालिय तिष्ठात्र कृष्णोऽहमिति चापरा ।
बाहुमास्फोटच कृष्णस्य लीलासर्वस्वमाददे ।।

अथ विलासः–

प्रियसंप्राप्तिसमये भ्रूनेत्राननकर्मणाम् ।। २०१ ।।
(ग-घ)

तात्कालिको विशेषो यः स विलास इतीरितः ।
(२०२ क-ख)

यथा–

बाला सखीतनुलतान्तरिता भवन्त-
मालोक्य मुग्धमधुरैरलसैरपाङ्गैः ।
सिंहक्षमारमण चित्तजमोहनास्त्रै-[2]
र्लक्ष्मीरभित्तिलिखितेव चिरं समास्ते ।।

[1] *RAS*-1 reads: *duṣṭakālīyasarpo'tra,* etc. and gives a fn. reading as *-kālīyabhogena kṛṣṭāham.*

[2] *RAS*-1 reads—*cittajamohanāstralakṣmīḥ,* etc. and *cakāsti.* Others read what is given in the text.

अथ विच्छित्तिः—

[1]**आकल्पकल्पनाल्पापि विच्छित्तिरतिकान्तिकृत्**
॥ २०२ ॥ (ग-घ)

यथा—

[2]आलोलैरवगम्यते मधुकरैः केशेषु माल्यग्रहः
कान्तिः कापि कपोलयोः प्रथयते ताम्बूलमन्तर्गतम् ।
अङ्गानामनुमीयते परिमलैरालेपनप्रक्रिया
वेषः कोऽपि विदग्ध एष सुदृशः सूते सुखं चक्षुषोः ॥

अथ विभ्रमः—

प्रियागमनवेलायां मदनावेशसंभ्रमात् ।
विभ्रमोऽङ्गदहारादिभूषास्थानविपर्ययः[3] ॥ २०३ ॥

यथा—

चकार काचित् सितचन्दनाङ्के
काञ्चीकलापं स्तनभारयुग्मे ।
प्रियं प्रति प्रेषितदृष्टिरन्या
नितम्बबिम्बे च बबन्ध हारम् ॥

[1] The *Rasakalikā* has the following: *stokabhūṣaṇayogena vicchittir atiramyatā, bhūṣaṇānādaro vāpi vicchittir iti kecana*(Madras Transc. R. 2241, page 12). Several definitions of the *RAS* seem to represent even in same words those of the *Rasakalikā* and the *Pratāparudrīya*.

[2] This verse was cited earlier also. See Kārikā 187, p. 73.

[3] The *Rasakalikā* has this: *vibhramas tvarayā kāle bhūṣāsthāna-viparyayaḥ*; which is also the same in the *Pratāparudrīya*, where Kumārasvāmin comments: *kāle=priyasamāgamādisamaye* (page 190).

अथ किलकिञ्चितम्—

[1]**शोकरोषाश्रुहर्षादेः संकरः किलकिञ्चितम् ।**

(२०४ क-ख)

यथा—

[2]दत्तं श्रुतं द्यूतपणं सखीभ्यो
विवक्षति प्रेयसि कुञ्चितभ्रूः ।
कण्ठं कराभ्यामवलम्ब्य तस्य
मुखं पिधत्ते स्म कपोलकेन ॥

यथा वा—

रतिक्रीडाद्यूते कथमपि समासाद्य समयं
मया लब्धे तस्याः क्वणितकलकण्ठार्धमधरे ।
कृतभ्रूभङ्गासौ प्रकटितविलक्षार्धरुदित-
स्मितक्रोधोद्भ्रान्तं पुनरपि विदध्यान्मयि मुखम् ॥

(धनिकस्य अवलोके ११८ पुटे)

अथ मोट्टायितम्—

स्वाभिलाषप्रकटनं मोट्टायितमितीरितम् ॥ २०४ ॥

(ग-घ)

यथा ममैव—

आकर्ण्य कर्णयुगलैकरसायनानि
तन्व्या प्रियस्य गदितानि सखीकथासु ।

[1] The *DR* and *Rasakalikā* have: *krodhāśruharṣabhītyādeḥ saṃkaraḥ kilakiñcitam*; which is the same in the *Pratāparudrīya* too (p. 190).

[2] *RAS*-1 reads *uktaṃ śrutaṃ dyūtapaṇam*, etc., MS. 4 reads *dattaṃ śrutam*, etc.; *RAS*-2 reads *uktaśrutadyūtapaṇā*, etc.; MSS. 5 & 6 read *uktaṃ śrutaṃ dyūtapaṇā*, etc.

आलोलकङ्कणझणत्करणाभिराम-
मावेल्लिते भुजलते ललिताङ्गभङ्गम् ॥

अथ कुट्टमितम्—

केशाधरादिग्रहणे मोदमानेऽपि मानसे ।
[1]दुःखितेव बहिः कुप्येद् यत्र कुट्टमितं हि तत् ॥ २०५ ॥

यथा—

पाणिपल्लवविधूननमन्तःसीत्कृतानि नयनार्धनिमेषाः ।
योषितां रहसि गद्गदवाचामस्त्रतामुपययुर्मदनस्य ॥
(किरातार्जुनीये ९. ५०)

अत्र रहसीति सामान्यसूचितानां केशाधरग्रहणादीनां कार्यभूतैः पाणिपल्लवविधूननसीत्कृतादिभिर्बहिरेव कोपस्य प्रतीयमानत्वात् कुट्टमितम् ।

अथ बिब्बोकः—

इष्टेऽप्यनादरो [2]गर्वान्मानाद् बिब्बोक ईरितः ।
(२०६ क-ख)

[1] The *Rasakalikā* has the following: *ratyādau priyamarde 'pi sukhabuddhir niraṅkuśā—adharapīḍanādau sukhe 'pi duḥkhavad upacāraḥ kuṭṭamitam* (page 13). The line *adharapīḍanādau*, etc. is quoted by Mallinātha in his commentary on the *Kirātārjunīya*, IX. 50. On VIII. 18 of the *Kumārasaṃbhava* (*daṣṭamuktam-*)Mallinātha says: *atrādharapīḍanāt sukhe 'pi duḥkhavad upacārāt kuṭṭamitanāmānubhāvaḥ*. Then he quotes from the *RAS* the definition *keśādharādigrahaṇe*, etc. The *Nāṭyaśāstra* says: *keśastanādharādigrahaṇād atiharṣasambhramotpannam, kuṭṭamitaṃ vijñeyaṃ sukham api duḥkhopacāreṇa*(GOS, vol. III, page 161).

[2] The *Rasakalikā* has *garvābhimānād iṣṭe 'pi bibboko 'nādarakriyā* (page 14). The expression *mānāt* seems to be intended by Siṃhabhūpāla in the sense of *kopāt*. Commenting on the illustrative verse *nirvibhujya*, etc. (*Ku. Saṃ*. 8. 49) Mallinātha says at the end *na tu roṣāt bhartur uttaraṃ dadāv ityarthaḥ*.

गर्वाद् यथा–

पुंसानुनीता शतसामवादै-
गर्वान्निरीहेव[1] चुचुम्ब काचित् ।
अर्थानभीष्टानपि वामशीलाः
स्त्रियः परार्थानिव कल्पयन्ति ॥

मानाद् यथा–

निर्विभुज्य दशनच्छदं ततो वाचि भर्तुरवधीरणापरा ।
शैलराजतनया समीपगामाललाप विजयामहेतुकम् ॥
(कुमार. ८. ४९)

अत्र संध्यानिमित्तं मानादनादरेण[2] बिब्बोकः ।

अथ ललितम्–

विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा ॥ २०६ ॥
(ग-घ)

सुकुमारा भवेद् यत्र ललितं तदुदीरितम् । (२०७ क-ख)

यथा–

चरणकमलकान्त्या देहलीमर्चयन्ती
कनकमयकवाटं पाणिना कम्पयन्ती ।
कुवलयमयमक्ष्णा तोरणं पूरयन्ती
वरतनुरियमास्ते मन्दिरस्येव लक्ष्मीः ॥

[1] *RAS*-1 reads *hālāṃ nirīheva*, etc.; *RAS*-2 and MSS. 5 & 6 read *balān nirīheva*; MS. 4 reads clearly *garvān nirīheva*.

[2] *RAS*-1 and MS. 4 read —*saṃdhyānimittam anādareṇa*; *RAS*-2 and MS. 5 read-*mānādareṇa*, etc; MS. 6 reads *mānād anādareṇa*, etc.

अथ विहृतम्–

ईर्ष्यया मानलज्जाभ्यां न दत्तं योग्यमुत्तरम् ।। २०७ ।।
(ग-घ)

क्रियया व्यज्यते यत्र विहृतं[1] तदुदीरितम् ।
(२०८ क-ख)

ईर्ष्यया यथा–

तथागतायां परिहासपूर्वं सख्यां सखी वेत्रभृदाबभाषे ।
आर्ये व्रजावोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ।।
(रघु. ६. ८२)

अत्र न [2]व्रजाव इत्युत्तरमदत्त्वा कुटिलदर्शनेनैव व्यञ्जनाद् विहृतम् ।

मानेन यथा–

अद्यापि तन्मनसि संपरिवर्तते मे
रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या ।
जीवेति मङ्गलवचः परिहृत्य रोषात्
कर्णेऽर्पितं कनकपत्रमनालपन्त्या ।।
(चौरपञ्चाशिका ११)

लज्जया यथा–

अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिगृह्य पार्वती [3]मूर्धकम्पमयमुत्तरं
ददौ ।। (कुमार. ८. ६)

[1] The *Rasakalikā* has: *prāptakālaṃ tu yad brūyād kuryād vā vihṛtaṃ hi tat* (page 15). See also fn. 3 below.

[2] *RAS*-1 reads *vrajāva ity atrottarasya*, etc. and gives a footnote reading as *ity uttaram adattvā ku*, etc. All others read: *na vrajāva ity uttaram adattvā*, etc.

[3] While commenting on this verse (*apy avastuni*, etc.), Mallinātha quotes the definition of *vihṛta* from the *RAS*, and with the reading

इत्थं श्रीसिंहभूपेन [1]सत्त्वालंकारशालिना ।। २०८ ।।
(ग-घ)
[2]कथिताः सत्त्वजाः स्त्रीणामलंकारास्तु विंशतिः ।
सत्त्वाद् दशैव भावाद्या जाता लीलादयस्तु न ।। २०९ ।।
अतो हि विंशतिर्भावाः सात्त्विका इति नोचितम् ।
युज्यते सात्त्विकत्वं च भावादिसहचारिणः ।। २१० ।।
[3]लीलादिदशकस्यापि छत्रिन्यायबलात् स्फुटम् ।
भोजेन क्रीडितं केलिरित्यन्यौ गात्रजौ स्मृतौ ।। २११।।
अतो विंशतिरित्यत्र संख्येयं नोपपद्यते । (२१२ क-ख).

तथा[4] हि लक्षितमननैव च–

as *īrṣyāmānātilajjābhyāṃ na dattaṃ yogyam uttaram*, etc. and while commenting on verse VII. 19, he quotes from the *Rasakalikā* the definition: *prāptakālaṃ tu yad brūyād kuryād vā vihṛtaṃ hi tat.* See fn. 1, p. 91.

[1] MS. 4 reads *sattvādiguṇaśālinā*; others read *sattvālaṃkāra-śālinā*. The verses from *itthaṃ śrīsiṃhabhūpena*, etc. (208) to *ato viṃśatir ityeṣā saṃkhyā saṃkhyāvatāṃ matā* (214) are not found in MSS. 7, 8, 9 and 10.

[2] See the *Daśarūpaka—yauvane sattvajāḥ strīṇām alaṃkārās tu viṃśatiḥ* (II. 30, p. 111).

[3] The *Bhāvaprakāśa* says thus: *tatra līlādayo bhāvā yady api syur na sāttvikāḥ, chatriṇāṃ gativat te 'pi talliṅgatvena sāttvikāḥ* (page 6; ll. 21-22). Commenting on the *Daśarūpaka*, II. 30, *yauvane sattva-jāḥ strīṇām alaṃkārās tu viṃśatiḥ* Bahurūpamiśra, following Śāradātanaya, says thus: *līlāvilāsādīnāṃ śarīrārambhatvena sāttvikatvā-bhāve 'pi chatriṇo gacchantītivat talliṅgatvena sattvajā viṃśatir alaṃkārā ity uktam. līlādīnāṃ ca śarīrārambhatvena bhojādibhir uktatvād iti* (p. 84). It is not clear whether the maxim of *chatrinyāya* was also mentioned in this context by some earlier writers.

[4] Only *RAS*-1 reads *tathābhihitam anenaiva ca.* Others read *tathā hi lakṣitam anenaiva ca.*

[1]क्रीडितं केलिरित्यन्यौ गात्रारम्भावुदाहृतौ ।
बाल्ययौवनकौमारसाधारणविहारभाक् ।।
विशेषः क्रीडितं केलिस्तदेव[2] दयिताश्रयम् । इति ।
उदाहृतं च ।

क्रीडितं यथा–

[3]मन्दाकिनीसैकतवेदिकाभिः
सा कन्दुकैः कृत्रिमपुत्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां
क्रीडारसं निर्विशतीव बाल्ये ।। (कुमार. १. २९)

केलिर्यथा–

व्यपोहितुं लोचनतो मुखानिलै-
रपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः
प्रियं जघानोन्नतपीवरस्तनी ।।
(किरातार्जुनीये ८. १९)

इति ।

[1] See the *Sarasvatīkaṇṭhābharaṇa*, pp. 533-4. See also the *Bhāvaprakāśa* where *krīḍita* and *keli* are likewise referred to (p. 10, lines 16-19). See Prof. V. Raghavan's work on *ŚP*, pp. 717-719 and particularly p. 718.

[2] *RAS*-2 and MSS. 5 & 6 read *tathaiva* for *tad eva* of *RAS*-1 and MS. 4.

[3] These two verses (*mandākinī*, etc. and *vyapohitum*, etc.) together with a brief definition, are found in the *Sarasvatīkaṇṭhābharaṇa* (pp. 533-4). The *Śṛṅgāraprakāśa* has a different verse (*iti dvijātau*, etc. from the *Kumārasambhava*, V. 74) as an illustration for *keli* (page 688, Mysore edn., vol. III).

अत्रोच्यते भावतत्त्ववेदिना सिंहभूभुजा ।। २१२ ।।
(ग-घ)

आद्यः प्रागेव भावादिसमुत्पत्तेश्च शैशवे ।
कन्याविनोदमात्रत्वादनुभावेषु नेष्यते ।। २१३ ।।
प्रेमविस्रम्भमात्रत्वान्नान्यस्याप्यनुभावता ।
अतो विंशतिरित्येषा संख्या संख्यावतां [1]मता
।। २१४ ।।

अथ पौरुषसात्त्विकाः—

शोभा विलासो माधुर्यं धैर्यं गाम्भीर्यमेव च ।
ललितौदार्यतेजांसि सत्त्वभेदास्तु[2] पौरुषाः ।। २१५ ।।

तत्र शोभा—

नीचे दयाधिके स्पर्धा शौर्योत्साहौ च दक्षता ।
यत्र प्रकटतां यान्ति सा शोभेति प्रकीर्तिता ।।२१६।।

नीचे दयाधिके स्पर्धा यथा—

क्षुद्राः संत्रासमेनं विजहित हरयो भिन्नशक्रेभकुम्भा
युष्मद्गात्रेषु लज्जां दधति परममी सायकाः
संपतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमपि न हि रुषां नन्वहं मेघनादः
किंचिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ।।
(हनुमन्नाटके १२. २)

[1] See fn. 1, p. 92.
[2] See also the *Daśarūpaka* II. 10, and the *Avaloka* thereon (p. 87).

अत्र प्रथमार्धे क्षुद्रकपिविषया दया, उत्तरार्धे रामविषया स्पर्धा चेन्द्रजितः प्रतीयते। शौर्यं सत्त्वसारः। उत्साहः स्थैर्यम्। दक्षता क्षिप्रकारित्वम्। एषां नायकगुणनिरूपणावसर एवोदाहरणानि दर्शितानि।

अथ विलासः–

वृषभस्येव गम्भीरा गतिर्धीरं च दर्शनम्।
सस्मितं च वचो यत्र स विलास इतीरितः॥ २१७॥

गम्भीरगमनं यथा–

तानर्घ्यानर्घ्यमादाय दूरं प्रत्युद्ययौ गिरिः।
नमयन् सारगुरुभिः पादन्यासैर्वसुंधराम्॥

(कुमार. ६. ५०)

धीरदृष्टिर्यथा–

ततो गभीरं विनिवर्तितेन प्रभातपङ्केरुहबन्धुरेण।
अपश्यदक्ष्णा मधुमात्मजन्मा प्रत्याबभाषे स च दैत्यदूतम्॥

सस्मितं वचो यथा–

द्योतितान्तःसभैः कुन्दकुड्मलाग्रदतः स्मितैः।
स्नपितेवाभवत् तस्य शुद्धवर्णा सरस्वती॥

(माघ. २. ७)

अथ माधुर्यम्–

तन्माधुर्यं यत्र चेष्टादृष्ट्यादेः स्पृहणीयता।

(२१८ क-ख)

यथा–[1]

ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः ।
मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च यत् ॥
(कुमार. ४. २३)

धैर्यगाम्भीर्ये तु नायकगुणवर्णनावसर एवोक्ते ।

अथ ललितम्–

शृङ्गारप्रचुरा चेष्टा यत्र तल्ललितं [2]भवेत् ॥ २१८ ॥
(ग-घ)

यथा–

[3]कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरं गण्डोड्डमरपुलकं वक्त्रकमलम् ।
मुहुः पश्यन् श्रृण्वन् रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं द्रढयति रघूणां परिबृढः ॥
(हनुमन्नाटके १. १९)

औदार्यतेजसोरपि नायकप्रसङ्ग एव लक्षणोदाहरणे प्रोक्ते ।

अत्र [4]गाम्भीर्यधैर्ये द्वे चित्तजे गात्रजाः परे ।
(२१९ क-ख)

[1] *RAS*-2 and MSS. 5 & 6 read *dṛṣṭir yathā.*

[2] *RAS*-2 and MSS. 5 & 6 read *lalitaṃ manaḥ*; others read as given.

[3] This verse (*kapole jānakyāḥ*, etc) is quoted by Dhanika as an illustration of *mādhurya* (See *DRA*, p. 89).

[4] After defining the items of *gātrārambhānubhāva-s*, Śāradātanaya has the following: *ete sādhāraṇāḥ sattvagātrārambhānubhāvayoḥ, sthairyaṃ gāmbhīryam ācāryaiḥ cittārambhāv udāhṛtau* (page 10, 11-12). Who is meant by this *ācārya* is not clear. Śākyācārya Rāhula?

एके साधारणानेतान् मेनिरे [1]चित्तगात्रयोः ।। २१९ ।।
(ग-घ)

अथ वागारम्भाः–

आलापश्च विलापश्च संलापश्च प्रलापकः ।
अनुलापापलापौ च संदेशश्चातिदेशकः ।। २२० ।।
निर्देशश्चोपदेशश्चापदेशो व्यपदेशकः ।
एवं [2]द्वादशधा प्रोक्ता वागारम्भा विचक्षणैः
।। २२१ ।।

तत्रालापः–

[3]तत्रालापः प्रियोक्तिः स्याद् (२२२ क)

यथा ममैव–

कस्ते वाक्यामृतं त्यक्त्वा शृणोत्यन्यगिरं बुधः ।
[4]सहकाररसं त्यक्त्वा निम्बं चुम्बति किं शुकः ।।

यथा वा–

धत्से धातुर्मधुप कमले सौख्यमध्यासिकायां[5]
मुग्धाक्षीणां वहसि मृदुना कुन्तलेनोपमानम् ।

[1] *RAS*-2 and MSS. 5 & 6 read *sattvayogayoḥ*, instead of *citta-gātrayoḥ*.

[2] See the *Śṛṅgāraprakāśa*, vol. III, p. 680; and the *Bhāva-prakāśana* which note all the 12 items.

[3] *RAS*-1 and MS. 4 read *cāṭuprāyoktir ālāpaḥ*; *RAS*-2 and MSS. 5 & 6 read *cāṭupriyoktir ālāpaḥ*; MSS. 7, 8, 9 and 10 read what is given in the text.

[4] *RAS*-1 and MS. 4 read *sahakāraphalam*; *RAS*-2 and MSS. 5 & 6 read *sahakārarasam*.

[5] *RAS*-1 and MS. 4 read *ardhāsikāyām*; *RAS*-2 and MSS. 5 & 6 read *adhyāsikāyām*.

चापे किं च व्रजसि गुणतां शम्बरारेः किमन्यत्[1]
पूजापुष्पं भवति भवतो भुक्तशेषं सुराणाम् ॥

अथ विलापः—

विलापो दुःखजं वचः । (२२२ ख)

यथा—

सीतां स्वहस्तेन वने विमोक्तुं
श्रोतुं च तस्याः परिदेवितानि ।
सुखेन लङ्कासमरे मृतं मा-
मजीवयद् मारुतिरात्तवैरः ॥

(हनुमन्नाटके १४. ९१)

अथ संलापः—

उक्तिप्रत्युक्तिमद् वाक्यं संलाप इति कीर्तितम्
॥ २२२ ॥ (ग-घ)

यथा—

भिक्षां प्रदेहि ललितोत्पलपत्रनेत्रे
पुष्पिण्यहं खलु सुरासुरवन्दनीय ।
बाले तथा यदि फलं त्वयि विद्यते मे
वाक्यैरलं फलभुगीश [2]परोऽस्ति याहि ॥

अथ प्रलापः—

व्यर्थालापः प्रलापः स्याद् (२२३ क)

[1] *RAS*-1 and MS. 4 read *kim anyaiḥ*; *RAS*-2 and MSS. 5 & 6 read *kim anyat.*

[2] *RAS*-1 and MS. 4 read *paro'sti yāhi*; *RAS*-2 and MSS. 5 & 6 read—*varo 'sti yāhi.*

यथा—

मुखं तु चन्द्रप्रतिमं तिमं तिमं
स्तनौ च पीनौ कठिनौ ठिनौ ठिनौ ।
कटिर्विशाला रभसा भसा भसा
अहो विचित्रं तरुणी रुणी रुणी ।।

अथानुलापः—

अनुलापो मुहुर्वचः । (२२३ ख)

यथा—

तमस्तमो नहि नहि मेचकाः कचाः
शशी शशी नहि नहि [1]दृक्सुखं मुखम् ।
लते लते नहि नहि सुन्दरौ करौ
नभो नभो नहि नहि चारु मध्यमम् ।।

अथापलापः—

अपलापस्तु पूर्वोक्तस्यान्यथा योजनं भवेत् ।। २२३ ।। (ग-घ)

यथा—

त्वं रुक्मिणी त्वं खलु सत्यभामा
किमत्र गोत्रस्खलनं ममेति ।
प्रसादयन् व्याजपदेन राधां
पुनातु देवः पुरुषोत्तमो वः ।।

अत्र नायिकावाचकयोः रुक्मिणीसत्यभामापदयोः पूर्वोक्तयोः सुवर्णवत्त्वसत्यकोपत्वलक्षणेनार्थेन योजनादपलापः ।

[1] *RAS*-1 and MS. 4 read *dṛksukhaṃ mukham*; *RAS*-2 and MSS. 5 & 6 read *saṃmukhaṃ mukham*.

अथ संदेशः–

संदेशस्तु[1] प्रोषितस्य स्ववार्ताप्रेषणं भवेत् ।
(२२४ क-ख)

यथा–

एतस्मान् मां कुशलिनमभिज्ञानदानाद् विदित्वा
मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ह्रासिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ।।
(मेघसंदशे २. ५२)

अथातिदेशः–

सोऽतिदेशो मदुक्तानि [2]तदुक्तानीति यद् वचः
।। २२४ ।। (ग-घ)

यथा–

[3]तनयां तव याचते हरिर्जगदात्मा पुरुषोत्तमः स्वयम् ।
गिरिगह्वरशब्दसंनिभां गिरमस्माकमवेहि वारिधे ।।

अथ निर्देशः–

निर्देशस्तु भवेत् सोऽयमहमित्यादिभाषणम् ।
(२२५ क-ख)

यथा–

एते वयममी दाराः कन्येयं कुलजीवितम् ।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ।।
(कुमार. ६. ६३)

[1] See also the *Bhāvaprakāśa* for these items *ālāpa, saṃdeśa*, etc. and their definitions.

[2] Only MS. 4 reads *tvaduktanīti*; others read *taduktānīti*.

[3] *RAS*-1 and MS. 4 read *tanayāṃ tava yācate harir jagadātmā*, etc.; *RAS*-2 and MSS. 5 & 6 read *tanayāṃ tava yācate mahātmā jagadātmā*, etc.

अथोपदेशः—

यत्र[1] शिक्षार्थवचनमुपदेशः[2] स उच्यते ।। २२५ ।।

(ग-घ)

यथा—

अनुभवत दत्त वित्तं मान्यं मानयत सज्जनं भजत ।
अतिपरुषपवनविलुलितदीपशिखाचञ्चला लक्ष्मीः ।।

अथापदेशः—

अन्यार्थकथनं यत्र सोऽपदेश इतीरितः । (२२६ क-ख)

यथा—

कोशद्वन्द्वमियं दधाति नलिनी कादम्बचञ्चुक्षतं
धत्ते चूतलता नवं किसलयं पुंस्कोकिलास्वादितम् ।
इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे
चेलान्तेन तिरोदधे स्तनतटं बिम्बाधरं पाणिना ।।

(सुभाषितावलावपि दृश्यते)

अथ व्यपदेशः—

व्याजेनात्माभिलाषोक्तिर्यत्रायं व्यपदेशकः ।। २२६ ।।

(ग-घ)

यथा—

अहिणवमहुलोलुवो तुमं तह परिचुंबिअ चूदमञ्जरिं ।
कमलवसइमेत्तणिव्वुदो महुअर विह्मरिदोऽसि णं कहं ।।

(अभिज्ञानशाकुन्तले ५. १)

[1] *RAS*-2 and MS. 5 read *yacchikṣārthas tu vacanam*; *RAS*-1 and MS. 4 read as given in the text. MSS. 6, 7, 8, 9 and 10 read *yacchikṣārthaṃ tu vacanam*.

[2] MSS. 7, 8, 9 and 10 give the definition of *apadeśa* before that of *upadeśa*.

(छाया–

अभिनवमधुलोलुपस्त्वं
तथा परिचुम्ब्य चूतमञ्जरीम् ।
कमलवसतिमात्रनिर्वृतो
मधुकर विस्मृतोऽस्येनां कथम् ।।)

अथ बुद्धयारम्भाः–

तत्र रीतिः–

बुद्ध्यारम्भास्तथा प्रोक्ता रीतिवृत्तिप्रवृत्तयः ।
रीतिः स्यात् पदविन्यासभङ्गी सा तु त्रिधा मता[1] ।। २२७ ।।
कोमला कठिना मिश्रा चेति स्यात् तत्र कोमला ।
[2]द्वितीयतुर्यवर्णैर्या स्वल्पैर्वर्गेषु निर्मिता ।। २२८ ।।
अल्पप्राणाक्षरप्राया [3]दशप्राणसमन्विता ।
समासरहिता स्वल्पैः समासैर्वा विभूषिता ।। २२९ ।।
विदर्भजनहृद्यत्वात् सा वैदर्भीति कथ्यते ।
(२३० क-ख)

[1] Bhoja says: *buddhyārambheṣu vacanavinyāsakramo rītiḥ* (vol. III, p. 681). The *Camatkāracandrikā* says after the *Sarasvatīkaṇṭhābharaṇa*, thus: *rītiḥ padānāṃ ghaṭanā proktā rītiviśāradaiḥ, rīṅ gatāv-ity ato dhātor āgatā rītir īryate*. See also V. Raghavan's work on *ŚP* for a discussion on the treatment of *rīti* by various writers.

[2] MSS. 7 & 8 alone have this defective reading: *dvitīyaturyau varjayitvā*.

[3] For the *daśaprāṇā-s*, see the *kārikā-s* I. 230 (*ga-gha*), 231, etc.

महाप्राणवर्णाल्पत्वमल्पप्राणाक्षरप्रायत्वं च यथा ममैव[1]–

उत्फुल्लगण्डयुगमुद्गतमन्दहास-
मुद्वेलरागमुररीकृतकामतन्त्रम् ।
हस्तेन हस्तमवलम्ब्य कदा नु सेवे
संलापरूपममृतं सरसीरुहाक्ष्याः ॥

(कुवलयावली ३. ४)

समासराहित्यं यथा–

अथ यन्तारमादिश्य धुर्यान् विश्रामयेति सः ।
तामवारोपयत् पत्नीं रथादवततार च ॥

(रघु. १. ५४)

दश प्राणास्तु–

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ॥ २३० ॥

(ग-घ)

अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ।
एते वैदर्भमार्गस्य प्राणा दश [2]गुणाः स्मृताः ॥ २३१ ॥

तत्र श्लेषः–

केवलाल्पप्राणवर्णपदसंदर्भलक्षणम् ।
शैथिल्यं यत्र न स्पृष्टं स श्लेषः समुदाहृतः ॥ २३२ ॥

[1] *mamaiva* is missing in *RAS*-1; *RAS*-2 and MSS. 4, 5 & 6 read clearly this. This verse is from the *Kuvalayāvalī* (or the *Ratnapāñcālikā*) of our author (TSS ed., 1941).

[2] *śleṣaḥ prasādaḥ samatā*, etc. are used from Daṇḍin's *Kāvyādarśa* (See *KĀ*, I. 41 & 42, etc.). See also the definitions given by Daṇḍin and Bhoja (*SKĀ*) which are all utilized by Siṃhabhūpāla.

यथा ममैव उत्फुल्लगण्डयुगमित्यादौ [1]श्लिष्टवर्णमिश्रितबन्धत्वात् श्लेषः ।

अथ प्रसादः—

प्रसिद्धार्थपदत्वं यत् स प्रसादो [2]निगद्यते ।

(२३३ क-ख)

यथा उत्फुल्लगण्डयुगमित्यत्र पदानामक्लेशेनैवार्थबोधनसामर्थ्यात् प्रसादः ।

अथ समता—

बन्धवैषम्यराहित्यं समता [3]पदगुम्फने ।। २३३ ।।

(ग-घ)

बन्धो मृदुः स्फुटो मिश्र इति त्रेधा स भिद्यते ।

(२३४ क-ख)

तत्र मृदुवर्णबन्धस्य समता यथा—

चरणकमलकान्त्या देहलीमर्चयन्ती
कनकमयकवाटं पाणिना कम्पयन्ती ।
कुवलयमयमक्ष्णा तोरणं पूरयन्ती
वरतनुरियमास्ते मन्दिरस्येव लक्ष्मीः ।।

अत्र मृदुवर्णप्रायबन्धस्य निर्व्यूढत्वाद् मृदुबन्धसमता ।

[1] The portion of the sentence from *śliṣṭavarṇa*, etc. and the definition of *prasāda* are missing in *RAS*-2 and MSS. 5 & 6.

[2] See the *Sarasvatīkaṇṭhābharaṇa* I. 66; this is so in the *Pratāparudrīya* too.

[3] Mallinātha's quotation of this line in his commentary on *Māgha* VI. 20 reads *padagumphane*; the MSS. read *padagumphanam*.

स्फुटबन्धसमता यथा–

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृतानिभृताक्षरमुज्जगे ।।
(माघे ६. २०)

अत्र स्फुटवर्णप्रायबन्धस्य निर्व्यूढत्वात् [1]स्फुटबन्धसमता । मिश्र-बन्धसमता यथा उत्फुल्लगण्डयुगमित्यादौ । अत्र मिश्रीभूतमृदुस्फुट-वर्णबन्धस्य निर्वाहाद्[2] मिश्रबन्धसमता ।

अथ माधुर्यम्—–

तन् माधुर्यं भवेद् यत्र शब्देऽर्थे च [3]स्फुटो रसः
।। २३४ ।। (ग-घ)

यथा उत्फुल्लगण्डयुगमित्यत्र शब्दार्थयोः शृङ्गाररसपरिवाहित्वेन माधुर्यम् ।

अथ सुकुमारत्वम्–

यदनिष्ठुरवर्णत्वं सौकुमार्यं तदुच्यते । (२३५ क-ख)

यथा उत्फुल्लगण्डयुगमुद्गतमन्दहासमित्यत्र संयुक्ताक्षरसद्भावे-ऽप्यनिष्ठुरत्वात् सौकुमार्यम् ।

अथार्थव्यक्तिः–

श्रूयमाणस्य वाक्यस्य विना शब्दान्तरस्पृहाम् ।। २३५।।
(ग-घ)

[1] *RAS*-2 reads *sphuṭabandhasamatā*; others read mere *samatā*.

[2] *RAS*-1 reads *nirvyūḍhatvāt*; MS. 4 reads *nirvyūḍhabandhanatvāt*; *RAS*-2 and MSS. 5 & 6 read *nirvāhāt*.

[3] See Daṇḍin's *Kāvyādarśa*, I. 51: *madhuraṃ rasavad vāci vastuny-api rasasthitiḥ.*

अर्थावगमकत्वं यदर्थव्यक्तिरियं मता । [1](२३६ क-ख)

यथा उत्फुल्लगण्डयुगमित्यत्र सर्वेषां पदानामध्याहार्यपदनिराकाङ्क्षतया अर्थव्यक्तिः ।

अथोदारत्वम्–

उक्ते वाक्ये गुणोत्कर्षप्रतिभानमुदारता[2] ।। २३६ ।।
(ग-घ)

यथा उत्फुल्लगण्डयुगमित्यत्रान्योन्यानुरागोत्कर्षप्रतिभानादुदारत्वम् ।

अथौजः–

समासबहुलत्वं यत् तदोज[3] इति गीयते ।
(२३७ क-ख)

यथा उत्फुल्लगण्डयुगमित्यत्र यथोचितसमासबाहुल्यादोजः ।

अथ कान्तिः–

लोकस्थितिमनुल्लङ्घ्य हृद्यार्थप्रतिपादनम् ।। २३७ ।।
(ग-घ)

कान्तिः स्याद् द्विविधा [4]ख्याता वार्तायां वर्णनासु च ।
(२३८ क-ख)

वार्ता नाम कुशलप्रश्नपूर्विका संकथा । तत्र यथा–

परिधौतभवत्पदाम्बुना नवचन्द्रातपशीतलेन मे ।
अपि सन्ततमर्मकृन्तनः कृतनिर्वाण इवौर्वपावकः ।।

[1] See also Daṇḍin's *KĀ*, I. 73; *arthavyaktiraneyatvam...*

[2] Daṇḍin has this: *utkarṣavān guṇaḥ kaścit yasminn ukte pratīyate, tad udārāhvayaṃ tena sanāthā kāvyapaddhatiḥ* (I. 76).

[3] See *ojaḥ samāsabhūyastvam*, etc. (*KĀ*, I. 80).

[4] See *kāntaṃ sarvajagatkāntaṃ laukikārthānatikramāt, tacca vārtābhidhāneṣu varṇanāsvapi dṛśyate* (ibid., I. 85).

अत्र ब्राह्मणपादोदकस्य संतापशमनरूपां लौकिकीं स्थिति-मनुल्लङ्घ्यैव समुद्रेण मुनीनां पुरतः संकथनात् कान्तिः ।

वर्णनायां यथा ममैव—

उत्तुङ्गौ[1] स्तनकलशौ रम्भास्तम्भोपमानमूरुयुगम् ।
तरले दृशौ च तस्याः सृजता धात्रा किमाहितं सुकृतम् ॥

अत्र विशिष्टवस्तुनिर्माणमपुण्यकृतां न भवतीति लोकस्थित्यनु-रोधेनैव वर्णनात् कान्तिः ।

अथ समाधिः—

समाधिः[2] सोऽन्यधर्माणां यदन्यत्राधिरोपणम्
॥ २३८ ॥ (ग-घ)

यथा उत्फुल्लगण्डयुगमित्यत्रोत्फुल्लोद्गतोद्वेलत्वरूपाणां पुष्प-प्राणिसमुद्रधर्माणां गण्डस्थलमन्दहासरागेषु समारोपितत्वात् समाधिः ।

अथ कठिना रीतिः—

अतिदीर्घसमासयुता बहुलैर्वर्णैर्युता महाप्राणैः ।
कठिना सा गौडीयेत्युक्ता तद्देशबुधमनोज्ञत्वात्
॥ २३९ ॥

यथा—

गण्डग्रावगरिष्ठगैरिकगिरिक्रीडत्सुधान्धोवधू-
[3]बाधालम्पटबाहुसंपदुदयद्दुर्वारगर्वाशयम् ।

[1] The verse *uttuṅgau*, etc. was cited earlier also (p. 45), with the reading *kucakumbhau* for *stanakalaśau*.

[2] See *anyadharmas tato'nyatra lokasīmānurodhinā, samyag ādhīyate yatra sa samādhiḥ smṛto yathā* (*KĀ*, I. 93).

[3] MS. 4 reads *bandhālampaṭa*, etc. *RAS*-1, *RAS*-2 and MSS. 5 & 6 read *bādhā*, etc.

मर्त्यामर्त्यविरावणं बलगृहीतैरावणं रावणं
बाणैर्दाशरथी रथी रथगतं विव्याध दिव्यायुधः ।।

अत्र दीर्घसमासत्वं महाप्राणाक्षरप्रायत्वं च स्पष्टम् ।

अथ मिश्रा रीतिः–

यत्रोभयगुणग्रामसंनिवेशस्तुलाधृतः ।
सा मिश्रा सैव पाञ्चालीत्युक्ता तद्देशजप्रिया
।। २४० ।।

यथा–

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तःपरिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं प्रशिथिलभुजाक्षेपवलनैः
कृशाङ्ग्याः संतापं वदति बिसिनीपत्रशयनम् ।।
(रत्नावली २. १२)

[1]अत्राल्पसमासत्वदीर्घसमासत्वरूपयोः प्रसादस्फुटबन्धत्वरूपयोरनिष्ठुरनिष्ठुराक्षरप्रायत्वरूपयोः पृथक्पदत्वग्रन्थिलत्वयोश्च उभयरीतिधर्मयोस्तुलाधृतयोरिव संनिवेशान्मिश्रेयं रीतिः ।

[2]आन्ध्री लाटी च सौराष्ट्रीत्यादयो मिश्ररीतयः ।
सन्ति तत्तद्देशविद्वत्प्रियमिश्रणभेदतः ।। २४१ ।।
त[3] एव पदसंघातास्ता एवार्थविभूतयः । (२४२ क-ख)

[1] *RAS*-1 and MS. 4 read *atrāsamāsadīrghasamāsatva*, etc. and *tulādhṛtavat*; *RAS*-2 and MSS. 5 & 6 read what is given in the text.

[2] The *kārikā-s* from *āndhrī lāṭī*, etc. (241) to *īkṣyatām* in 243 are not found in MSS. 7, 8, 9 & 10.

[3] Śāradātanaya says: *ta evākṣaravinyāsās tā eva padapaṅktayaḥ, puṃsi puṃsi viśeṣeṇa kāpi kāpi sarasvatī* (*BPr.*, page 12, 1-2). Nīlakaṇṭhadīkṣita, too, says thus.

तथापि नव्यं भवति काव्यं ग्रथनकौशलात् ॥ २४२ ॥
(ग-घ)

तासां ग्रन्थगडुत्वेन[1] लक्षणं नोच्यते मया ।
[2]भोजादिग्रन्थबन्धेषु तदाकाङ्क्षिभिरीक्ष्यताम् ॥२४३॥

अथ वृत्तयः—

भारती सात्त्वती चैव कैशिक्यारभटीति च ।
चतस्रो [3]वृत्तयस्तासामुत्पत्तिर्वक्ष्यते स्फुटम् ॥ २४४ ॥
जगत्येकार्णवे[4] जाते भगवानव्ययः पुमान् ।
भोगिभोगमधिष्ठाय योगनिद्रापरोऽभवत् ॥ २४५ ॥
तदा वीर्यमदोन्मत्तौ दैत्येन्द्रौ मधुकैटभौ ।
तरसा देवदेवेशमागतौ रणकाङ्क्षिणौ ॥ २४६ ॥
विविधैः परुषैर्वाक्यैरधिक्षेपविधायिनौ ।
मुष्टिजानुप्रहारैश्च योधयामासतुर्हरिम् ॥ २४७ ॥

[1] *RAS*-2 reads *granthabahutvena*; MS. 5 reads *granthapaṭutvena*; MS. 6 reads *granthakaṭutvena*; *RAS*-1 and MS. 4 read *granthagaḍutvena*. *Gaḍu* is an idiomatic expression in the sense of *granthi* or obstacle. Mammaṭa says: (*yamakaṃ*) *kāvyāntargaḍubhūtam* (BORI edn. Poona, 1965, page 504).

[2] *RAS*-1 reads: *-granthakārais tu*; others read *-granthabandheṣu.*

[3] MSS. 7, 8, 9 and 10 read *catasro vṛttayaḥ proktās tāsām utpattir ucyate*. Others read what is given in the text.

[4] The portion from *jagaty ekārṇave* (I. 245) to *pracakṣate* (I. 260) is not found in MSS. 7, 8, 9 and 10. See also the *Nāṭyaśāstra*, GOS, vol. III, pages 83-90. For a critical account of the *vṛtti-s*, and the narration about the battle of Madhu, Kaiṭabha and Viṣṇu, see V. Raghavan's paper on the *Vṛtti-s*, in the *JOR*, Madras, volumes VI and VII, and the chapter on *Rīti*, *Vṛtti* and *Pravṛtti* in his work on *ŚP*, pp. 189 to 206.

तन्नाभिकमलोत्पन्नः प्रजापतिरभाषत ।
किमेतद् भारतीवृत्तिरधुनापि प्रवर्तते ।। २४८ ।।
तदिमौ नय दुर्धर्षौ निधनं त्वरया विभो ।
इति तस्य वचः श्रुत्वा निजगाद जनार्दनः ।। २४९ ।।
इदं काव्यक्रियाहेतोर्भारती निर्मिता ध्रुवम् ।
भाषणाद् वाक्यबाहुल्याद्[1] भारतीयं भविष्यति ।। २५० ।।
अधुनैव [2]निहन्म्येतावित्याभाष्य वचो हरिः ।
निर्मलैर्निर्विकारैश्च साङ्गहारैर्मनोहरैः ।। २५१ ।।
अङ्गैस्तौ योधयामास दैत्येन्द्रौ युद्धशालिनौ ।
भूमिस्थानकसंयोगैः पदक्षेपैस्तथा[3] हरेः ।। २५२ ।।
भूमेस्तदाभवद् भारस्तद्वशादपि भारती ।
वल्गितैः[4] शार्ङ्गिणस्तत्र दीप्तैः संभ्रमवर्जितैः ।।२५३।।
सत्त्वाधिकैर्बाहुदण्डैः सात्त्वती वृत्तिरुद्गता ।
विचित्रैरङ्गहारैश्च हेलया स तदा हरिः ।। २५४ ।।
यत् तौ बबन्ध केशेषु जाता सा कैशिकी ततः ।
ससंरम्भैः सवेगैश्च [5]चित्रचारीसमुत्थितैः ।। २५५ ।।

[1] *RAS*-1 and MS. 4 read *vākyabahulād*; *RAS*-2 and MSS. 5 & 6 read *vākyabāhulyād*.

[2] *RAS*-1 and MS. 4 read *niṣūdyetām*; *RAS*-2 and MSS. 5 & 6 read *nihanmy etau*.

[3] *RAS*-1 and MS. 4 read *tathā*, and others *tadā*. See *Nāṭyaśāstra*, vol. III, page 86, verses 10 & 11.

[4] *RAS*-2 & MS. 5 read *vividhaiḥ*; MS. 6 reads *vilitaiḥ*; *RAS*-1 and MS. 4 read *valgitaiḥ*.

[5] MS. 4 reads *citracārīsamuddhataiḥ*; *RAS*-2 and MSS. 5 & 6 read *citracārīsamucchritaiḥ; RAS*-1 reads *citracārīsamutthitaiḥ*.

नियुद्धकरणैर्जाता चित्रैरारभटी ततः ।
[1]यस्माच्चित्रैरङ्गहारैः[2] कृतं [3]दानवमर्दनम् ।। २५६ ।।
तस्मादब्जभुवा लोके नियुद्धसमयः[4] कृतः ।
यः शस्त्रास्त्रादिमोक्षेषु न्यायः स परिभाषितः ।।२५७।।
नाट्यकाव्यक्रियायोगे[5] रसभावसमाश्रितः ।
स एव समयो धात्रा वृत्तिरित्येव संज्ञितः ।। २५८ ।।
[6]हरिणा तेन यद् वस्तु वल्गितैर्यादृशं कृतम् ।
तद्वदेव कृता वृत्तिर्धात्रा [7]तस्याङ्गसंभवा ।। २५९ ।।
ऋग्वेदाच्च यजुर्वेदात् सामवेदादथर्वणः ।
भारत्याद्या क्रमाज्जाता [8]इत्यन्ये तु प्रचक्षते
।। २६० ।।

[1] *RAS*-1 and MS. 4 read *tasmāccitraiḥ; RAS*-2 and MSS. 5 & 6 read *yasmāccitraiḥ.*

[2] MSS. 5 & 6 read *amoheṣu*, for *aṅgahāraiḥ* of others.

[3] The portion from *kṛtaṃ dānavamardanam* (256) up to *śastrāstrādimokṣeṣu* (in 257) is missing in *RAS*-2 and MSS. 5 & 6. It is this *mokṣeṣu* that seems to appear as (*a*)*moheṣu* in MSS. 5 & 6 (See the previous note).

[4] *RAS*-1 reads *niyuddhasamayakramaḥ*; MS. 4 reads—*samayaḥ kṛtaḥ*; *NŚ* has *-kramaḥ* (& *śubhaḥ* in footnote). See *Nāṭyaśāstra*, vol. III, page 88, verse 18, etc.

[5] *RAS*-1 and MS. 4 read-*yogarasabhāvasamanvitaḥ*; *RAS*-2 and MSS. 5 & 6 read *-yoge rasabhāvasamāśritaḥ.*

[6] The verse *hariṇā tena*, etc. is missing in *RAS*-2. Others have it.

[7] MSS. 5 & 6 seem to read *ṣāḍyāṅgasaṃbhavā*(?) ; *RAS*-1 and MS. 4 read *tasyāṅgasaṃbhavā.*

[8] See *NŚ*, vol. III, page 90, verse 25. See also *Bhāvaprakāśa*, page 12, lines 4 & 5.

तत्र भारती–

[1]प्रयुक्तत्वेन भरतैर्भारतीति निगद्यते ।
प्रस्तावनोपयोगित्वात् साङ्गं तत्रैव लक्ष्यते ॥ २६१ ॥

अथ सात्त्वती–

सात्त्विकेन [2]गुणेनातित्यागशौर्यादिना युता ।
हर्षप्रधाना संत्यक्तशोकभावा च या भवेत् ॥ २६२ ॥
सात्त्वती नाम सा वृत्तिः प्रोक्ता लक्षणकोविदैः ।
अङ्गान्यस्यास्तु चत्वारि संलापोत्थापकावपि ॥२६३॥
संघात्यः परिवर्तश्चेत्येषां लक्षणमुच्यते ।
ईर्ष्याक्रोधादिभिर्भावै रसैर्वीराद्भुतादिभिः ॥ २६४ ॥
परस्परं गभीरोक्तिः संलाप इति शब्द्यते । (२६५ क-ख)

यथानर्घराघवे, रामः–

बन्दीकृत्य जगद्विजित्वरभुजस्तम्भौघदुःसंचरं
रक्षोराजमपि त्वया विदधता संध्यासमाधिव्रतम् ।
प्रत्यक्षीकृतकार्तवीर्यचरितामुन्मुच्य रेवां समं
सर्वाभिर्महिषीभिरम्बुनिधयो विश्वेऽपि विस्मापिताः ।
(५. ४४)

[1] The *Nāṭyaśāstra* has the following: *yā vākpradhānā puruṣa-prayojyā strīvarjitā saṃskṛtapāṭhyayuktā, svanāmadheyair bharataiḥ prayuktā sā bhāratī nāma bhavet tu vṛttiḥ* (GOS, vol III, page 91).

[2] *RAS*-1 and MS. 4 read —*guṇenāpi tyāga*, etc.; others read—*guṇenātityāga*, etc. The *Nāṭyaśāstra* has the following: *yā sāttvateneha guṇena yuktā tyāgena śauryeṇa samanvitā ca* (footnote reading), *harṣotkaṭā saṃhṛtaśokabhāvā sā sāttvatī nāma bhavet tu vṛttiḥ*. (ibid., page 96.) See also further portion for the definition of *aṅga-s*, etc.

वाली (विहस्य)

चिराय रात्रिचरवीरचक्र-
मारांङ्कवैज्ञानिक पश्यतस्त्वाम् ।
सुधासधर्माणमिमां च वाचं
न शृण्वतस्तृप्यति मानसं मे ।। (५. ४५)

अत्र धीरोदात्तधीरोद्धतयोः रामवालिनोः परस्परं युद्धचिकीर्षाभिप्राययोगाद् अन्योन्यपराक्रमोत्कर्षवर्णनात् संलापः ।

अथोत्थापकः—

प्रेरणं यत् परस्यादौ युद्धायोत्थापकस्तु सः ।। २६५ ।। (ग-घ)

यथानर्घराघवे, रामः—

नृपानप्रत्यक्षान् किमपवदसे नन्वयमहं
शिशुक्रीडाभग्नत्रिपुरहरधन्वा तव पुरः ।
अहंकारक्रूरार्जुनभुजवनव्रश्चनकला-
निसृष्टार्थो बाहुः कथय कतरस्ते प्रहरतु ।। (४. ५३)

अत्र रामभद्रेण प्राक् प्रहाराय जामदग्न्यः प्रेरित इत्युत्थापकः ।

अथ संघात्यः—

मन्त्रशक्त्यार्थशक्त्या वा दैवशक्त्याथ पौरुषात् ।
संघस्य भेदनं यत्तु संघात्यः स उदाहृतः ।। २६६ ।।

मन्त्रो नयप्रयोगः । तस्य शक्त्या यथा मुद्राराक्षसे- चाणक्येन शत्रुसहायानां भेदनात् संघात्यः । अर्थशक्त्या यथा महाभारते आदिपर्वणि देवैस्त्रिलोत्तमालक्षणेनार्थेन सुन्दोपसुन्दयोरतिस्निग्धयोर्भेदनात् संघात्यः ।

दैवशक्त्या यथा महावीरचरिते–माल्यवान्

हा वत्साः खरदूषणप्रभृतयो वध्याः स्थ पापस्य मे
हा हा वत्स विभीषण त्वमपि मे कार्येण हेयः स्थितः।
हा मद्वत्सल वत्स रावण महत् पश्यामि ते संकटं
वत्से केकसि हा हतासि न चिरात् त्रीन् पुत्रकान्
पश्यसि ॥ (४. ११)

अत्र राघवानुकूलदैवमोहितेन माल्यवता खरदूषणत्रिशिरसां भेदः संविहित इति संघात्यः ।

पौरुषाद् यथा–

अथ भूतानि [1]वार्त्रघ्नशरेभ्यस्तत्र तत्रसुः ।
भेजे दिशः परित्यक्तमहेष्वासा च सा चमूः ॥
(किरातार्जुनीये १५. १)

अत्रार्जुनपराक्रमेण प्रमथपलायनकथनात् संघात्यः ।

अथ परिवर्तकः–

पूर्वोद्युक्तस्य[2] कार्यस्य परित्यागेन यद् भवेत् ।
कार्यान्तरस्वीकरणं ज्ञेयः स परिवर्तकः ॥ २६७ ॥

यथोत्तररामचरिते पञ्चमाङ्के, कुमारौ (अन्योन्यं प्रति)–अहो प्रियदर्शनः कुमारः ।

[1] Only *RAS*-1 reads *karṇaghna*; all others read *vārtraghna*, which is also Mallinātha's reading. *vārtraghna* stands for Arjuna (i.e. son of Vṛtrahan=Indra).

[2] Only *RAS*-1 reads *pūrvoktasya ca kāryasya*; all others read *pūrvodyuktasya kāryasya*.

(सस्नेहानुरागं निर्वर्ण्य)

यदृच्छासंवादः किमु गुणगणानामतिशयः
पुराणो वा जन्मान्तरनिबिडबद्धः परिचयः ।
निजो वा संबन्धः किमु विधिवशात् कोऽप्यविदितो
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति ॥

(५. १६)

अत्र लवस्य चन्द्रकेतोश्च परस्पराकारविशेषसंदर्शनेन रणसंरम्भौद्धत्यपरिहारेण विनयार्जवस्वीकारकथनात् परिवर्तकः ।

अथ कैशिकी–

नृत्तगीतविलासादिमृदुशृङ्गारचेष्टितैः ।
समन्विता भवेद् वृत्तिः कैशिकी [1]श्लक्ष्णभूषणा ॥

॥ २६८ ॥

अङ्गान्यस्यास्तु चत्वारि नर्म तत्पूर्वका इमे ।
स्फञ्जस्फोटौ च गर्भश्च तेषां लक्षणमुच्यते ॥ २६९ ॥

तत्र नर्म–

शृङ्गाररसभूयिष्ठः प्रियचित्तानुरञ्जकः ।
अग्राम्यः परिहासस्तु नर्म स्यात् तत् त्रिधा मतम्

॥ २७० ॥

शृङ्गारहास्यजं शुद्धहास्यजं भयहास्यजम् ।
शृङ्गारहास्यजं नर्म त्रिविधं परिकीर्तितम् ॥ २७१ ॥

[1] See the following in the *Nāṭyaśāstra*, vol. III, page 100 (verse 53): *yā ślakṣṇanaipathyaviśeṣacitrā strīsaṃyutā yā bahunṛttagītā kāmopabhogaprabhavopacārā tāṃ kaiśikīṃ vṛttim udāharanti.*

संभोगेच्छाप्रकटनादनुरागनिवेदनात् ।
तथा कृतापराधस्य प्रियस्य [1]प्रतिभेदनात् ।। २७२ ।।
संभोगेच्छाप्रकटनं त्रिधा वाग्वेषचेष्टितैः

(२७३ क-ख)

तत्र वाचा संभोगेच्छाप्रकटनाद् यथा–

गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते
किं त्वेवं विजनस्थयोर्हतजनः संभावयत्यन्यथा ।
इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-
माश्लिष्यन् पुलकोत्कराञ्चिततनुर्गोपीं हरिः
पातु वः ।।

(काव्यप्रकाशादिष्वप्युद्धृतम्)

अत्र निजावस्थानविलम्बनस्य व्यर्थत्वं धीरत्वादिसूचकैरच्युतादिपदैर्वदन्त्या तयापि गोपिकया वाचा संभोगेच्छा प्रकटितेति नर्म ।

वेषेण संभोगेच्छाप्रकटनाद् यथा–

अभ्युद्गते शशिनि पेशलकान्तदूती-
संलापसंवलितलोचनमानसाभिः ।
अग्राहि मण्डनविधिर्विपरीतभूषा-
विन्यासहासितसखीजनमङ्गनाभिः ।।

अत्र विपरीतन्यस्तभूषणलक्षणेन[2] वेषेण जनितैः सखीजनहासैः कामिनीनां संभोगेच्छा प्रकटितेति नर्म ।

[1] *RAS*-2 and MSS. 5 & 6 read *paribhedanāt*; others read *pratibhedanāt*.

[2] Only *RAS*-1 reads: *viparītanyastalakṣaṇabhūṣaṇena*; others read what is given in the text.

चेष्टया संभोगेच्छाप्रकटनाद् यथा–

[1]सालोएं चिअ सूरे घरिणी घरसामिअस्स घेत्तूण ।
णेच्छं तस्स वि पाए धुवइ हसंती हसंतस्स ।।

(गाथासप्तशती २. ३०)

(छाया–

सालोक एव सूर्ये गृहिणी गृहस्वामिनो गृहीत्वा ।
नेच्छतोऽपि पादौ धावति हसन्ती हसतः ।।)

अत्र सूर्यास्तमयात् प्रागेव चरणप्रक्षालनलक्षणया क्रियया निष्क्रमणनिवारणजनितेन हासेन संभोगेच्छाप्रकटनान्नर्म ।

अनुरागप्रकाशोऽपि भोगेच्छानर्मवत् त्रिधा ।। २७३ ।।

(ग-घ)

वाचानुरागनिवेदनाद् यथा–

वयं तथा नाम यथात्थ किं वदा-
म्ययं त्वकस्माद् [2]विकलः कथान्तरे ।
कदम्बगोलाकृतिमाश्रितः कथं
विशुद्धमुग्धः कुलकन्यकाजनः ।।

(मालतीमाधवे ७. १)

अत्र लवङ्गिकया विशुद्धमुग्धः कुलकन्यकाजन इति परिहासेन मदयन्तिकानुरागनिवेदनान्नर्म ।

[1] *RAS*-1 reads *āloaccia* and *calaṇe* (for *pāe*), and the *chāyā* as *āloka eva* and *caraṇau*.

[2] *RAS*-1 and MS. 4 read *kaluṣaḥ*, and the former gives *vikalaḥ* in the footnote.

वेषेणानुरागनिवेदनाद् यथा—

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः ।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः ।
(रत्नावल्याम् १. २)

अत्र पुलकसंरोहलक्षणवेषजनितेन शिवस्य हसनेन गौरीहृदयानुरागस्य प्रकाशनान्नर्म ।

चेष्टयानुरागनिवेदनाद् यथा—

कैतवेन शयिते कुतूहलात् पार्वती प्रतिमुखं निपातितम् ।
चक्षुरुन्मिषति सस्मितं प्रिये विद्युदाहतमिव न्यमीलयत् ।।
(कुमार. ८. ३)

अत्र पतिमुखदर्शनक्रियाजनितेन शिवस्य हासेन गौरीहृदयानुरागनिवेदनान्नर्म ।

प्रियापराधनिर्भेदोऽप्युक्तस्त्रेधा तथा बुधैः ।
(२७४ क-ख)

वाचा प्रियापराधनिर्भेदाद् यथा—

मालविकाग्निमित्रे प्रथमाङ्के-(अन्ते)

देवी—(राजानं विलोक्य सस्मितम्)

जइ राअकज्जेसु ईरिसी णिउणदा अय्यउत्तस्स तदा सोहणं हवे ।

(छाया—यदि राजकार्येष्वीदृशी निपुणतार्यपुत्रस्य तदा शोभनं भवेत् ।)

अत्र ईदृशी निपुणता यदीति चतुरोक्तिपरिहासेन त्वयैव मालविकादर्शनेन नाट्याचार्ययोर्विवादः संविहित इति प्रियापराधोद्घाटनान्नर्म ।

वेषेण प्रियापराधनिर्भेदनाद् यथा–

आलेपः क्रियतामयं द्रुतगतिस्वेदैरिवार्द्रं वपु-
स्तन्माल्यं व्यपनीयतां रविकरस्पर्शैरिवामर्दितम् ।
इत्युक्तान्यतिधीरया दयितया स्मेराननाम्भोरुहं
चाटूक्तानि भवन्ति हन्त कृतिनां मोदाय भोगादपि ।।

अत्र स्वेदोद्गममाल्यम्लानत्वयो[1]र्द्रुतगमनरविकरस्पर्शरूपकारणासत्यत्वकथनरूपेण परिहसनेन सपत्नीसंभोगरूपप्रियापराधनिर्भेदनान्नर्म ।

चेष्टया प्रियापराधनिर्भेदाद् यथा–

[2]लोलभ्रूलतया विपक्षदिगुपन्यासे विधूतं शिर-
स्तद्वृत्तान्तविदीक्षणे कृतनमस्कारो विलक्षः स्थितः ।
ईषत्ताम्रकपोलकान्तिनि मुखे दृष्टया नतः पादयो-
रुत्सृष्टो गुरुसंनिधावपि विधिर्द्वाभ्यां न कालोचितः ।।

(अमरुकस्य ६९-वेमभूपालव्याख्यारीत्या)

[1] *RAS*-2 and MSS. 4, 5 & 6 read *dūragamanakharakiraṇakarasparśa*, etc. and *pratibhedāt* (for *nirbhedanāt*); I have retained the *RAS*-1 reading as it was based on 6 MSS., and as there is no substantial difference in the meaning.

[2] In the NSP edn. this verse is 83, and according to the *Śṛṅgāradīpikā* of Vemabhūpāla it is 69. The *Śṛṅgāradīpikā* notes on this verse thus: *atra ceṣṭākṛtam īrṣyākrodhaprāyaṃ narma* (POS 101, 1959).

अत्र विलक्षस्थितिशिरोधूननचेष्टया प्रियापराधनिर्भेदनान्नर्म ।

शुद्धहास्यजमप्युक्तं तद्वदेव त्रिधा बुधैः ।। २७४ ।।

(ग-घ)

तत्र वाचा शुद्धहास्यजं यथा–

अर्चिष्मन्ति विदार्य वक्त्रकुहराण्या सृक्वतो वासुके-
स्तर्जन्या विषकर्बुरान् गणयतः संस्पृश्य
दन्ताङ्कुरान् ।
एकं त्रीणि नवाष्ट सप्त षडिति प्रध्वस्तसंख्याक्रमा
वाचः क्रौञ्चरिपोः शिशुत्वविकलाः श्रेयांसि
पुष्णन्तु वः ।।

(दशरुपावलोकेऽप्युद्धृतमिदम्–बाणस्येति सूक्तिमुक्तावलौ)

वेषेण शुद्धहास्यजं यथा–

[1]स्नायुन्यासनिबद्धकीकसतनुं नृत्यन्तमालोक्य मां
चामुण्डाकरतालकुट्टितलयं वृत्ते विवाहोत्सवे ।
ह्रीमुद्रामपनुद्य यद् विहसितं देव्या समं शंभुना
तेनाद्यापि मयि प्रभुः स जगतामास्ते प्रसादोन्मुखः ।

(बालरामायणे २. १)

अत्र भृङ्गिरिटिवेषेण शिवयोर्हसिताविर्भावाच्छुद्धहास्यजम् ।

चेष्टया शुद्धहास्यजं यथा–

देव्या लीलालपितमधुरं लास्यमुल्लासयन्त्या
यः शृङ्गारो रहसि पुरतः पत्युराविष्कृतोऽभूत् ।

[1] Only *RAS*-2 reads *snāyuprāya*, etc.; others read *snāyunyāsa*, etc.

युष्मानव्यात् तदुपजनितं [1]हास्यमम्बानुकारी
क्रीडानृत्तैर्विकटगतिभिर्व्यञ्जयन् कुञ्जरास्यः ।।

अथ भयहास्यजम्–

हास्याद् भयेन[2] जनिताज्जनितं भयहास्यजम् ।
तद् द्विधा मुख्यमङ्गं च तद् द्वयं पूर्ववत् त्रिधा ।। २७५ ।।

मुख्यं भयहास्यजं यथा–

क्षेत्राधीशशुना नवेन विकृताकारैकविद्वेषिणा
घोरारावमभिद्रुतस्य विकटैः पश्चात् पदैर्गच्छतः ।
पा पा पाहि [3]पहीति सत्वरतरं व्यस्ताक्षरं जल्पतो
दृष्ट्वा भृङ्गिरिटेर्दशां पशुपतिः स्मेराननः पातु वः ।।

अत्र भृङ्गिरिटेर्विकृताकारेण विकटपश्चाद्गमनेन पाहि पाहि पाहीत्यत्र [4]वर्णव्यत्यासभाषणेन जनितस्य पशुपतिहासस्यान्यरसानङ्गतया मुख्यं भयहास्यजम् ।

वाचा अन्यरसाङ्गं भयहास्यजं यथा (रत्नावल्याम्)–

विदूषकः–कहं ण किदो पसादो देवीए ज अज्जं विअक्खदसरीरा चिट्ठह्म । (तृतीयाङ्के १४ पद्यादनन्तरम्)

[1] MS. 4 reads clearly: *hāsyam ambānukārakrīdā*, etc. *RAS*-1 reads *-ambānukārī krīḍā*, etc. *RAS*-2, MSS. 5 & 6 read *hāsyamāyānukārī*.

[2] MSS. 8 & 9 read *bhayena sambhūtāt*; *RAS*-2 and MSS. 5 & 6 read *bhayena janitāt*; *RAS*-1 and MSS. 4, 7 and 10 read *bhayena sahitāt*.

[3] *RAS*-1 and MSS. 4 & 6 read *pā pā pā hi hi hīti*; *RAS*-2 and MS. 5 read *pā pā pāhi pahīti*.

[4] *RAS*-1 reads *varṇatrayavyatyāsena bhāṣaṇena ca*; MS. 4 reads *varṇavyatyastasambhāvanena*; (this is also given in *RAS*-1 in the footnote, without mentioning the source; there are several cases like this). *RAS*-2 and MSS. 5 & 6 read what is given in the text.

(छाया—कथं न कृतः प्रसादो देव्या यदद्याप्यक्षतशरीरास्तिष्ठामः)

राजा—(सस्मितम्) धिङ् मूर्ख। किमेवमुपहससि। त्वत्कृत एवायमापतितोऽस्माकम् अनर्थक्रमः।

इत्यादौ विदूषकवाक्यजनितस्य भयहास्यस्य शृङ्गाराङ्गतया कथितत्वाद् इदमङ्गं भयहास्यजम्।

वेषेण यथा—

कल्याणदायि भवतोऽस्तु [1]पिनाकपाणि-
पाणिग्रहे भुजगकङ्कणभीषितायाः।
संभ्रान्तदृष्टि सहसैव नमः शिवायेत्य-
र्धोक्तिसस्मितनतं[2] मुखमम्बिकायाः॥

(रसकलिकायामप्युद्धृतमिदम्—२३ पुटे)

अत्र भुजगकङ्कणलक्षणेन वेषेण जनितस्य पार्वतीभयहास्यस्य शृङ्गाराङ्गतया कथनात् तदिदमङ्गं भयहास्यजम्।

चेष्टया यथा—

प्रह्लादवत्सल वयं बिभिमो विहारा-
दस्मादिति ध्वनितनर्मसु गोपिकासु।
लीलामृदु स्तनतटेषु नखाङ्कुराणि
व्यापारयन्नवतु [3]मन्मनृपं मुकुन्दः॥

[1] Only MS. 4 reads *vināyakasya pāṇigrahe*; this is obviously wrong, because Vināyaka is said not to have married and also because by that time Pārvatī must have been much familiar with *bhujagakaṅkaṇa* of Śiva.

[2] *RAS*-2 and MSS. 5 & 6 read: *sasmitanamanmukham*; *RAS*-1, MS. 4 and the *Rasakalikā* quotation have *sasmitanatam*.

[3] *RAS*-1 reads *mammanṛpam*; *RAS*-2 reads *mannanṛpam*; MSS. 5 & 6 read *mammanṛpam*; MS. 4 reads *manmathavan mukundaḥ*.

अत्र नखाङ्कुरव्यापारेण जनितस्य गोपिकाहसितस्य प्रह्लाद-वत्सलेति चतुरोक्तिरूपस्य शृङ्गाराङ्गतया[1] तदिदमङ्गं भयहास्यजम् ।

अग्राम्यनर्मनिर्माणवेदिना सिंहभूभुजा ।
नर्माष्टादशधा भिन्नमेवं स्फुटमुदाहृतम् ।। २७६ ।।

अथ नर्मस्फञ्जः[2]–

नर्मस्फञ्जः सुखोद्योगो भयान्तो नवसंगमे ।
(२७७ क-ख)

यथा–

अपेतव्याहारं धुतविविधशिल्पव्यतिकरं
करस्पर्शारम्भप्रकलितदुकूलान्तशयनम् ।
मुहुर्बद्धोत्कम्पं दिशि दिशि मुहुः प्रेरितदृशो-
रहल्यासुत्राम्णोः क्षणिकमिव तत् संगतमभूत् ।।
(सरस्वतीकण्ठाभरणेऽप्युद्धृतमिदम्)

अथ नर्मस्फोटः–

नर्मस्फोटस्तु भावांशैः सूचितोऽल्परसो[3] भवेत्
।। २७७ ।। (ग-घ)

[1] *RAS*-1 and MS. 4 read *aṅgatayā bhayahāsyajatvam*; *RAS*-2 and MSS. 5 & 6 read as given in the text.

[2] The *Daśarūpaka* reads it as *narmasphiñja*; see also the *Avaloka* with *LT* on II. 48, 49 & 50 (p. 123) for the *aṅga-s* of the *kaiśikī*. The *NŚ* has the readings *sphañja* and *sphuñja*; Abhinavagupta seems to read *sphuñja* and he explains it as *narmaṇaḥ sphuñjo=vighna ity arthaḥ* (Vol. III, page 101).

[3] The *NŚ* has the following: *vividhānāṃ bhāvānāṃ lavair lavair bhūṣito bahuviśeṣaiḥ, asamagrākṣiptaraso narmasphoṭas tu vijñeyaḥ.* (ibid., p. 102) In this context Abhinava comments thus: *narmaṇa iti tadupalakṣitasya śṛṅgārasya sphoṭo=vaicitryaṃ camatkārollāsakṛta-sphuṭatvaṃ yatreti.*

[1]अन्यैस्त्वकाण्डे संभोगविच्छेद इति गीयते ।

(२७८ क-ख)

आद्यो यथा–

स्निग्धं वीक्षितमन्यतोऽपि नयने यत् प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव ।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत् किल मत्परायणमहो कामी स्वतां पश्यति ।।

(अभिज्ञानशाकुन्तले २. २)

अत्र सर्वं तत् किलेत्यनिश्चयेनानुरागस्य स्वल्पमात्रसूचनया नर्मस्फोटत्वम् ।

द्वितीयो यथा (रत्नावल्याम्)–

प्राप्ता कथमपि दैवात् कण्ठमनीतैव सा प्रकटरागा ।
रत्नावलीव कान्ता मम हस्ताद् भ्रंशिता भवता ।।

(२. १८)

अत्र विदूषकवाक्यसूचितदेवीशङ्काविसृष्टसागरिकाहस्तेन राज्ञा अकाण्डे त्वया संभोगभङ्गः कृत इत्युक्तत्वात् नर्मस्फोटः ।

अथ नर्मगर्भः–

नेतुर्वा नायिकाया वा व्यापारः स्वार्थसिद्धये ।।२७८।।

(ग-घ)

[1] This *anyaiḥ* seems to be a reference to Bhoja. In the *Śṛṅgāraprakāśa*, we have the following: *āvirbhūtābhilāṣānubhāvabhāvayor akāṇḍasambhogabhaṅgo narmasphoṭaḥ* (Mysore edn., vol. III, page 685). Similar statement appears in the *Sarasvatīkaṇṭhābharaṇa* too (See *SKĀ*, page 646).

[1] **प्रच्छादनपरो यस्तु नर्मगर्भः स कीर्तितः ।**

(२७९ क-ख)

यथा–

श्रियो मानग्लानेरनुशयविकल्पैः स्मितमुखे
सखीवर्गे गूढं कृतवसतिरुत्थाय सहसा ।
समानेष्ये धूर्तं तमहमिति जल्पन् नतमुखीं
प्रियां तामालिङ्गन् हरिररतिखेदं हरतु वः ।।

अत्र कुपितायाः श्रियः प्रसादनार्थं पुरुषोत्तमेन प्रच्छन्नस्थित्यादिरूपो व्यापारः कृत इत्ययं नर्मगर्भः ।

[2] **पूर्वस्थितो विपद्येत नायको यत्र चापरस्तिष्ठेत्**

।। २७९ ।। (ग-घ)

तमपीह नर्मगर्भं प्रवदति भरतो हि नाट्यवेदगुरुः ।

(२८० क-ख)

यथा–

मयेन निर्मितां लङ्कां लब्ध्वा मन्दोदरीमपि ।
रेमे मूर्तां दशग्रीवलक्ष्मीमिव विभीषणः ।।

(सरस्वतीकण्ठाभरणेऽप्युद्धृतमिदम्)

[1] See *NŚ*, vol. III, page 102 (verse 61) and Abhinava's commentary thereon.

[2] The portion from *pūrvasthito*, etc. to *-guruḥ* (& the following to *mūlaṃ na jānīmaḥ*) is not found in MSS. 7, 8, 9 and 10. Others have it. The GOS edn. of the *NŚ* (vol. III, p. 102) has within brackets the following: *pūrvasthito vipadyeta nāyako yatra cāparas tiṣṭhet, tam apīha narmagarbhaṃ vidyān nāṭyaprayogeṣu.* (*pūrvasthito* is the footnote reading.) This verse does not seem to be commented

अत्र रावणे विपन्ने तत्पदाभिषिक्तेन विभीषणेन मन्दोदर्यादिषु तदुचितं कर्म निर्मितमित्ययं नर्मगर्भः ।

केचित्त्वेतदारभटीभेदं संक्षिप्तमाहुः[1] । तत्र मूलं न जानीमः[2] ।

अथारभटी–

[3]मायेन्द्रजालप्रचुरां चित्रयुद्धक्रियामयीम् । २८० (ग-घ)
[4]छेद्यैर्भेद्यैः प्लुतैर्युक्तां वृत्तिमारभटीं विदुः ।
अङ्गान्यस्यास्तु चत्वारि संक्षिप्तिरवपातनम् ॥ २८१ ॥
वस्तूत्थापनसंफेटाविति पूर्वे [5]बभाषिरे ।
(२८२ क-ख)

on by Abhinava. See the Kasi edn. of the *NŚ*, XXII, 54, which has a slightly different reading. This seems to indicate that the recension known to Siṃhabhūpāla was perhaps different from the one known to Abhinavagupta.

[1] This seems to be a reference to the view mentioned by Dhanaṃjaya and Dhanika. See the *DR* and *DRA*, II. 58 (ab) with the *LṬ* thereon (p. 129). Dhanika gives two examples, and Bhaṭṭanṛsiṃha explains that one is the case of *Dharmibheda* and the other is of *bhinnadharma-s* in the same *Dharmin*. See also fn. 2, p. 127.

[2] See fn. 2, p. 125.

[3] *RAS*-2 and MSS. 5 & 6 read *mahendrajālapracurām*; others read *māyendrajāla*, etc.

[4] *RAS*-2 and MSS. 5 & 6 read *vidhyaiḥ* for *chedyaiḥ* of others.

[5] The *NŚ* has *saṃkṣiptakāvapātau vastūtthāpanam athāpi saṃpheṭaḥ* (vol. III, page 103). Also see verse 64 on the same page.

तत्र संक्षिप्तिः–

संक्षिप्तवस्तुविषया या[1]मायाशिल्पयोजिता ॥२८२॥
(ग-घ)

सा संक्षिप्तिरिति प्रोक्ता भरतेन महात्मना ।
(२८३ क-ख)

यथानर्घराघवे–

नीतो दूरं कनकहरिणच्छद्मना रामभद्रः
पश्चादेनं द्रुतमनुसरत्येष वत्सः कनिष्ठः ।
बिभ्यद् बिभ्यत् प्रविशति ततः पर्णशालां च भिक्षु-
र्धिग् धिक् कष्टं प्रथयति निजामाकृतिं रावणोऽयम् ॥
(५. ७)

अत्र बहुविधानां मायानां संक्षेपेण कथनात् संक्षिप्तिः ।

वदन्त्यन्ये तु तां [2]नेतुरवस्थान्तरसंगतिम् ॥ २८३ ॥
(ग-घ)

यथा–

यदर्थमस्माभिरसि प्रकोपित-
स्तदद्य दृष्ट्वा तव धाम वैष्णवम् ।
विशीर्णगर्वामियमस्मदान्तरं
चिरस्य कंचिल्लघिमानमश्नुते ॥ (अ. रा. ४. ५६)

अत्र रामभद्रसहवासेन परिहृतधीरोद्धतविकारस्य जामदग्न्यस्य धीरशान्तावस्थापरिग्रहात् संक्षिप्तिरिति ।

[1] *RAS*-2 reads *māyā yā śilpa*, etc.; MSS. 5 & 6 seem to read *māyayā*, etc.

[2] See Dhanika on *DR*, II. 58 (ab) and *LṬ* thereon. See also fn. 1, p. 126.

परिवर्तकभेदत्वात्[1] तदुपेक्षामहे वयम् ।

अथावपातनम्–

विभ्रान्तिरवपातः स्यात् प्रवेशद्रावविद्रवैः ।। २८४ ।।

यथा–

हत्वा शन्तनुनन्दनस्य तुरगान् सूतं कुरूणां गुरो-
शिछत्वा द्रोणसुतस्य कार्मुकलतां कृत्वा विसंज्ञं कृपम्।
कर्णस्यापि रथं विदार्य कणशो विद्राव्य चान्यद् बलं
त्वत्पुत्रो भयविद्रवत्कुरुपतेः पन्थानमन्वेत्ययम् ।।
(धनंजयविजये-६७)

अत्र कुरुबलानां भयविभ्रान्तिकथनादवपातनम् ।

अथ वस्तूत्थापनम्–

तद् वस्तूत्थापनं यत् तु वस्तु मायोपकल्पितम् ।
(२८५ क-ख)

यथा–

मायाचुञ्चुरथेन्द्रजिद् रणमुखे खड्गेन दीनाननां
सौमित्रे द्रुतमार्यपुत्र चकितां मां पाहि पाहीति च ।

[1] See the previous note. Siṃhabhūpāla seems to be noting here the difference of his opinion from that of Dhanika. See the *RAS*-I, 267, for the *parivartaka*, one of the *aṅga-s* of the *Sāttvatīvṛtti*. Dhanika perhaps means a difference between the *kāryāntarakaraṇecchā* (of *parivartaka*) and the *avasthābheda* (of *saṃkṣipti*). According to Dhanika, the example *yardṛcchāsaṃvādaḥ*, etc. (given by Siṃhabhūpāla for *parivartaka*, I. 267) would be an illustration of *saṃkṣipti*. Bhaṭṭanṛsiṃha is not trying to answer the point of difference noted by Siṃhabhūpāla. The wording in Bhaṭṭanṛsiṃha's commentary too is not similar to the lines of Siṃhabhūpala. Perhaps Bhaṭṭanṛsiṃha was earlier than Siṃhabhūpala. See also my Introduction to the *Daśarūpaka*.

क्रोशन्तीं व्यथिताशयां हनुमता मा मेति संतर्जितः
कण्ठे कैतवमैथिलीं कुपितधीश्छिच्छेद तुच्छाशयः ।।

अत्र निकुम्भिलायामभिचारं चिकीर्षुणा इन्द्रजिता राघवादिबुद्धिप्रमोषणार्थं मायाकल्पितमैथिलीकण्ठखण्डनं कृतमिति वस्तूत्थापनम् ।

अथ संफेटः–

संफेटस्तु समाघातः [1]क्रुद्धसंरब्धयोर्द्वयोः ।। २८५ ।।

(ग-घ)

यथा–

अन्योन्यसूतोन्मथनादभूतां
तावेव सूतौ रथिनौ च कौचित् ।
व्यश्वौ गदाव्यायतसंप्रहारौ
भग्नायुधौ बाहुविमर्दनिष्ठौ ।। (रघु. ७. ५२)

आसां च मध्ये वृत्तीनां शब्दवृत्तिस्तु भारती ।
तिस्रोऽर्थवृत्तयः शेषास्तच्चतस्रो हि वृत्तयः ।। २८६ ।।
अन्ये[2] तु मिश्रणादासां मिश्रां वृत्तिं च पञ्चमीम् ।
अशेषरससामान्यां मन्यन्ते लक्षयन्ति च ।। २८७ ।।

यथा[3]–

यत्रारभट्यादिगणाः समस्ता
मिश्रत्वमाश्रित्य मिथः प्रथन्ते ।

[1] See also the *DR*, II. 58, and Bhaṭṭanṛsiṃha's comments in this context.

[2] *RAS*-2 and MSS. 5 & 6 read *anye'pi miśraṇāt*; *RAS*-1 reads *anyonyamiśraṇāt* and gives a footnote reading as *anye vi-*; MSS. 4, 7, 8, 9 and 10 read clearly *anye tu miśraṇāt*.

[3] The verses (and the comments) in the portion from *yathā—yatrārabhaṭyādi*, etc. to *iti niyamaḥ pratīyate* (p. 132, line 5) are not found in MSS. 7, 8, 9 and 10.

मिश्रेति तां वृत्तिमुशन्ति धीराः
साधारणीमर्थचतुष्टयस्य[1] ॥
(शृङ्गारप्रकाशे १२. ४८६ पुटे)

इति ।

तन्न [2]विचारसहम् । कुतः । तत् किं वृत्तिधर्माणां मिश्रणमैक्यरूपेण न्यूनाधिकभावेन वा । न प्रथमः अवैषम्येण मिश्रणाभावात् । तथा[3] मिश्रणे तु मिश्रवृत्तिव्यङ्ग्यो रसोऽपि मिश्रो न्यूनाधिकः प्रसज्येत । [4]वृत्तीनां च रसविशेषनियमस्य वक्ष्यमाणत्वात् । ननु मिश्रा वृत्तिः सर्वरससाधारणीति चेत्, न । [5]भारत्या वृत्त्या अपहृतविषयत्वात् । मूलप्रमाणाभावेन स्वोक्तिमात्रत्वाच्च । नापि द्वितीयः । वैषम्येण वृत्तिगुणानां मिश्रणे यत्र यद्वृत्तिप्रत्यभिज्ञाहेतुभूता बहवो गुणा लक्ष्यन्ते तत्र सैव वृत्तिरिति निश्चयात् । ननु तत्र [6]प्रकरणादिवशेन रसविशेषव्यक्तिरिति चेत् तर्हि प्रस्तुतरसानुरोधेनैव वृत्तिविशेष-निर्धारणमप्यङ्गीकर्तव्यमेव । तथा च भरतः—

[1] *RAS*-1 and MS. 4 read *sādhāraṇāṁ vṛtticatuṣṭayasya*; *RAS*-2 and MSS. 5 & 6 read *sādhāraṇīm arthacatuṣṭayasya*, which is also the reading in the Mysore edn. of the *ŚP* (p.486).

[2] This is the criticism of Bhoja's view contained in the verse quoted from the *ŚP*. For a critical account of the *vṛtti-s*, see V. Raghavan's paper in the JOR, Madras, volume VII, and his work on *ŚP*, pp. 194, etc. MS. 4 reads *tan na vicārakṛtam*; others read as given in the text.

[3] The sentence *tathā miśraṇe tu*, etc. is missing in *RAS*-2.

[4] The sentence *vṛttīnām*, etc. is missing in *RAS*-2.

[5] *RAS*-1 reads *bhāratīprabhṛtīnāṃ niyataviṣayatvāt*; others read *bhāratyā vṛttyā apahṛtaviṣayatvāt.*

[6] MS. 4 has some illegible expressions and a gap of some syllables here. It seems to read: *nanu tatra prakaraṇād vā rasena vā. prakaraṇādivanna* (?) *rasaviśeṣavyaktir iti cet*; it is difficult to make out any meaning. *RAS*-1, *RAS*-2 and MSS. 5 & 6 read as given in the text.

भावो [1]वापि रसो वापि प्रवृत्तिर्वृत्तिरेव वा ।
सर्वेषां समवेतानां रूपं यस्य भवेद् बहु ।।
स मन्तव्यो रसः स्थायी शेषाः संचारिणो मताः ।
(नाटचशास्त्रे १, ३७६ पुटे)

इति[2] ।

अथैतासां [3]रसनियमः–

कैशिकी स्यात्तु शृङ्गारे रसे वीरे तु सात्त्वती ।
रौद्रबीभत्सयोर्वृत्तिर्नियतारभटी पुनः ।। २८८ ।।

[1] See the *NŚ*, vol. I, GOS, 1958, page 379; see also volume III, page 106. The statement . . . . *rūpaṃ yasya bhaved bahu, sa mantavyo rasaḥ sthāyī śeṣāḥ saṃcāriṇo matāḥ*, conveys that the *bhāva*, which is well developed, and is thus presented with a description of necessary causes conducive to *rasa*-realization, is the major one, i.e. the *sthāyin* and is capable of becoming *rasa*, and the other *bhāva-s* are subservient thereto (i.e. *saṃcārin-s*). These lines are perhaps quoted by Siṃhabhūpāla to corroborate his point: *yatra yadvṛttipratyabhijñāhetubhūtā bahavo guṇā lakṣyante tatra saiva vṛttir iti niścīyate.*

[2] After this quotation from the *NŚ*, *bhāvo vāpi* to *saṃcāriṇo matāḥ*, *RAS*-1 and MS. 4 give the sentences beginning with *etacca śṛṅgāragrahaṇam*, etc. and ending with *ārabhaṭīti niyamaḥ pratīyate*. This does not at all seem to be correct, as there is no expression of *śṛṅgāra* in the three preceding lines quoted. *RAS*-2 and MSS. 5 & 6, on the other hand, introduce correctly the lines assigning different *vṛtti-s* (*kaiśikī*, etc.) to different *rasa-s* (i.e. the lines; *kaiśikī syāttu śṛṅgāre rase vīre tu sāttvatī*, ... *iṣṭaiva bhāratī*.). After giving these lines *kaiśikī syāt tu*, etc., the portion *etacca śṛṅgāragrahaṇam*, etc. is found (corretly) in these MSS, i.e. *RAS*-2 and MSS. 5 & 6. *RAS*-3 simply reproduces the incorrect readings from the *RAS*-1. The reader can see the portion as presented in this edition, compare with the previous ones, and note the difference.

[3] *RAS*-2 and MSS. 5 & 6 read one '*na*' here (as *na rasaniyamaḥ*), which is obviously wrong. *RAS*-1 and MS. 4 read the expression *athaitāsāṃ rasaniyamaḥ* only later on, instead of here, which is wrong. The expression should be read here to introduce the verses *kaiśikī syāt tu*, etc., as found in *RAS*-2 and MSS. 5 & 6.

शृङ्गारादिषु सर्वेषु रसेष्विष्टैव [1]भारती ।

(२८९ क-ख)

एतच्च शृङ्गारादिग्रहणं तज्जन्यानां हास्यादीनामप्युपलक्षणम्[2] । अतश्च शृङ्गारहास्ययोः कैशिकी । वीराद्भुतयोः सात्त्वती । रौद्र-[3]करुणयोर्बीभत्सभयानकयोश्च आरभटीति नियमः प्रतीयते । तथा च [4]भरतः–

शृङ्गारं चैव हास्यं च वृत्तिः स्यात् कैशिकी [5]श्रिता ।
सात्त्वती नाम विज्ञेया रौद्रवीराद्भुताश्रया ।।
भयानके च बीभत्से रौद्रे चारभटी भवेत् ।
भारती चापि विज्ञेया करुणाद्भुतसंश्रया[6] ।।

(ना. शा. २०. ७३- ७४ पादटीकापाठा द्रष्टव्याः)

[1] See *NŚ*, vol. III, pp. 105 & 106. Several readings given in the footnote there seem to agree with the *RAS*. See also the *Daśarūpaka* II. 62, page 131, and my note 198-b to the *Daśarūpāvaloka*. Mallinātha quotes these lines *kaiśikī syāt tu*, etc. in his commentary on the *Kūmārasaṃbhava*, VII. 91, with the expression *tad uktaṃ bhūpālena* and with the reading of *bhāvajñaiḥ* instead of *sarveṣu*.

[2] *RAS*-1 and MS. 4 read *upalakṣaṇārtham* for *upalakṣaṇam* of others.

[3] *RAS*-1 and MS. 4 have *raudrabībhatsabhayānakānāṃ cārabhaṭīti*; *RAS*-2 reads: *adbhutakaruṇayor bhāratī, bībhatsabhayānakayor ārabhaṭīti*. MSS. 5 & 6 clearly have what is given in the text. This agrees with the statement *śṛṅgārādigrahaṇaṃ hāsyādīnām upalakṣaṇam* and with the *Daśarūpaka* II. 62. See also note 1 above.

[4] See note 3 on the verse *yatrārabhaṭyādi*, etc., p. 129.

[5] Only *RAS*-1 reads *matā*, instead of *śritā* of others.

[6] See the *NŚ*, vol. III, pp. 105 & 106. Readings given in the footnotes there agree with the lines quoted here. See the comments of Siṃhabhūpāla which follow these.

अत्र सात्त्वत्या रौद्रानुप्रवेशकथनं रौद्रप्रतिभटस्य युद्धवीरस्यैव संलापादिभिः सात्त्वतीभेदैः परिपोषणं न तु [1]दानवीरदयावीरयोरिति ज्ञापनार्थम् । तस्मान्न नियमविरोधः । भारत्याश्च करुणाद्भुत-विषयत्वकथनं तयोः प्रायेण वागारम्भमुखेन परिपोष इति ज्ञापनार्थम् । तेन भारत्याः सर्वरससाधारण्यमुपपन्नमेव ।

[2]केचित्तु तमिमं श्लोकं भारतीयं नियामकम् ॥२८९॥

(ग-घ)

प्रायिकाभिप्रायतया व्याचक्षाणा विचक्षणाः ।
आसां रसेषु वृत्तीनां नियमं नानुमन्वते ॥ २९० ॥

तथा च [3]कैशिकीत्यनुवृत्तौ रुद्रटः–

शृङ्गारहास्यकरुणरसातिशयसिद्धये ।
एषा वृत्तिः प्रयत्नेन प्रयोज्या [4]रसकोविदैः ॥

(शृङ्गारतिलके ३. ५४)

इति ।

विचारसुन्दरो नैष मार्गः स्यादित्युदास्महे ।
कैशिकीवृत्तिभेदानां नर्मादीनां प्रकल्पनम् ॥ २९१ ॥

[1] Only MS. 4 reads: *na tūdāsīnadānavīradayāvīrarasayor iti*, etc.

[2] The *kārikā-s* from *kecit tu tam imam*, etc. (289 *ga-gha* above) and the comments preceding this up to *vakṣyate tad idam sphuṭam* (292, p. 134) are missing in MSS. 7, 8, 9 and 10.

[3] *RAS*-1 and MS. 4 here, after *tathā ca* (instead of *kaiśikīty anuvṛttau rudraṭaḥ*, etc.) read: *sa mantavyo rasaḥ sthāyī śeṣāḥ saṃcāriṇo matāḥ* which is obviously wrong. The correct reading is found in *RAS*-2 and MSS. 5 & 6, which is presented in this edition.

[4] The printed edition of the *ŚT* reads *vibudhair yathā*, instead of *rasakovidaiḥ*.

यतः करुणमाश्रित्य रसाभासत्वकारणम् ।
रसाभासप्रकरणे वक्ष्यते [1]तदिदं स्फुटम् ।। २६२ ।।

[2]तत्तन्न्यायप्रवीणेन न्यायमार्गानुवर्तिना ।
दर्शितं सिंहभूपेन स्पष्टं वृत्तिचतुष्टयम् ।। २६३ ।।

अथ प्रवृत्तयः—

तत्तद्देशोचिता भाषा क्रिया वेषाः प्रवृत्तयः ।
तत्र भाषा द्विधा भाषा विभाषा चेति भेदतः ।।२६४।।

तत्र भाषा सप्तविधा प्राच्यावन्त्या च मागधी ।
बाल्हीका दाक्षिणात्या च [3]शौरसेनी च मालवी
।। २६५ ।।

सप्तधा स्याद् विभाषापि शबरद्रमिलान्ध्रजाः[4] ।
शकाराभीरचण्डालवनेचरभवा इति ।। २६६ ।।

भाषाविभाषाः सन्त्यन्यास्तत्तद्देशजनोचिताः ।
तासामनुपयोगित्वान्नात्र [5]लक्षणमुच्यते ।। २६७ ।।

[6]तत्तद्देशोचिता वेषाः क्रियाश्चातिस्फुटान्तराः ।।
(२६८ क-ख)

[1] See notes 1-2 on the line *atra sātvatyā,* etc., p. 133.

[2] *RAS*-2 and MSS. 5 & 6 read *tattannyāyapramāṇena*; all others read:. . . . . *pravīṇena*.

[3] *RAS*-1, *RAS*-2 and MSS. 4, 5 & 6 read *śūrasenyāndhramāgadhī*; MSS. 7, 8, 9 and 10 read *śauraseni ca mālavī*.

[4] *RAS*-2 and MSS. 5 & 6 read: *dramilārajāḥ*; all others read: *dramilāndhrajāḥ*.

[5] *RAS*-1 and MS. 4 read: *lakṣaṇam iṣyate*; others read: *lakṣaṇam ucyate*.

[6] The half verse: *tattaddeśocitāḥ,* etc. is found only in MS. 10.

अथ सात्त्विकाः–

अन्येषां सुखदुःखादिभावेषु[1] कृतभावनम् ।। २९८ ।।
(ग-घ)

आनुकूल्येन यच्चित्तं भावकानां प्रवर्तते ।
सत्त्वं तदिति विज्ञेयं प्राज्ञैः सत्त्वोद्भवानिमान् ।। २९९ ।।
सात्त्विका इति जानन्ति भरतादिमहर्षयः ।
सर्वेषामपि भावानां यैः [2]स्वसत्त्वं हि भाव्यते ।।३००।।
ते भावा भावतत्त्वज्ञैः सात्त्विकाः समुदीरिताः ।
ते स्तम्भस्वेदरोमाञ्चाः स्वरभेदश्च वेपथुः ।। ३०१ ।।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ परिकीर्तिताः ।

तत्र स्तम्भः–

स्तम्भो हर्षभयामर्षविषादाद्भुतसंभवः ।। ३०२ ।।
अनुभावा भवन्त्येते स्तम्भस्य मुनिसंमताः ।
संज्ञाविरहितत्वं च शून्यता निष्प्रकम्पता ।। ३०३ ।।

हर्षाद् यथा–

स्तम्भस्तथालम्भितमां नलेन
भैमीकरस्पर्शमुदः प्रसादः ।
कन्दर्पलक्ष्यीकरणार्पितस्य
स्तम्भस्य दम्भं स चिरं यथापत् ।।

(नैषधे १४. ५९)

[1] *RAS*-1 and MS. 4 read: *anyeṣāṃ sukhaduḥkhādi-bhāvanākṛtabhāvanam*; others read:-*bhāveṣu kṛta*, etc. See also the *DR*, IV. 5 (ab) and *Avaloka* & *LṬ* thereon.

[2] *RAS*-1 and MS. 4 read: *yaiḥ sattvaṃ pravibhāvyate*; others read: *yaiḥ svasattvaṃ hi bhāvyate*. See also the *DR*, *DRA* & *LṬ* on IV. 4 (ab).

अत्र नलस्य दमयन्तीकरस्पर्शहर्षेण स्तम्भः ।

भयाद् यथा–

इन्द्रजिद्बाणसंभीतास्तथा तस्थुर्वलीमुखाः ।
यथायं रणसंरम्भाद् विरतो मृतशङ्कया ।।

अत्र मृतशङ्कयेति निष्प्रकम्पत्वद्योतनात् स्तम्भः ।

अमर्षाद् यथा–

आलोक्य दुःशासनमग्रतोऽपि
प्रवृद्धरोषातिभरान्धचेताः ।
भीमः क्षणं शून्य इवावतस्थे
चित्तं निरुन्धे हि महान् विकारः ।।

अत्र दुःशासनविलोकनप्रवृद्धेनामर्षोत्कर्षेण भीमस्यात्मविस्मरणकथनादयममर्षेण स्तम्भः ।

विषादाद् यथा–

यदत्र [1]चिन्तारतिपाशजालैर्मुकुन्दगन्धद्विरदो बबन्धे ।
तेनारविन्दोदरमन्दिराया दशां तनुः स्तम्भमयीमवाप ।।

अत्र पुरुषोत्तमानवाप्तिजनितेन विषादेन लक्ष्म्याः स्तम्भः ।

अद्भुताद् यथा–

तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ।
हिमनिष्यन्दिनी प्रातर्निर्वातेव वनस्थली ।।

(रघु. १५. ६६)

[1] *RAS*-1 and MS. 4 read *cintātati*, for *cintārati* of *RAS*-2 and MSS. 5 & 6.

अत्र कुशलवगीतमाधुर्यातिशयेन श्रवणैकाग्रतारूपविस्मयेन स्तम्भः।
अथ स्वेदः—

निदाघहर्षव्यायामश्रमक्रोधभयादिभिः ।
स्वेदः संजायते तत्र त्वनुभावा भवन्त्यमी ॥ ३०४ ॥
स्वेदापनयवातेच्छाव्यजनग्रहणादयः । (३०५ क-ख)

निदाघाद् यथा—

करैरुपात्तान् कमलोत्करेभ्यो
निजैर्विवस्वान् विकचोदरेभ्यः ।
तस्या निचिक्षेप मुखारविन्दे
स्वेदापदेशान्मकरन्दबिन्दून् ॥

हर्षाद् यथा—

सख्या कृतानुज्ञमुपेत्य पश्चाद्
धून्वन् शिरोजान् करजैः प्रियायाः ।
अनार्द्रयन्नाननवायुनापि
स्विन्नान्तरानेव चकार कश्चित् ॥

अत्रोभयोरन्योन्यस्पर्शहर्षेण स्वेदः ।

व्यायामाद् यथा—

गत्वोद्रेकं जघनपुलिने रुद्धमध्यप्रदेशः
क्रामन्नूरुद्रुमभुजलताः पूर्णनाभिह्रदान्तः ।
उल्लङ्घ्योच्चैः कुचतटभुवं प्लावयन् रोमकूपान्
स्वेदापूरो युवतिसरितां प्राप गण्डस्थलानि ॥
(माघे ७. ७४)

अत्र कुसुमापचयपर्यटनेन व्यायामेन स्वेदः ।

श्रमो रत्यादिपरिश्रान्तिः । तस्माद् यथा–

मञ्चेषु पञ्चेषुसमाकुलानां
वाताय वातायनसंश्रितानाम् ।
स्विन्नानि खिन्नानि मुखान्यशंसन्
संभोगमम्भोरुहलोचनानाम् ॥

आदिशब्दाद् गीतनृत्तश्रान्त्यादयः ।

गीतश्रान्त्या यथा–

गीतान्तरेषु श्रमवारिलेशैः
किंचित्समुच्छ्वासितपत्त्रलेखम् ।
पुष्पासवाघूर्णितनेत्त्रशोभि
प्रियामुखं किंपुरुषश्चुचुम्ब ॥ (कुमार. ३. ३८)

नृत्तश्रान्त्या यथा–

चारुनृत्तविगमे च तन्मुखं स्वेदभिन्नतिलकं परिश्रमात् ।
प्रेमदत्तवदनानिलं पिबन्नत्यजीवदमरालकेश्वरौ ॥
(रघु. १६. १५)

क्रोधाद् यथा–

दधत् संध्यारुणव्योमस्फुरत्तारानुकारिणीः ।
द्विषद्द्वेषोपरक्ताङ्गसङ्गिनीः स्वेदविप्रुषः ॥
(माघे २. १८)

भयाद् यथा ममैव–

कृतान्तजिह्वाकुटिलां कृपाणीं
दृष्ट्वा यदीयां त्रसतामरीणाम् ।
स्वेदोदयश्चेतसि संचितानां
मानोष्मणामातनुते प्रशान्तिम् ॥ (अत्रैव १. १३)

अथ रोमाञ्चः–

रोमाञ्चो विस्मयोत्साहहर्षाद्यैस्तत्र विक्रिया:

॥ ३०५ ॥ (ग-घ)

[1]रोमोद्गमोल्लुकसनगात्रसंस्पर्शनादयः ।

(३०६ क-ख)

विस्मयेन यथा–

राघवस्य [2]गुरुसारनिर्भरप्रौढिमाजगवभञ्जनोद्भटम् ।
दोर्बलं श्रुतवतः सभान्तरे रोमहर्षणमभूत् पिनाकिनः ॥

उत्साहेन यथा–

अन्त्रैः स्वैरपि संयताग्रचरणो मूर्च्छाविरामक्षणं
स्वाधीनव्रणिताङ्गशस्त्रविवरे रोमोद्गमं वर्मयन् ।
भग्नानुद्वलयन् निजान् परभटानातर्जयन्निष्ठुरं
[3]धन्योद्दामजयश्रियः पृथुरणस्तम्भे पताकायते ॥

अत्रोत्साहेन रोमाञ्चः ।

[1] *RAS*-1 reads: *ullāsaghanam*, etc.; *RAS*-3 has this; *RAS*-2 reads *romodgamamukhollāsa*; MSS. 4, 5, 6, 7, 8 & 9 read-*ullasagana*; MS. 7 reads-*lavagana*; MS. 10 reads: *romodgamollakasnā*—Perhaps the expression intended was *ullukasana*, which is found in the *NŚ*, and explained by Abhinavagupta thus: *gātrasyordhvaṃ sāhlādaṃ dhūnanam ullukasanam* (Vol. I, 1956, p. 330).

[2] Only *RAS*-2 reads *nirbharasvīyacāparavabhañjanodbhaṭam*; others read as given in the text. I am very sorry that I am unable to trace the source of this beautiful verse, which causes *romaharṣaṇa*, not only to Śiva, but also to us when we read it.

[3] *RAS*-1 and MS. 4 read: *dhanyo dhāma jayaśriyaḥ*; *RAS*-2 and MSS. 5 & 6 read: *dhanyoddāmajayaśriyaḥ*.

हर्षेण यथा–

रोमाणि सर्वाण्यपि बालभावाद्
वरश्रियं वीक्षितुमुत्सुकानि ।
तस्यास्तदा कोरकिताङ्गयष्टे-
रुद्ग्रीविकादानमिवान्भूवन् ।। (नैषधे १४. ५३)

अथ स्वरभेदः–

वैस्वर्यं सुखदुःखाद्यैस्तत्र स्युर्गद्गदादयः ।। ३०६ ।।
(ग-घ)

सुखेन यथा–

पश्येम तं भूय इति ब्रुवाणां सखीं वचोभिः
किल सा ततर्ज ।
न प्रीतिकर्णेजपतां गतानि भूयो बभूवुः स्वरवैकृतानि ।।

अत्र प्रियसंस्मरणजनितेन हर्षेण भूयो वैस्वर्यम् ।

दुःखेन यथा–

विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ।।
(रघु. ८. ४३)

अथ वेपथुः–

वेपथु र्षसंत्रासजराक्रोधादिभिर्भवेत् ।
तत्रानुभावाः स्फुरणगात्रकम्पादयो मताः ।। ३०७ ।।

हर्षेण त्रासेन च यथा–

तदङ्गमानन्दजडेन दोष्णा
पिता सबाणव्रणमाममर्श ।

निःश्वस्य निःश्वस्य मुहुश्च दीर्घं
प्रसूः कराभ्यां भयकम्पिताभ्याम् ।।

जरया यथा–

[1]रुन्धानया बहुमुखीं गतिमिन्द्रियाणां
वध्वेव[2] गाढमनया जरयोपगूढः ।
अङ्गेन वेपथुमता जडतायुजाहं
गन्तुं पदादपि पदं गदितुं च नालम् ।।

(कुवलयावली ३. १)

क्रोधेन यथा–

रुषा समाध्मातमृगेन्द्रतुङ्गं[3]
न केवलं तस्य वपुश्चकम्पे ।
ससिन्धुभूभृद्गगना च पृथ्वी
निपातितोल्का च सतारका द्यौः ।।

अथ वैवर्ण्यम्–

विषादातपरोषाद्यैर्वैवर्ण्यमुपजायते ।
मुखवर्णपरावृत्तिकार्श्याद्यास्तत्र विक्रिया: ।। ३०८ ।।

[1] *RAS*-1 and MS. 4 read: *ruddhānayā bahumukhī gatiḥ*; *RAS*-2 and MSS. 5 & 6 read: *bahumukhīṃ niyatendriyāṇāṃ*; what is given in the text is the reading in the printed edition of the *Kūvalayāvalī* (TSS, 1941)—excepting the 3rd foot, which is *aṅgena vepathumatā ca jaḍena cāham*.

[2] *RAS*-1 reads *baddhveva*; others and the *Kuvalayāvalī* read *vadhveva*; also the *Kuvalayāvalī* reads *gamitum*, instead of *gaditum*.

[3] *RAS*-1 and MS. 4 read: *samādhmātamagendratuṅga-*; *RAS*-2 and MSS. 5 & 6 read-*mṛgendra*, etc.

विषादेन यथा–

शरकाण्डपाण्डुगण्डस्थलीयमाभाति परिमिताभरणा ।
माधवपरिणतपत्रा कतिपयकुसुमेव कुन्दलता ।।

(मालविकाग्निमित्रे ३. ८)

अत्र विरहजनितेन विषादेन पाण्डुत्वम् ।

आतपेन यथा–

धूतानामभिमुखपातिभिः समीरै-
रायासादविशदलोचनोत्पलानाम् ।
आनिन्ये मदजनितां श्रियं वधूना-
मुष्णांशुद्युतिजनितः कपोलरागः ।।

(किरातार्जुनीये ७. ३)

रोषेण यथा–

कदा मुखं वरतनु कारणादृते
तवागतं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेन्दुमण्डला
विभावरी कथय कथं भविष्यति ।।

(मालविकाग्नि. ४. १६)

अथाश्रु–

विषादरोषसन्तोषधूमाद्यैरश्रु तत्क्रियाः ।
बाष्पबिन्दुपरिक्षेपनेत्रसंमार्जनादयः ।। ३०६ ।।

विषादेन यथा–

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।

अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ।।
(मेघसंदेशे २. ३८)

रोषेण च यथा ममैव–

कान्ते [1]कृतागसि पुरः परिवर्तमाने
सख्यं सरोजशशिनोः सहसा बभूव ।
रोषाक्षरं सुदृशि वक्तुमपारयन्त्या-
मिन्दीवरद्वयमवाप तुषारधाराम् ।।

अत्र सापराधप्रियदर्शनजनितेन रोषेण मुग्धाया बाष्पोद्गमः ।

संतोषेण यथा–

आनन्दजः शोकजमश्रु बाष्प-
स्तयोरशीतं शिशिरो बिभेद ।
गङ्गासरय्वोर्जलमुष्णतप्तं
हिमाद्रिनिष्यन्द इवावतीर्णः ।। (रघु. १४. ५३)

अत्र चिरप्रोषितप्रत्यागतरामलक्ष्मणदर्शनानन्देन कौसल्यासुमित्रयो-र्बाष्पः ।

धूमेन यथा–

तस्मिन् क्षणे कान्तमलक्षयत् सा धूमाविलैरुद्गत-
बाष्पलेशैः ।
अन्तर्दलैरम्बुरुहामिवार्द्रैरयत्नकर्णाभरणैरपाङ्गैः ।।

अत्र विवाहधूमेन लक्ष्म्या बाष्पोद्गमः ।

[1] This verse was cited earlier also (p. 42) and quoted in the *Camatkāracandrikā* (p. 51).

अथ प्रलयः–

प्रलयो दुःखघाताद्यैश्चेष्टा तत्र विसंज्ञता ।

(३१० क-ख)

दुःखेन यथा–

वपुषा करणोज्झितेन सा निपतन्ती पतिमप्यपातयत् ।
ननु तैलनिषेकबिन्दुना सह दीपार्चिरुपैति मेदिनीम् ।।
(रघु. ८. ३८)

अत्रेन्दुमतीविपत्तिजनितेन दुःखेनाजस्य प्रलयः ।

घातेन यथा–

पूर्वं प्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी ।
तुरङ्गमस्कन्धनिषण्णदेहं प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ।।
(रघु. ७. ४७)

अत्र प्रतिभटप्रहारेणाश्वसादिनो मूर्च्छा ।

सर्वेऽपि सत्त्वमूलत्वाद् भावा यद्यपि सात्त्विकाः
।। ३१० ।। (ग-घ)
तथाप्यमीषां [1]सत्त्वैकमूलत्वात् सात्त्विकप्रथा ।
अनुभावाश्च कथ्यन्ते भावसंसूचनादमी ।। ३११ ।।
एवं [2]द्वैरूप्यमेतेषां कथितं भावकोविदैः । (३१२ क-ख)

[1] MSS. 7, 8, 9 and 10 read *eteṣāṃ sattvamūlattvād bhāvānāṃ sāttvikaprathā*, instead of the two halves *sarve'pi* and *tathāpi*, etc. All others read as given in the text.

[2] See the *DR*, IV. 4(cd) and 5(ab), and *Avaloka* and *LṬ* thereon (p. 173).

[1]अनुभावैकनिधिना सुखानुभवशालिना ॥ ३१२ ॥

श्रीसिंहभूभुजा साङ्गमनुभावा निरूपिताः ।

[2]अस्मत्कल्पलतादलानि गिलति [3]त्वत्कामगौवर्यियतां
मच्चिन्तामणिवेदिभिः [4]परिणमेद् दूरान्नयोच्चैर्गजम् ।
इत्यारुढवितर्दिकाः प्रतिपथं[5] जल्पन्ति भूदेवताः
सिंहक्ष्माभुजि कल्पवृक्षसुरभीहस्त्यादिदानोद्यते
॥ ३१३ ॥

रक्षायां राक्षसारिं प्रबलविमतविद्रावणे वीरभद्रं
कारुण्ये [6]रामभद्रं भुजबलविभवारोहणे रौहिणेयम् ।
पाञ्चालं चञ्चलाक्षीपरिचरणविधौ पूर्णचन्द्रं प्रसादे
कन्दर्पं रूपदर्पे तुलयति नितरां सिंहभूपालचन्द्रः
॥ ३१४ ॥

[1] The two halves *anubhāvaikanidhinā*, etc. and the following two verses as well as the colophon are not found in MSS. 7, 8, 9 and 10. Others have them clearly.

[2] This is quoted in the *CC* also (pp. 34 & 134). This verse is not found in *RAS*-2. Others have it.

[3] The conversation referred to here states Siṃhabhūpāla's liberal presents to *bhūdevatā-s* (i.e. Brahmins) as valuable as Kalpalatā, Kāmadhenu, Cintāmaṇi, Airāvata and the like. Like the word *kāmagavī*, the expression *kāmagauḥ* is also said to be correct. See the *CC*, page 34.

[4] This seems to be a reference to *vaprakrīḍā*. See Mallinātha and Pūrṇasarasvatī on *Meghasaṃdeśa*, v. 2.

[5] MSS. 4, 5 & 6 read *pratipadam*; *RAS*-1 reads *pratipatham*.

[6] *RAS*-2 and MSS. 5 & 6 read: *dānotsāhe ca karṇam*, instead of *kāruṇye rāmabhadram* of *RAS*-1 and MS. 4.

इति श्रीमदान्ध्रमण्डलाधीश्वरप्रतिगण्डभैरव[1]-श्रीमदनपोतनरेन्द्र-[2]नन्दनभुजबलभीम-श्रीसिंहभूपालविरचिते रसार्णवसुधाकर-नाम्नि [3]नाट्यालंकारशास्त्रे [4]रञ्जकोल्लासो नाम

प्रथमो विलासः

---

[1] See note on I. 34 (p. 13), and the Introduction for the significance of the titles found in the *RAS*.

[2] *RAS*-1, *RAS*-2 and MSS. 5 & 6 give the regionalized spelling as *śrīyanapota* (and sometimes as *śrī-anapota* too). MS. 4 gives *śrīmadanapota*. Use of regionalized forms together with Sanskrit expressions seems to have been prevalent in the days of our author. Even the name *Siṅgabhūpāla* has for the first element the regionalized form derived from Sanskrit *Siṃha*.

[3] *RAS*-1 reads *nāṭyālaṃkāre*; *RAS*-2 and MSS. 5 & 6 read: *nāṭyālaṃkāraśāstre*; this expression is missing in MS. 4.

[4] *RAS*-2 and MSS. 5 & 6 seem to read *rasabhāvollāso nāma*; *RAS*-1 and MS. 4 read: *rañjakollāso nāma*.

द्वितीयो विलासः

[1]कल्याणदायि भवतां भवेद् भव्यगुणाकरम् ।
कमलाकुचकालेयव्यञ्जितोरःस्थलं महः ॥ ॥ १ ॥

चिदचित्क्षेमकारिण्यै [नमः] [2]श्रीपर्णजादिभिः ।
वन्द्यायै वार्धिनन्दिन्यै कराग्रस्थपयोरुहे ॥ २ ॥

अथ व्यभिचारिभावाः—

व्यभी इत्युपसर्गौ द्वौ विशेषाभिमुखत्वयोः ।
विशेषेणाभिमुख्येन चरन्ति स्थायिनं प्रति ॥ ३ ॥

वागङ्गसत्त्वयुक्ता ये ते ज्ञेया व्यभिचारिणः ।
तं चारयन्ति[3] वा सम्यगिति संचारिणोऽपि ते ॥ ४ ॥

[1] The invocatory verses are found in *RAS*-2 and MSS. 5 & 6 only.

[2] MS. 5 reads *śrīparṇajātibhiḥ*; MS. 6 reads *śrīvarṇajātibhiḥ*. I think it should be *śrīparṇajādibhiḥ*. *śrīparṇa* means lotus, and *śrīparṇajādibhiḥ* is in the sense of *padmasambhavādibhiḥ*, i.e. *brahmādibhiḥ*. Amara notes: *śrīparṇam kamale'pi ca*. In the second verse *śriyai* is the reading seen, *namaḥ* is substituted by the editor for clarity.

[3] *RAS*-1 & MS. 4 read: *saṃcārayanti bhāvasya gatim*, etc.; *RAS*-2 reads *saṃcārayanti vā samyag iti*, etc.; MSS. 5, 6, 7, 8, 9 and 10 read *taṃ cārayanti vā samyag iti*; see also the *NŚ*, vol. I (GOS), pp. 355 & 356.

[1]उन्मज्जन्तो निमज्जन्तः स्थायिन्यम्बुनिधाविव ।
ऊर्मिवद् वर्धयन्त्येनं यान्ति तद्रूपतां च ते[2] ।। ५ ।।
निर्वेदोऽथ विषादो दैन्यं ग्लानिश्रमौ च मदगर्वौ ।
शङ्कात्रासावेगा उन्मादापस्मृती तथा व्याधिः ।। ६ ।।
मोहो मृतिरालस्यं जाड्यं व्रीडावहित्था च ।
स्मृतिरथ वितर्कचिन्तामतिधृतयो हर्ष उत्सुकत्वं च
।। ७ ।।
औग्र्यममर्षासूये चापल्यं चैव निद्रा च ।
सुप्तिर्बोध इतीमे ख्याता व्यभिचारिणस्त्रयस्त्रिंशत्
।। ८ ।।

तत्र निर्वेदः–

तत्त्वज्ञानाच्च दौर्गत्यादापदो विप्रयोगतः ।
ईर्ष्यादेरपि संजातं निर्वेदः स्वावमाननम्[3] ।। ९ ।।
(अनुभावस्तु नैष्फल्यमतिर्निर्वेद उच्यते ।
तत्र चिन्ताश्रुनिश्वासवैवर्ण्योच्छ्वासदीनताः ।।)

[1] The *Daśarūpaka* has the following: *viśeṣād ābhimukhyena caranto vyabhicāriṇaḥ, sthāyiny unmagnanirmagnāḥ kallolā iva vāridhau* (IV. 7). See also the *Avaloka* and the *LT* on this.

[2] MSS. 7, 8, 9 and 10 read *ye* instead of *te*.

[3] *RAS*-1, MSS. 4, 8 and 9 read *īrṣyāder api naiṣphalyamatir nirveda ucyate,* and give a footnote reading as: *īrṣyāder ati* . . . *RAS*-2 and MSS. 5 and 6 read: *naiṣphalyamitir*, etc. MS. 7 is defective here; MS. 10 reads: *īrṣyāder api saṃjātaṃ nirvedaḥ svāvamānanam*; MS. 4 notes, in addition to the other, this reading also, with expression: *pāṭhāntaram*. See also the *Daśarūpaka* IV. 9, in the light of which I retained the reading of MS. 10.

तत्र तत्त्वज्ञानाद् यथा—

प्राप्ताः श्रियः सकलकामदुघास्ततः किं
न्यस्तं पदं शिरसि विद्विषतां ततः किम् ।
संमानिताः प्रणयिनो विभवैस्ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ।।
(वैराग्यशतके श्लो. ६७)

किं विद्यासु विशारदैरपि सुतैः प्राप्ताधिकप्रश्रयैः
किं [1]दारैरभिरूपरूपचरितैरात्मानुकूलैरपि ।
किं कार्यं चिरजीवितेन विगतव्याधिप्रचारेण वा
दारिद्र्योपहृतं यदेतदखिलं दुःखाय मे केवलम् ।।

आपदो यथा—

सुरतश्रमसंभृतो मुखे ध्रियते स्वेदलवोद्गमोऽपि ते ।
अथ चास्तमिता त्वमात्मना धिगिमां देहभृताम-
सारताम् ।। (रघु. ८. ५१)

विप्रयोगाद् यथा—

यस्यां ते दिवसास्तया सह मया नीता यथा स्वे गृहे
यत्संबन्धिकथाभिरेव सततं दीर्घाभिरस्थीयत ।
एकः संप्रति नाशितप्रियतमस्तामेव रामः कथं
पापः पञ्चवटीं विलोकयतु वा गच्छत्वसंभाव्य वा ।।
(उत्तररामचरिते २. २९)

[1] *RAS*-1 reads *anurūpa*, instead of *abhirūpa*; *RAS*-2, MSS. 4, 5 and 6 read *abhirūpa*; *abhirūpa* is a synonym of *manojña*; Amara notes: *prāptarūpa-svarūpābhirūpā budhamanojñayoḥ*.

अत्र सीताविप्रयुक्तस्य रामस्य वागारम्भसूचितेनात्मावमाननेन निर्वेदः प्रतीयते ।

ईर्ष्यया यथा–

कुर्युः शस्त्रकथाममी यदि मनोर्वंशे मनुष्याङ्कुराः
स्याच्चेद् ब्रह्मगणोऽयमाकृतिगणस्तत्रेष्यते चेद् भवान् ।
सम्राजां समिधां च साधकतमं धत्ते छिदाकारणं
धिङ् मौर्वीकुशकर्षणोल्बणकिणग्रन्थिर्ममायं करः ।।
(अनर्घ. ४. ४४)

अत्र रामचन्द्रशतानन्दविषयेर्ष्याजनितेन धिगिति वागारम्भसूचितेन स्वात्मावमाननेन जामदग्न्यस्य निर्वेदः ।

अथ विषादः–

[1]प्रारब्धकार्यानिर्वाहादिष्टानाप्तेर्विपत्तितः ।
अपराधपरिज्ञानादनुतापस्तु यो भवेत् ।। १० ।।
विषादः स त्रिधा ज्येष्ठमध्यमाधमसंश्रयात् ।
सहायान्वेषणोपायचिन्ताद्या उत्तमे मताः ।। ११ ।।
[2]अनुत्साहश्च वैचित्त्यमित्याद्या मध्यमे मताः ।
अधमस्यानुभावाः स्युर्वैचि[3]त्र्यमवलोकनम् ।। १२ ।।
रोदनश्वसितध्यानमुखशोषादयोऽपि च । (१३ क-ख)

[1] See *NS*, vol. I, page 367; and the *DR*, IV. 31.

[2] *Kārikā-s* 12 (*ga* and *gha*) and 13 (*ka* and *kha*) are missing in MSS. 7, 8 and 9.

[3] *RAS*-1 and MS. 4 read *vaivarṇyam*, instead of *vaicitryam* which is the reading in *RAS*-2, and MSS. 5, 6 & 10.

प्रारब्धकार्यानिर्वाहाद् यथा–

वारं वारं तिरयति दृशावुद्गतो बाष्पपूर-
स्तत्संकल्पोपहितजडिम स्तम्भमभ्येति गात्रम् ।
सद्यः स्विद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः
पाणिर्लेखाविधिषु नितरां वर्तते किं करोमि ॥
(मालतीमाधवे १. ३८)

अत्र प्रस्तुतचित्रनिर्माणानिर्वाहान्माधवस्य किं करोमीति वागारम्भसूचितया तद्दर्शनोपायचिन्तया विषादो[1] व्यज्यते ।

इष्टानाप्तेर्यथा–

संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥
(रघुवंशे ६. ६७)

अत्रेन्दुमतीमाकाङ्क्षतां भूमिपतीनां तदनवाप्त्या मुखवैवर्ण्येन विषादो व्यज्यते ।

विपत्तितो यथा–

हा हा धिक् परगृहवासदूषणं यद्
वैदेह्याः प्रशमितमद्भुतैरुपायैः ।
एतत् तत् पुनरपि दैवदुर्विपाका-
दालर्कं विषमिव सर्वतः प्रसृप्तम् ॥
(उत्तररामचरिते १. ४०)

अत्र सीतापवादरूपाया विपत्तेर्हा हा धिगिति वागारम्भेण रामस्य विषादो गम्यते ।

[1] Pūrṇasarasvatī however comments on this verse as (*atra*) *dainyaṃ dyotyate*.

यथा वा–

सा दुर्निमित्तोपगताद् विषादात्
सद्यः परिम्लानमुखारविन्दा ।
राज्ञः शिवं सावरजस्य भूया-
दित्याशशंसे करणैरबाह्यैः ।।

(रघु. १४. ५०)

अत्र दुर्निमित्तानुमिताया विपत्तेर्मुखशोषणेनानुभावेन वैदेह्या विषादः ।

अपराधपरिज्ञानाद् यथा–

हा तातेति क्रन्दितमाकर्ण्य विषण्ण-
स्तस्यान्विष्यन् वेतसगूढं प्रभवं सः ।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं
तापादन्तःशल्य इवासीत् क्षितिपोऽपि ।।

(रघु. ९. ७५)

अथ दैन्यम्–

हृत्तापदुर्गतत्वाद्यैरनौद्धत्यं[1] हि दीनता ।। १३ ।।

(ग-घ)

तत्रानुभावा मालिन्यगात्रस्तम्भादयो मताः ।

(१४ क-ख)

[1] The definition of *dainya* is missing in MSS. 7, 8 & 9; *RAS*-1 reads *naiścittyaṃ hṛdi dīnatā* and gives the footnote reading as *anaurjittyaṃ hi*; *RAS*-2 and MS. 4 read *anauddhatyaṃ hi*; MSS. 5 & 6 seem to read *atyājanyaṃ hi (anaurjityaṃ?)*; see the *NŚ*, vol. I, page 361, and *DR*, IV. 14.

हृत्तापाद् यथा—

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे
सौहार्दाद् वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान् देशान् जलद विहर प्रावृषा संभृतश्री-
र्माभूदेवं क्षणमपि च ते विद्युता विप्रयोगः ।।

(मेघसंदेशे २. ५५)

दौर्गत्याद् यथा—

दीना दीनमुखैः [1]स्वकीयशिशुकैराकृष्टजीर्णाम्बरा
क्रोशद्भिः क्षुधितैर्निरन्नपिठरा[2] नेक्ष्येत चेद् गेहिनी ।
याच्ञादैन्यभयेन गद्गदगलत्त्रुटद्विलीनाक्षरं
को देहीति वदेत् स्वदग्धजठरस्यार्थे मनस्वी पुमान् ।।

अथ ग्लानिः—

[3]आधिव्याधिजरातृष्णाव्यायामसुरतादिभिः ।। १४ ।।

(ग-घ)

निष्प्राणता ग्लानिरत्र क्षामाङ्गवचनक्रियाः ।
कम्पानुत्साहवैवर्ण्यनयनभ्रमणादयः ।। १५ ।।

आधिना यथा—

किसलयमिव मुग्धं बन्धनाद् विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।

[1] MS. 4 reads *svakīya*; *RAS*-1, *RAS*-2 and MSS. 5 & 6 read *sadaiva*; *RAS*-1 gives the footnote reading of *svakīya*, too.

[2] *RAS*-1 reads *nirannavidhurā*, and gives the footnote reading as *nirannapiṭharā*, which is also the reading in MS. 4; *RAS*-2 and MSS. 5 & 6 read *nirannavidhurair nesyeta cet*.

[3] See *NŚ*, vol. I, p. 353, and *DR*, IV. 10.

ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीपत्त्रगर्भम् ॥
(उत्तररामचरिते ३. ५)

व्याधिना यथा–

तस्य पाण्डुवदनाल्पभूषणा सावलम्बगमना मृदुस्वना।
राजयक्ष्मपरिहाणिराययौ कामयानसमवस्थया तुलाम् ॥
(रघु. १६. ५०)

जरया यथा–

विवृद्धिं कम्पस्य प्रथयतितरां साध्वसवशा-
दविस्पष्टां दृष्टिं तिरयतितरां बाष्पसलिलैः ।
स्खलद्वर्णां वाणीं जनयतितरां गद्गदतया[1]
जरायाः साहाय्यं मम हि परितोषोऽद्य कुरुते ॥
(रत्नावल्यां ४.१३)

अत्र हर्षस्य जरासहकारित्वकथनादुभयानुभावैरपि कम्पादिभिर्जराग्लानेरेव प्राधान्यं गम्यते ।

तृष्णया यथा–

विन्ध्याध्वानो विरलसलिलास्तर्षिणी तत्र सीता
यावन्मूर्च्छां कलयति किल व्याकुले रामभद्रे ।
द्राक् सौमित्रिः पुटककलशीं मालुधानीदलानां
तावत् प्राप्तो दधदतिभृतां वारिणा नैर्झरेण ॥
(बालरामायणे ६. ५०)

[1] *RAS*-1 reads *gadgadikayā*; MS. 4 reads *gadgadavaśāt*; *RAS*-2 and MSS. 5 & 6 read *gadgadatayā*.

व्यायामेन यथा–

अतनुकुचभरानतेन भूयः
श्रमजनितानतिना शरीरकेण ।
अनुचितगतिसादनिःसहत्वं
कलभकरोरुभिरूरुभिर्दधानैः ॥

(माघे ७. ६६)

सुरतेन यथा–

अतिप्रयत्नेन रतान्ततान्ता[1]
कान्तेन तल्पादवरोपिता सा ।
आलम्ब्य तस्यैव करं करेण
ज्योत्स्नाकृतानन्दमलिन्दमाप ॥

अथ श्रमः–

श्रमो मानसखेदः स्यादध्वनृत्तरतादिभिः ।
अङ्गमर्दननिःश्वासौ पादसंवाहनं तथा ॥ १६ ॥
जृम्भणं मन्दयानं च मुखनेत्रविघूर्णनम्[2] ।
सीत्कृतिश्चेति विज्ञेया अनुभावाः श्रमोद्भवाः ॥१७॥

अध्वना यथा–

सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात् त्रिचतुराणि पदानि गत्वा ।

[1] *RAS*-1 and MSS. 4 read *nitānta-*; *RAS*-2 and MSS. 5 & 6 read *ratānta-*.

[2] *RAS*-1 and MS. 4 read *vikūṇanam*; *RAS*-2 and MSS. 5 & 6 read *vighūrṇanam*. See *NŚ*, vol. I, page 360, and the *DR*, IV. 12.

गन्तव्यमद्य कियदित्यसकृद् ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥
(बालरामायणे ६. ३४)

नृत्तेन यथा–

स्वेदक्लेदितकङ्कणां भुजलतां कृत्वा मृदङ्गाश्रयां
चेटीहस्तसमर्पितैकचरणा मञ्जीरसंधित्सया ।
सा भूयः स्तनकम्पसूचितरयं निःश्वासमामुञ्चती
रङ्गस्थानमनङ्गसात् कृतवती तालावधौ तस्थुषी ॥

रत्या यथा ममैव–

नितान्तसुरतक्लान्तां चेलान्तकृतवीजनाम् ।
कान्तां लुलितनेत्रान्तां कलये कलभाषिणीम् ॥

अथ मदः–

[1]**मदस्त्वानन्दसंमोहसंभेदो मदिराकृतः ।**
स त्रिधा तरुणो मध्योऽपकृष्टश्चेति भेदतः ॥ १८ ॥
दृष्टिः स्मेरा मुखे रागः सस्मिताकुलितं वचः ।
ललिताविद्धगत्याद्याश्चेष्टाः स्युस्तरुणे मदे ॥१९॥

यथा–

[2]भावहारि हसितं वचनानां कौशलं दृशि विकारविशेषाः ।
चक्रिरे भृशमृजोरपि वध्वाः कामिनेव तरुणेन मदेन ॥
(माघे १०. १३)

[1] See *NŚ*, vol. I, p. 359, and the *DR*, IV. 21.

[2] The reading in the printed edn. of the *Śiśupālavadha* (X. 13) is *hāvahāri*, and also according to Mallinātha it is so. Bhaṭṭanṛsiṃha in his commentary on the *Avaloka* reads *bhāvahāri*. *RAS*-1, *RAS*-2 and MSS. 4, 5 & 6—all read *bhāvahāri*; *RAS*-1 gives the footnote reading as *bhāvahāri*.

अथ मध्यमः—

मध्यमे तु मदे वाचि स्खलनं [1]घूर्णनं दृशोः ।
गमने [2]वक्रता बाह्वोर्विक्षेपस्त्रस्ततादयः ॥ २० ॥

यथा—

रुन्धती नयनवाक्यविकासं सादितोभयकरा परिरम्भे।
व्रीडितस्य ललितं युवतीनां क्षीबता बहुगुणैरनुजह्रे ॥
(भारवेः ९. ६७)

अथ नीचः—

अपकृष्टे तु चेष्टाः स्युर्गतिभङ्गो विसंज्ञता ।
निष्ठीवनं मुहुः श्वासो हिक्का छर्द्यादयो मताः
॥ २१ ॥

यथा—

निष्ठीवन्त्यो मुखरितमुखं गौरवात् कन्धरायाः
प्रायो हिक्काविकलविकलं [3]वाक्यमर्धं गृणन्त्यः ।
नैवापेक्षां गलितवसने नाप्युपेक्षामयन्ते
पायं पायं बहुविधमधून्येकवीथ्या[4] कुमार्यः ॥

तरुणस्तूत्तमादीनां मध्यमो मध्यनीचयोः ।
अपकृष्टस्तु नीचानां(मद इत्युच्यते बुधैः)

[1] *RAS*-1 and MS. 4 read *dṛśi ghūrṇatā*; all others read *ghūrṇanaṃ dṛśoḥ*.

[2] Only *RAS*-1 reads *vikṛtiḥ*; others read *vakratā*.

[3] Only MS. 4 reads *vākyamadhyam*, instead of *vākyam ardham* of *RAS*-1, *RAS*-2 and MSS. 5 & 6.

[4] *RAS*-1 reads *ekavīthyā kumāryaḥ*; *RAS*-2 reads *evam evaṃ kumāryaḥ*; MSS. 4, 5 & 6 read *ekavīrāḥ kumāryaḥ*, which is also given in the footnote in *RAS*-1.

(बुधाः पुनर्वदन्तीह) तत्तन्मदविवर्धने ।। २२ ।।
उत्तमप्रकृतिः शेते मध्यो हसति गायति ।
अधमप्रकृतिर्ग्राम्यं परुषं वक्ति रोदिति ।। २३ ।।

उत्तमप्रकृतेर्मदवृद्धिर्यथा–

तत्क्षणं विपरिवर्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्तिनी तयोः [1]प्रेयसः सुवदना मदस्य च ।।
(कुमार. ८. ७९)

मध्यमस्य मदवृद्धिर्यथा–

विनापि हेतुं विकटं जहास पदेषु चस्खाल समेऽपि मार्गे ।
विघूर्णमानः स [2]मदातिरेकादाकाशमालम्बनमाललम्बे ।।

अधमस्य मदवृद्धिर्यथा–

तह तह गामीणघरिणी[3]
मदविवसा किंपि किंपि वाहरइ ।
जह जह कुलवहुआओ
सोऊण सरन्दि पिहिअ कण्णाओ ।।

(छाया–

तथा तथा ग्रामीणगृहिणी
मदविवशा किमपि किपपि व्याहरति ।

[1] Printed edn. of *Ku. Saṃ*. reads *śūlinaḥ*, instead of *preyasaḥ* found in the MSS. of *RAS*.

[2] *RAS*-2 and MSS. 5 & 6 read *ācumbanam*, instead of *ālambanam* of *RAS*-1 and MS. 4.

[3] MSS. 5 & 6 read *gharinī* (and *gṛhiṇī*); *RAS*-1, *RAS*-2 and MS. 4 read *bahū* (*vadhūḥ*).

यथा यथा कुलवध्वः
श्रुत्वा सरन्ति पिहितकर्णाः ।।)

ऐश्वर्यादिकृतः कैश्चिन्[1] मानो मद इतीरितः ।
वक्ष्यमाणस्य गर्वस्य भेद एवेत्युदास्महे ।। २४ ।।

अथ गर्वः–

[2]ऐश्वर्यरूपतारुण्यकुलविद्याबलैरपि ।
इष्टलाभादिनान्येषामवज्ञा गर्व ईरितः ।। २५ ।।
अनुभावा भवन्त्यत्र गुर्वाद्याज्ञाव्यतिक्रमः ।
[3]अनुत्तरप्रदानं च वैमुख्यं भाषणेऽपि च ।। २६ ।।
विभ्रमापह्नुती वाक्यपारुष्यमनवेक्षणम् ।
अवेक्षणं निजाङ्गानामङ्गभङ्गादयोऽपि[4] च ।। २७ ।।

ऐश्वर्यमाज्ञासिद्धिः । तेन यथा–

[5]राहो तर्जय भास्करं वरुण हे निर्वाप्यतां पावकः
सर्वे वारिमुचः समेत्य कुरुत ग्रीष्मस्य दर्पच्छिदाम् ।
प्रालेयाचल चन्द्र दुग्धजलधे हेमन्त मन्दाकिनि
द्राग्देवस्य गृहानुपेत भवतां सेवाक्षणो वर्तते ।।
(बालरामायणे ५. २२)

[1] It is not clear which authors are being referred to thus.

[2] See *NŚ*, vol. I, p. 366, and the *DR*, IV. 19.

[3] *RAS*-1 and MS. 4 read *anuttarapradānaṃ ca*, which is the expression in the *NŚ* too; *RAS*-2 and MSS. 5 & 6 read *anurakta-pradānaṃ ca*; MSS. 7, 8, 9 and 10 read *anukramapradānaṃ ca*.

[4] MSS. 7, 8, 9 & 10 read *aṅgabhedādayo'pi ca*; others read as given in the text.

[5] This verse (*rāho tarjaya*, etc.) is found only in *RAS*-2.

यथा वा–

वह्ने निह्नोतुमर्चिः परिचिनु पुरतः सिञ्चतो वारिवाहान्
हेमन्तस्यान्तिके स्याः प्रथयति दवथुं येन ते ग्रीष्म नोष्मा।
मार्तण्डाश्चण्डतापप्रशमनविधये धत्त नाडीं जलार्द्रां
देवो नान्यप्रतापं त्रिभुवनविजयी मृष्यते श्रीदशास्यः ।।
(बालरामायणे १. ३१)

रूपतारुण्याभ्यां यथा–

वाटीषु वाटीषु [1]विलासिनीनां
चरन् युवा चारुतयातिदृप्तः ।
तृणाय नामन्यत पुष्पचापं
करेण लीलाकलितारविन्दः ।।

कुलेन यथा–

गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढापुरी
भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमो नः पिता ।
तत्पुत्राश्च महाकुला न विदिताः कस्यात्र तेषामपि
प्रज्ञाशीलविवेकधैर्यविनयाचारैरहं चोत्तमः ।।
(प्रबोधचन्द्रोदये २. ७)

विद्यया यथा–

बिन्दुद्वन्द्वतरङ्गिताग्रसरणिः कर्ता शिरोबिन्दुकं
कर्मेति क्रमशिक्षितान्वयकला ये के ऽपि तेभ्यो नमः ।
ये तु ग्रन्थसहस्रशाणकषणत्रुटचत्कलङ्कैर्गिरा-
मुल्लेखैः कवयन्ति बिल्हणकविस्तेष्वेव संनह्यति ।।
(बिल्हणस्य कर्णसुन्दर्याम् अन्ते ५६ पुटे)

[1] *RAS*-2 reads *vane drumāṇām*; MS. 5 reads *vinā drumāṇām*; MS. 6 reads *vinā dravāṇām*; *RAS*-1 and MS. 4 read *vilāsinīnām.*

बलेन यथा–

रुद्राद्रेस्तुलनं स्वकण्ठविपिनच्छेदो हरेर्वासनं
कारावेश्मनि पुष्पकस्य हरणं यस्योर्जिताः केलयः ।
सोऽयं दुर्मदबाहुदण्डसचिवो लङ्केश्वरस्तस्य मे
का श्लाघा घुणजर्जरेण धनुषाकृष्टेन भग्नेन वा ॥
(बालरामायणे १. ५१)

इष्टप्राप्त्या यथा–

आस्तां तावदनङ्गचापविभवः का नाम सा कौमुदी
दूरे तिष्ठतु मत्तकोकिलरुतं संवान्तु मन्दानिलाः ।
हासोल्लासतरङ्गितैरसकलैर्नेत्राञ्चलैश्चञ्चलैः
साकूतैरुररीकरोति तरुणी सेयं [1]प्रणामाञ्जलिम् ॥

अथ शङ्का–

शङ्का चौर्यापराधाद्यैः स्वानिष्टोत्प्रेक्षणं मतम् ।
तत्र चेष्टा मुहुः पार्श्वदर्शनं मुखशोषणम् ॥ २८ ॥

अवकुण्ठनवैवर्ण्यकण्ठसादादयोऽपि[2] च ।
शङ्का द्विधेयमात्मोत्था परोत्था चेति भेदतः ॥ २९ ॥

स्वाकार्यजनिता[3] स्वोत्था प्रायो व्यङ्ग्येयमिङ्गितैः ।
इङ्गितानि तु पक्ष्मभ्रूतारकादृष्टिविक्रियाः ॥ ३० ॥

[1] *RAS*-2 and MSS. 5 & 6 read *so 'yam praṇāmāñjaliḥ.*

[2] Regarding *śaṅkā*, see *NŚ*, vol. 1, p. 357 and the *DR*, IV. 11. Only MS. 4 reads *kārśyasādādayo 'pi ca.*

[3] MS. 10 reads *svākāryajanitā*; others read *svakāryajanitā.*

(अपराधात्) स्वोत्था[1] यथा–

तत्सख्या मरुताथ वा प्रचलिता [2]वल्लीति मुह्यद्धियो
दृष्ट्वा[3] व्याकुलतारया[4] निगदतो मिथ्याप्रसादं मुखे ।

[1] *RAS*-1 and *RAS*-2 give here the illustrative verse *mṛdnan kṣīrādi*, etc. and the *RAS*-1 has the expression *saiva cauryeṇa*, before *svotthā yathā*; MSS. 4, 5 & 6 clearly give the verse *tatsakhyā marutātha vā*, etc. here, and not the verse *mṛdnan*, etc.

[2] What was the intended meaning of the expression and the verse is not very clear. Perhaps the word *vallī* stands for *bhujaṅgavallī*, a serpent long like a creeper, the usual ornament of Śiva. It does not seem to be in the ordinary sense of a creeper. *bhujaṅgavallī* is found in Bhavabhūti's verse (I. 2) in the *Mālatīmādhava*, on which Pūrṇasarasvatī comments thus: *bhujaṅgavallī=latāvat drāghīyān sarpaḥ*. An expression like *devīsakhīḥ* in accusative plural is to be supplied in the context, and construed with *muhyaddhiyaḥ*. The attendants of Pārvatī had noticed some dislocation of the ornament (i.e. *bhujaṅgavallī*) on the body of Śiva, and as a result they were confused as to who might have caused the dislocation. On seeing the confused *devīsakhī-s*, and also because of his own guilty conscience as he was returning to the *antaḥpura* of Pārvatī after having had some good time earlier with Gaṅgā, Śiva pretended to be favourably disposed towards the *devīsakhī-s*, though the pupils of his eyes were tremulous. The very unusual and pretended display of favourable disposition indicated to them that something was fishy about him. This seems to be the idea intended to be conveyed by the verse. Without knowing the context and the source, it is difficult to make more out of it.

[3] MSS. 4 & 6 seem to read *dṛṣṭyā*, as is found in the verse subsequently quoted in *RAS*-1, which, if correct, is to be construed with *vyākulatārayā*, and the word *muhyaddhiyaḥ* in that case will have to be connected with *nigadataḥ*, along with *-prasādam*. But, I think, the expression *muhyaddhiyaḥ* as the object of *dṛṣṭvā* of MS. 5 would make a better meaning.

[4] MSS. 5 & 6 read *vyākulatāntayā nigadito*; others read as given in the text.

गङ्गानूतनसङ्गिनः पशुपतेरन्तःपुरं गच्छतो
नूत्ना सैव दशा स्वयं पिशुनतां देवीसखीनां गता ॥

सैव चौर्येण[1] यथा–

मृद्नन् क्षीरादिचौर्यान्मसृणसुरभिणी सृक्वणी पाणिघर्षै-
राघ्रायाघ्राय हस्तं सपदि परुषयन् किङ्किणीमेखलायाम् ।
वारं वारं विशाले दिशि दिशि विकिरन् लोचने लोलतारे
मन्दं मन्दं जनन्याः परिसरमयते कूटगोपालबालः[2] ॥

परोत्था तु निजस्येव परस्याकार्यतो भवेत् ।
प्रायेणाकारचेष्टाभ्यां तामिमामनुभावयेत् ॥ ३१ ॥
आकारः सात्त्विकश्चेष्टा त्वङ्गप्रत्यङ्गजाः क्रियाः ।
(३२ क-ख)

परोत्था[3] यथा–

प्रीते [4]विधातरि पुरा परिभूय मर्त्यान्
वव्रेऽन्यतो यदभयं स भवानहंयुः ।

[1] *RAS*-1 reads: *saiva cauryeṇa svotthā yathā; RAS*-2 reads merely *svotthā yathā*; MSS. 4, 5 & 6 read what is given in the text.

[2] After this verse (*mṛdnan*, etc.) only *RAS*-1 reads *saivāparādhāt svotthā*, and then *cauryāt parotthā yathā*, without any illustration following. Both of these do not seem to be correct.

[3] Only *RAS*-1 reads *aparādhāt* before *parotthā*.

[4] *RAS*-1 and MS. 4 read: *prīte purā purariрau*; others and the printed edition of the *Anargharāghava* (NSP) read *prīte vidhātari*. The *Vālmīkirāmāyaṇa* mentions that it was *pitāmaha* that gave boons to Rāvaṇa. See this (*VR*, Uttarakāṇḍa, X. 13): *pitāmahas tu suprītaḥ sārdhaṃ devair upasthitaḥ, tava tāvad daśagrīva prīto'smīty abhyabhāṣata, śīghraṃ varaya*, etc.

तन्मर्मणि स्पृशति मामतिमात्रमद्य
हा वत्स शान्तमथवा दशकन्धरोऽसि ।।

(अनर्घराघवे ४. ६)

अत्र गर्विततरावणकृतेन [1]मर्त्येतराभयवरणेन जाता माल्यवतः शङ्का मर्मणि स्पृशतीत्यादिना वागारम्भेण प्रतीयते ।

अथ त्रासः–

[2]त्रासस्तु चित्तचाञ्चल्यं विद्युत्क्रव्यादगर्जितैः ।। ३२ ।।

(ग-घ)

तथा भूतभुजङ्गाद्यैर्विज्ञेयास्तत्र विक्रियाः ।
उत्कम्पगात्रसंकोचरोमाञ्चस्तम्भगद्गदाः ।। ३३ ।।
मुहुर्निमेषविभ्रान्तिपार्श्वस्थालम्बनादयः । (३४ क-ख)

विद्युतो यथा–

वर्षासु तासु क्षणरुक्प्रकाशात्
त्रस्ता रमा शार्ङ्गिणमालिलिङ्ग ।
विद्युच्च सा वीक्ष्य तदङ्गशोभां
ह्रीणेव तूर्णं जलदं जगाहे[3] ।।

क्रव्यादो [4]हिंस्रसत्त्वम् । तस्माद् यथा—

स्वविक्रियादर्शितसाध्वसौघात्
प्रियाभिरालिङ्गितकन्धराणाम् ।

[1] *RAS*-1 and MS. 4 read: *martyanirākaraṇābhayavaraṇena*; *RAS*-2 and MSS. 5 & 6 read: *martyetarābhayavaraṇena*.

[2] See *NŚ*, vol. I, page 373, and the *DR*, IV. 16.

[3] This verse was cited earlier also (pp. 77-8).

[4] *RAS*-2 and MSS. 5 & 6 read *hiṃsrasattvāntaḥ*; *RAS*-1 and MS. 4 read *hiṃsrasattvam*.

अकारि भल्लूककुलेन यत्र
विद्याधराणामनिमित्तमैत्री ॥

गर्जितेन यथा–

प्रणयकोपभृतोऽपि पराङ्मुखाः
सपदि वारिधरारवभीरवः ।
प्रणयिनः परिरब्धुमनन्तरं
ववलिरे वलिरेचितमध्यमाः ॥

(माघकाव्ये ६. ३८)

गर्जितं महारवोपलक्षणम् । तेन भेर्यादिध्वनिरपि भवति ।

भेरीध्वनिना यथा–

ननन्द निद्रारसभञ्जनैरपि
प्रयाणतूर्यध्वनिभिर्धरापतेः ।
अतर्कितातङ्कविलोलपद्मजा-
पयोधरद्वन्द्वनिपीडितो हरिः ॥

भूतदर्शनाद् यथा–

सा पत्युः परिवारेण पिशाचैरपि वेष्टिता ।
उत्कम्पमानहृदया सखीभिः समबोध्यत ॥

भुजङ्गमाद् यथा–

कल्याणदायि भवतोऽस्तु पिनाकपाणि-
पाणिग्रहे भुजगकङ्कणभीषितायाः ।
संभ्रान्तदृष्टि सहसैव नमः शिवाये-
त्यर्धोक्तिसस्मितनतं मुखमम्बिकायाः ॥

(रसकलिकायामप्युल्लिखितमिदम् २३ पुटे)

अथावेगः[1]–

चित्तस्य संभ्रमो यः स्यादावेगोऽयं स चाष्टधा ॥३४॥
(ग-घ)

उत्पातवातवर्षाग्निमत्तकुञ्जरदर्शनात् ।
[2]प्रियाप्रियश्रुतेश्चापि शात्रवव्यसनादपि ॥ ३५ ॥

तत्रौत्पातास्तु शैलादिकम्पकेतूदयादयः ।
तज्जाः सर्वाङ्गविस्रंसो वैमुख्यमपसर्पणम् ॥ ३६ ॥
विषादमुखवैवर्ण्यविस्मयाद्यास्तु विक्रियाः । (३७ क-ख)

शैलप्रकम्पनाद् यथा–

कैलासाद्रावुदस्ते [3]परिचलितगणेषूल्लसत्कौतुकेषु
क्रोडं मातुः कुमारे विशति विषमुचि प्रेक्षमाणे सरोषम् ।
पादावष्टम्भसीदद्वपुषि दशमुखे याति पातालमूलं
क्रुद्धोऽप्याश्लिष्टमूर्तिर्घनतरमुमया पातु हृष्टः शिवो वः ॥

अत्र कैलासकम्पजनितप्रमथगणविस्मयकार्तिकेयापसर्पणकात्यायनी-साध्वसादिभिरनुभावैस्तत्तद्गतसंभ्रमातिशयरूप[4] आवेगो व्यज्यते ।

[1] In MS. 6, the portion from *āvega* to *mada*, a *saṃdhyantara* (III. 92 *ka*) is missing. See note on III. 92 *ka*. On *āvega* see also *NŚ*, vol. I, p. 365, and the *DR*, IV. 28.

[2] MSS. 7, 8 and 9 read *priyāpriyaśrutibhyāṃ ca*; others read as given.

[3] *RAS*-1 reads *paracalati gaṇeṣu*, etc. *RAS*-2 reads *pramathapati-gaṇeṣu*, etc.; MS. 5 reads *paricalitagaṇeṣu*, etc.

[4] *RAS*-1 reads *tadgatasaṃbhrama*, etc; MS. 4 reads: *anubhāvaiś ca janitaḥ saṃbhrama*, etc.; *RAS*-2 and MSS. 5 & 6 read as given in the text.

केतूदयाद् यथा—

हन्तालोक्य कुटुम्बिनो दिविषदां धूमग्रहं दिङ्मुखे
त्रस्ताङ्गास्त्वरितं परस्परगृहानभ्येत्य चिन्तापराः ।
धान्यानामनतिव्ययाय गृहिणीराज्ञापयन्त्यो मुहु-
र्निध्यायन्ति विनिःश्वसन्ति गणशो रथ्यामुखेष्वासते।।

अथ वातावेगः—

त्वरयागमनं वस्त्रग्रहणं चावकुण्ठनम् ।। ३७ ।। (ग-घ)
नेत्रावमार्जनाद्याश्च वातावेगभवाः क्रियाः।
(३८ क-ख)

यथा—

दिक्षु [1]व्यूढाङ्घ्रिपाङ्गस्तृणजटिलचलत्पांसुदण्डोऽन्तरिक्षे
[2]झाङ्कारी शर्करालः पथिषु विटपिनां स्कन्ध-
काषैः सधूमः ।
प्रासादानां निकुञ्जेष्वभिनवजलदोद्गारगम्भीरधीर-
श्चण्डारम्भः समीरो वहति परिदिशं भीरु किं
संभ्रमेण ।।
(वेणीसंहारे २. १९)

अत्र [3]वातकृतसंरम्भो वागारम्भेण प्रतिपाद्यते ।

[1] *RAS*-1 and *RAS*-2 read *-kṣiptāṅghri*, etc. Jagaddhara's commentary reads *vyūḍhāṅghripāṅga*, etc.

[2] *RAS*-1, *RAS*-2 and MS. 4 read *śātkārī*; MS. 5 reads *jhāṅkārī*.

[3] *RAS*-2 and MS. 5 read: *vātāśritasaṃrambho*; MS. 4 reads: *vātagatasaṃrambhopāttavegenāvegaḥ pratīyate*; *RAS*-1 reads *vātakṛtasaṃrambho*, etc.

अथ वर्षावेगः—

[1]छत्रग्रहोऽङ्गसंकोचो बाहुस्वस्तिकधावने ।। ३८ ।।
(ग-घ)

[2]उष्णाश्रयणमित्याद्या वर्षावेगभवाः क्रियाः ।
(३९ क-ख)

यथा—

आमेखलं संचरतां घनानां
छायामधः सानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः ।।
(कुमार. १. ५)

अत्र सिद्धानामग्रशिखरधावनेन संभ्रमः सूचितः ।

अथाग्न्यावेगः—

अग्न्यावेगभवाश्चेष्टा वीजनं चाङ्गधूननम् ।। ३९ ।।
(ग-घ)

व्यत्यस्तपदविक्षेपनेत्रसंकोचनादयः । (४० क-ख)

यथा—

दूरप्रोत्सार्यमाणाम्बरचरनिकरोत्तालकीलाभिघातः
प्रभ्रश्यद्वाजिवर्गभ्रमणनियमनव्याकुलब्रध्नसूतः।

[1] MS. 4 reads *vastragraho'ṅgasaṃkocaḥ*; *RAS*-1, *RAS*-2 and MS. 5 read *chatragraho 'ṅga*, etc.

[2] *RAS*-1 & MSS. 7, 8 & 9 read *channaśravaṇam*; MS. 4 reads: *mandagrahaṇam*; *RAS*-2 and MS. 5 read: *uṣṇāśrayaṇam*; some syllables are missing in MS. 10 here.

लेढि प्रौढो हुताशः कृतलयसमयाशङ्कमाकाशवीथीं
गङ्गासूनुप्रयुक्तप्रथितहुतवहास्त्रानुभावप्रसूतः ॥
(धनंजयविजयं ६१)

अथ कुञ्जरावेगः–

आवेगे कुञ्जरोद्भूते सत्वरं चापसर्पणम् ॥ ४० ॥
(ग-घ)

विलोकनं मुहुः पश्चात् त्रासकम्पादयो मताः ॥
(४१ क-ख)

यथा–

निरन्तरालेऽपि विमुच्यमाने दूरं पथि प्राणभृतां गणेन ।
तेजोमहद्भिस्तमसेव दीपैर्द्विपैरसंबाधमयांबभूवे ॥
(माघे ३. ६७)

अत्र कुञ्जरग्रहणमश्वादीनामप्युपलक्षणम् ।

अश्वेन यथा–

उत्खाय दर्पचलितेन सहैव रज्ज्वा
कीलं प्रयत्नपरमानवदुर्ग्रहेण ।
आकुल्यकारि कटकस्तुरगेण तूर्ण-
मश्वेति विद्रुतमनुद्रवताश्वमन्यम् ॥ (माघे ५. ५९)

प्रियश्रवणाद् यथा–

प्रियश्रवणजे ह्यस्मिन्नभ्युत्थानोपगूहने ॥ ४१ ॥
(ग-घ)

प्रीतिदानं प्रियं वाक्यं रोमहर्षादयोऽपि च ।
(४२ क-ख)

यथा–

[1]जनाय शुद्धान्तचराय शंसते
कुमारजन्मामृतसंमिताक्षरम् ।
अदेयमासीत् त्रयमेव भूपतेः
[1]शशिप्रभं छत्रमुभे च चामरे ॥ (रघु. ३. १६)

प्रियश्रवणं प्रियदर्शनस्याप्युपलक्षणम् । तेन यथा–

अवलोक एव नृपतेः स्म दूरतो
रभसाद् रथादवतरीतुमिच्छतः ।
अवतीर्णवान् प्रथममात्मना हरि-
र्विनयं विशेषयति संभ्रमेण सः ॥ (माघे १३. ७)

अप्रियश्रुतेर्यथा–

अप्रियश्रुतिजेऽप्यस्मिन् विलापः [2]परिवर्तनम् ॥ ४२ ॥ (ग-घ)

आक्रन्दितं च पतनं परितो भ्रमणादयः । (४३ क-ख)

यथा–

स कीचकनिषूदनो बकहिडिम्बकिर्मीरहा
मदान्धमगधाधिपद्विरदसंधिभेदाशनिः ।
गदापरिघपाणिना भुजयुगेन तेनान्वितः
प्रियस्तव ममानुजोऽर्जुनगुरुर्गतोऽस्तं किल ॥
(वेणीसंहारे ६. १८)

[1] The illustration *janāya śuddhānta*, etc. and the comments *priyaśravaṇam*, etc. are missing in *RAS*-1 and MS. 4; *RAS*-2 and MS. 5 give them clearly.

[2] *RAS*-2 and MS. 5 read *parikīrtanam*; others read: *parivartanam*.

शात्रवाद् यथा–

चेष्टाः स्युः शात्रवावेगे वर्मशस्त्रादिधारणम् ।। ४३ ।।
(ग-घ)

रथवाजिगजारोहसहसापक्रमादयः । (४४ क-ख)

यथा–

रामो नाम बभूव हुं तदबला सीतेति हुं तां पितु-
र्वाचा पञ्चवटीवने [1]निवसतस्तस्याहरद् रावणः ।
[2]कृष्णेनेति पुरातनीं निजकथामाकर्ण्य मात्रेरितां
सौमित्रे क्व धनुर्धनुर्धनुरिति [3]प्रोक्ता गिरः
पान्तु वः ।।

(वसुंधरस्येति शार्ङ्गधरपद्धतौ १२०; कृष्णकर्णामृतेऽपि २. ७१)

एते स्युरुत्तमादीनामनुभावा यथोचितम् ।। ४४ ।।
(ग-घ)

अथोन्मादः–

[4]उन्मादश्चित्तविभ्रान्तिर्वियोगादिष्टनाशतः ।
वियोगजे तु चेष्टाः स्युर्धावनं परिदेवनम् ।। ४५ ।।
असंबद्धप्रलपनं शयनं सहसोत्थितिः ।
अचेतनैः सहालापो निर्निमित्तस्मितादयः ।। ४६ ।।

[1] This is the reading in *Śārṅgadharapaddhati*; *RAS*-1, *RAS*-2 and MSS. 4 & 5 read: *viharataḥ.*

[2] This is the reading in the printed edn. of the *Śārṅgadharapaddhati*; *RAS*-1, *RAS*-2 and MSS. 4 & 5 read the foot thus: *nidrārthaṃ jananīkathām iti harer huṃkārataḥ śṛṇvataḥ.*

[3] MSS. of the *RAS* read *vyagrā* (for *proktā*) of *Śārṅgadharapa.*

[4] See *NŚ*, vol. I, page 372, and the *DR*, IV. 30.

यथा–

आशूत्थानं सदृशगणना चेतनाचेतनेषु
प्रौढोष्माभिश्वसितमसकृन्निर्गतो बाष्पपूरः ।
निर्लक्ष्या वाग् गतिरविषया निर्निमित्तं स्मितं च
प्रायेणास्याः प्रथयतितरां [1]भ्रान्तिदात्रीमवस्थाम् ।।

इष्टनाशाद् यथा–

इष्टनाशकृते त्वस्मिन् भस्मादिपरिलेपनम् ।
नृत्तगीतादिरचना तृणनिर्माल्यधारणम् ।। ४७ ।।
चीवरावरणादीनि प्रागुक्ताश्चापि विक्रियाः ।
(४८ क-ख)

यथा करुणाकन्दले–

कीनाशोऽपि बिभेति यादवकुलाद् वृद्धस्य का मे गति-
र्भेदः स्यात् स्वजनेषु किं नु शतधा सीदन्ति गात्राणि मे ।
सोऽयं बुद्धिविपर्ययो मम समं सर्वे हता बान्धवा
न श्रद्धेयमिदं हि वाक्यमहहा मुह्यन्ति मर्माणि मे ।।

अथापस्मृतिः[2]–

धातुवैषम्यदोषेण भूतावेशादिना कृतः ।। ४८ ।।
(ग-घ)
चित्तक्षोभस्त्वपस्मारस्तत्र चेष्टाः प्रकम्पनम् ।
धावनं पतनं स्तम्भो भ्रमणं नेत्रविक्रियाः ।। ४९ ।।

[1] *RAS*-1 reads *dhātrīm*; MS. 4 reads *yātrām*; *RAS*-2 and MS. 5 read: *-dātrīm avasthām*.

[2] See *NŚ*, vol. I, page 368 and the *DR*, IV. 25.

स्वोष्ठदंशभुजास्फोटलालाफेनादयोऽपि च ।

(५० क-ख)

यथा—

लालाफेनव्यतिकरपरिक्लेदिभुग्नोष्ठपार्श्वं
गायं गायं कलितरुदितं प्रोन्नमन्तं [1]पतन्तम् ।
स्तब्धोद्वृत्तक्षुभितनयनं मण्डलेन भ्रमन्तं
भूताविष्टं कमपि पुरुषं तत्र वीथ्यामपश्यम् ॥

दोषवैषम्यजस्त्वेष व्याधिरेवेत्युदास्महे ॥ ५० ॥

(ग-घ)

अथ व्याधिः[2]—

दोषोद्रेकवियोगाद्यैर्ज्वरः [3]स्याद् व्याधिरत्र तु ।
गात्रस्तम्भः श्लथाङ्गत्वं कूजनं मुखकूणनम् ॥ ५१ ॥
[4]स्रस्ताङ्गताक्षिविक्षेपनिःश्वासाद्यास्तु विक्रियाः ।
सशीतो दाहयुक्तः स द्विविधः परिकीर्तितः ॥ ५२ ॥
[5](शीतज्वरे तु चेष्टाः स्युः संतापश्चाङ्गसादनम्) ।
हनुसंचालनं बाष्पः सर्वाङ्गोत्कम्पकूजने ।
जानुकुञ्चनरोमाञ्चमुखशोषादयोऽपि च ॥ ५३ ॥

[1] *RAS*-1 reads *namantam*; *RAS*-2 and MSS. 4 & 5 read: *patantam*.

[2] See *NŚ*, vol. I, page 371 and the *DR*, IV. 29.

[3] *RAS*-2 and MSS. 5, 7, 8, 9 and 10 read: *jvarātmā*; *RAS*-1 and MS. 4 read: *jvaraḥ syād*.

[4] *RAS*-1 reads: *srastākṣatāṅgavikṣepa*, etc. . . . *sa dvidhā, saśīto dāhayuktaś ca saśīte tatra vikriyāḥ*. Others read as given in the text.

[5] This half *kārikā* is found only in *RAS*-2.

यथा–

रोमाञ्चमङ्कूरयति प्रकामं स्पर्शेन सर्वाङ्गकसंगतेन ।
दोःस्वस्तिकाश्लिष्टपयोधराणां शीतज्वरः कान्त
इवाङ्गनानाम् ।।

दाहज्वरे तु चेष्टाः स्युः शीतमाल्यादिकाङ्क्षणम् ।
पाणिपादपरिक्षेपमुखशोषादयोऽपि च ।। ५४ ।।

यथा–

शय्या पुष्पमयी परागमयतामङ्गार्पणादश्नुते
ताम्यन्त्यन्तिकतालवृन्तनलिनीपत्राणि देहोष्मणा ।
न्यस्तं च स्तनमण्डले मलयजं [1]शीर्णान्तरं दृश्यते
क्वाथादाशु भवन्ति फेनिलमुखा भूषामृणालाङ्कुराः ।।

अथ मोहः[2]–

आपद्भीतिवियोगाद्यैर्मोहश्चित्तस्य मूढता ।
विक्रियास्तत्र विज्ञेया इन्द्रियाणां च शून्यता ।। ५५ ।।
निश्चेष्टताङ्गभ्रमणपतनाघूर्णनादयः । (५६ क-ख)

आपदो यथा–

ततोऽभिषङ्गानिलविप्रविद्धा प्रभ्रश्यमानाभरणप्रसूना ।
स्वमूर्तिलाभप्रकृतिं धरित्रीं लतेव सीता सहसा जगाम ।।
(रघु. १४. ५४)

[1] *RAS*-1 reads: *dīrṇāntaram*; *RAS*-2 and MS. 5 read: *bhraśyat-.aram*; MS. 4 reads: *śīrṇāntaram.*

[2] See *NŚ*, vol. I, page 362 and the *DR*, IV. 26.

भीतेर्यथा–

स्मरस्तथाभूतमयुग्मनेत्रं
पश्यन्नदूरान्मनसाप्यधृष्यम् ।
नालक्षयत् साध्वससन्नहस्तः
स्रस्तं शरं चापमपि स्वहस्तात् ।।

(कुमार. ३. ५१)

वियोगाद् यथा–

तद्वक्त्रं नयने च ते स्मितसुधामुग्धं च तद् वाचिकं
सा वेणी स भुजक्रमोऽतिसरलो लीलालसा सा गतिः ।
तन्वी सेति च सेति सेति सततं तद्ध्यानबद्धात्मनो
निद्रा नो न रतिर्नचापि विरतिः शून्यं मनो वर्तते ।।

(रसकलिकायामपि ३२)

अथ मृतिः[1]–

वायोर्धनंजयाख्यस्य[2] विप्रयोगो य आत्मना ।। ५६ ।।

(ग-घ)

[1] See *NŚ*, vol. I, page 372 and the *DR*, IV. 21. Dhanika notes in this context: *śṛṅgārāśrayatvena maraṇe vyavasāyamātram upanibandhanīyam. anyatra kāmacāraḥ* (p. 185). See also Bhaṭṭanṛsiṃha's comments on this. The *Rasakalikā* also says thus: *maraṇaṃ suprasiddhatvāt tanna kāmyeṣu* (*kāvyeṣu?*) *kīrtyate* (page 25, Madras, R2241) and again, on page 35, *sākṣān maraṇaṃ na varṇyate.* See also fn. II. 202.

[2] MSS. 7 & 8 read: *vāyor digīcchayākhyasya*; others read *dhanaṃjayākhyasya*. Commenting on the *Kirātārjunīya* XI. 45, *kṣatriyas tanayaḥ pāṇḍor ahaṃ pārtho dhanaṃjyaḥ*, Mallinātha notes: *dhanaṃjaya ity ukte śarīrastho vāyuḥ . . . syāt, tadarthaṃ pārtha* (*ity uktam*), etc.

शरीरावच्छेदवता[1] मरणं नाम तद् भवेत् ।
एतच्च द्विविधं प्रोक्तं व्याधिजं चाभिघातजम् ।। ५७ ।।
आद्यं त्वसाध्यहृच्छूलविषूच्यादिसमुद्भवम् ।
अमी तत्रानुभावाः स्युरव्यक्ताक्षरभाषणम् ।। ५८ ।।
विवर्णगात्रता [2]मन्दश्वासादि स्तम्भमीलने ।
हिक्का परिजनापेक्षानिश्चेष्टेन्द्रियतादयः ।। ५९ ।।

यथा–

काये सीदति कण्ठरोधिनि कफे कुण्ठे च [3]वाणीपथे
जिह्मायां [4]दृशि जीविते जिगमिषौ श्वासे शनैः शाम्यति ।
आगत्य स्वयमेव नः करुणया कात्यायनीवल्लभः
कर्णे वर्णयताद् भवार्णवभयादुत्तारकं तारकम् ।।

द्वितीयं घातपतनदाहोद्बन्धविषादिजम्[5] ।
तत्र घातादिजे भूमिपतनक्रन्दनादयः ।। ६० ।।

यथा अभिरामराघवे–

आर्यशरपातविवरादुद्बुद्बुदफेनिलास्रकर्दमिता ।
अपतन्न चलति किंचिद् विकृताकृतिरद्य वज्रनिहतेव ।।

[1] *RAS*-2 and MSS. 5, 7, 8, 9 & 10 read *śarīrāvacchedavatām*; MS. 4 reads: *śarīrāvacchedavataḥ* (and *ātmanaḥ*); *RAS*-1 reads as given in the text.

[2] MSS. 7, 8, 9 and 10 read: *mandaśvāsoktistambhamīlane*; others read as given in the text.

[3] *RAS*-2 & MS. 5 read: *kaṇṭhasya kolāhale, jihvāṃ muñcati*, etc.

[4] *RAS*-1 & MS. 4 read: *kuṇṭhe ca vāṇīpathe, jihmāyāṃ dṛśi*, etc.

[5] *RAS*-2 and MS. 5 read: *-viṣādikam*; others read: *-viṣādijam*.

विषं तु वत्सनाभाद्यमष्टौ वेगास्तदुद्भवाः ।
कार्ष्ण्यं कम्पो दाहो हिक्का फेनश्च कन्धराभङ्गः
॥ ६१ ॥
जडता मृतिरिति कथिताः क्रमशः प्रथमाद्या[1]
वेगजाश्चेष्टाः ।
(६२ क-ख)

यथा प्रियदर्शिकायाम्–

एषा मीलयतीदमक्षियुगलं जाता ममान्धा दिशः
कण्ठोऽस्या उपरुध्यते मम गिरो निर्यान्ति
कृच्छ्रादिमाः ।
एतस्याः श्वसितं हृतं मम तनुर्निश्चेष्टतामागता
मन्येऽस्या विषवेग एव हि परं सर्वं तु दुःखं मयि ॥
(४. ६)

अत्राक्षिनिमीलनकण्ठरोधननिःश्वासायासादिभिरारण्यिकाया विषवेगजनिता मृतिरवगम्यते ।

[1] *RAS*-1 and MSS. 4 & 5 read: *prathamādivegajāḥ*; *RAS*-2 reads: *kārśyaṃ kampo*, etc. and *patanādyabhighātajāś ceṣṭāḥ*; MSS. 7, 8, 9 and 10 read: *prathamādyā vegajāś ceṣṭāḥ*. See *NŚ*, (vol. I, page 373) which notes the following: *kārśya*, *vepathu*, *vidāha*, *hikkā*, *phena*, *skandhabhaṅga*, *jaḍatā*, *maraṇānīti aṣṭau viṣavegāḥ*; *atra ślokau bhavataḥ*: *kārśyaṃ tu prathame vege*, etc. Kāṭayavema in his commentary on the *Mālavikāgnimitra* notes thus (on IV. 4): *viṣavegāstu Vasantarājīye kathitāḥ*: *vaivarṇyaṃ vepathur dāhaḥ phenaḥ skandhasya bhañjanam, duḥkhaṃ jāḍyaṃ mṛtiś ceti viṣavegāḥ syur aṣṭadhā*. The *Bhagavadajjukīya*, on the other hand, notes *sapta viṣavegāḥ*: *romāñco mukhaśoṣaś ca vaivarṇyaṃ caiva vepathuḥ, hikkā śvāsaś ca saṃmohaḥ saptaite viṣavegajāḥ*(verse 34). See also the *Carakasaṃhitā* and the commentary on page 572 (NSP, 1941).

अथालस्यम्—

स्वभावश्रमसौहित्यगर्भनिर्भरतादिभिः ।। ६२ ।।

(ग-घ)

कृच्छ्रात् क्रियोन्मुखत्वं यत् [1]तदालस्यमिह क्रियाः ।
अङ्गभङ्गः क्रियाद्वेषो जृम्भणाक्षिविमर्दने ।। ६३ ।।
शय्यासनैकप्रियता तन्द्रीनिद्रादयोऽपि च । (६४ क-ख)

स्वभावश्रमाभ्यां यथा—

मुहुरिति वनविभ्रमाभिषङ्गा-
दतमि तदा नितरां नितम्बिनीभिः ।
मृदुतरतनवोऽलसाः प्रकृत्या
चिरमपि ताः किमुत प्रयासभाजः ।। (माघे ७. ६८)

सौहित्यं भोजनादितृप्तिः । तेन यथा—

त्रैलोक्याभयलग्नकेन भवता वीरेण विस्मारित-
स्तज्जीमूतमुहूर्तमण्डनधनुःपाण्डित्यमाखण्डलः ।
किं चाजस्रमखार्पितेन हविषा संफुल्लमांसोल्लस-
त्सर्वाङ्गीणवलीविलुप्तनयनव्यूहः कथं वर्तते ।।
(अनर्घराघवे १. २८)

अत्र मेदोवृद्धया शक्रस्य सौहित्यम् । तत्कृतमालस्यं कथं वर्तते इत्यनेन वागारम्भेण व्यज्यते ।

गर्भनिर्भरतया यथा—

आसनैकप्रियस्यास्याः सखीगात्रावलम्बिनः ।
गर्भालसस्य वपुषो भारोऽभूत् स्वाङ्गधारणम् ।।

[1] See *NŚ*, vol. I, page 361, and the *DR*, IV. 27.

अथ जाड्यम्[1]–

जाड्यमप्रतिपत्तिः स्यादिष्टानिष्टार्थयोः श्रुतेः ।। ६४।।
(ग-घ)

[2]दृष्टेर्वा विरहादेश्च क्रियास्तत्रानिमेषता ।
अश्रुतिः पारवश्यं च तूष्णींभावादयोऽपि च ।। ६५ ।।

इष्टश्रुतेर्यथा–

प्रियेऽपरा[3] यच्छति वाचमुन्मुखी
निबद्धदृष्टिः शिथिलाकुलोच्चया ।
समादधे नांशुकमाहितं वृथा
न वेद पुष्पेषु च पाणिपल्लवम् ।।
(किरातार्जुनीये ८. १५)

अत्र प्रियवाक्यश्रवणजनितजाड्यमनिमेषत्वादिना व्यज्यते ।

प्रियदर्शनाद् यथा–

एहइ सो वि पउत्थो अहं अ कुप्पेज्ज सो वि अणुणेज्ज ।
इअ चिंतंती बहुआ दट्ठूण पिअं ण किं पि सम्मरइ ।।

(छाया–

एष्यति सोऽपि प्रोषितः अहं च कुप्येयं सोऽप्यनुनेष्यति ।
इति चिन्तयन्ती वधूर्दृष्ट्वा प्रियं न किमपि संस्मरति ।।)
(पूर्वार्धमात्रं गाथासप्तशत्यां दृश्यते १. १७)

[1] See *NŚ*, vol. I, page 366, and the *DR*, IV. 13.
[2] *RAS*-2 and MS. 5 read: *iṣṭair vā*; others read: *dṛṣṭer vā*.
[3] The example *priye 'parā yacchati*, etc. and the expressions *priyadarśanād yathā* are missing in MS. 4 only.

अत्र प्रियदर्शनजनितं जाड्यं पूर्वचिन्तितक्रियाविस्मरणेन व्यज्यते ।

अप्रियश्रवणाद् यथा–

आपुच्छन्तस्स बहू गमिदुं दइअस्स सुणिअ अद्धोत्तिम् ।
अणुमंणिदुं न जाणइ ण[1] णिवारेदुं परवसा उवह ।।

(छाया–

आपृच्छमानस्य वधूर्गन्तुं दयितस्य श्रुत्वा अर्धोक्तिम् ।
अनुमन्तुं न जानाति न निवारयितुं परवशा [2]पश्यत ।।)

अनिष्टदर्शनाद् यथा ममैव–

ससुरेण ढज्जमाणे घरणिअडभवे णिउंजपुंजंमि ।
ण सुणइ सुण्हा सुण्णा बहुसो कहिदं वि [3]ससुराए ।।

(छाया–

श्वशुरेण [4]दह्यमाने गृहनिकटभवे निकुञ्जपुञ्जे ।
न शृणोति स्नुषा शून्या बहुशः कथितमपि श्वश्र्वा ।।)

वियोगाद् यथा–

पप्रच्छ पृष्टमपि गद्गदिकार्तकण्ठः
शुश्राव नोक्तमपि शून्यमनाः स किंचित् ।

[1] *ṇa ṇivāredum* is very clear in MS. 4; *ṇa* is missing in *RAS*-1; Prakrit portion is missing in *RAS*-2 and MS. 5.

[2] MS. 4 reads: *adṛśyata*; MS. 5 reads: *apaśyat*; *RAS*-1 and *RAS*-2 read *paśyata*.

[3] *RAS*-2 and MS. 5 read: *sāsāe*; *RAS*-1 and MS. 4 read: *sasurāe*.

[4] *RAS*-2 and MS. 5 read: *dharṣyamāṇe*; *RAS*-1 and MS. 4 read: *dahyamāne*.

सस्मार न स्मृतमपि क्षणमात्मकृत्यं
[1]श्रुत्वाहमित्युपगतोऽपि न संविवेद ।।
(अभिनन्दस्य रामचरिते १६. ६१)

अत्र सीताविरहजनितं [2]रावणस्य जाड्यं पुनःप्रश्नश्रुत्यादिभिरवगम्यते ।

अथ व्रीडा[3]–

अकार्यकरणावज्ञास्तुतिनूतनसंगमैः ।
प्रतीकाराक्रियाद्यैश्च व्रीडात्वनतिधृष्टता ।। ६६ ।।
तत्र चेष्टा निगूढोक्तिराधोमुख्यविचिन्तने ।
अनिर्गमो बहिः क्वापि दूरादेवावगुण्ठनम् ।। ६७ ।।
[4]नखानां कृन्तनं भूमिलेखनं चैवमादयः ।। (६८ क-ख)

[1] In the last foot of this verse, the printed edition of Abhinanda's text (Baroda 1930) has the reading according to the MS. (A) as: *kutrāham ity upagato'pi*, etc. instead of *śrutvāham*, etc. of the MSS. B, C & D.

[2] The printed editions and the MSS. 4 & 5 of the *RAS* read *rāmasya jāḍyam . . . (avagamyate)*. Other MSS. do not have the portion. But, I think the correct reading should be *rāvaṇasya jāḍyam*, etc. The reading of *rāmasya* was probably a mistake of some scribe or other due to ignorance of the context. This is verse 61 in the 19th Canto of the *Rāmacarita* of Abhinanda, and it describes in the context the mental condition of Rāvaṇa caused by his blind infatuation for Sītā. The verse 54 in the same Canto, mentions the arrival of Rāvaṇa at the Aśokavanikā wherein Sītā was confined. The verse 54 is as follows: *atrāntare madanavātavidhūtanidraḥ sa drāg dhṛtānyaracano rajanīcarendraḥ, divyāṅganāśatagṛhītamaṇipradīpaḥ prāpat tam eva madalolapadaḥ pradeśam* (XIX. 54). The verse *papraccha*, etc. (XIX. 61), which occurs in this context, describes the *jāḍya* of Rāvaṇa, and not of Rāma. We should therefore read *rāvaṇasya jāḍyam*.

[3] On *vrīḍā* see *NŚ*, vol. I, page 363, and the *DR*, IV. 24.

[4] *RAS*-1 reads: *nakhānām añcalaiḥ*; MS. 4 reads: *nakhanistodanam*, which is also given in the footnote in *RAS*-1. Others read: *nakhānāṃ kṛntanam.*

अकार्यकरणाद् यथा–

गुर्वादेशादेव निर्मीयमाणो
नाधर्माय स्त्रीवधोऽपि स्थितोऽयम् ।
अद्य स्थित्वा श्वो गमिष्यद्भिरल्पै-
र्लज्जास्माभिर्मीलिताक्षैर्जितैव ॥

(अनर्घराघवे २. ५६)

अवज्ञया यथा–

अवधूयारिभिर्नीता हरिणैस्तुल्यवृत्तिताम् ।
अन्योन्यस्यापि जिह्रीमः किं पुनः सहवासिनाम् ॥

(किरातार्जुनीये ११. ५८)

स्तुत्या यथा–

तस्य संस्तूयमानस्य चरितार्थैस्तपस्विभिः ।
शुशुभे विक्रमोदग्रं व्रीडयावनतं शिरः ॥

(रघुवंशे १५. २७)

नवसंगमेन यथा–

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् ।
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः [1]प्रथमपरिभोगे नववधूः ॥

(अमरुकस्य ४१)

[1] *RAS*-1 reads: *prathamaparibhoge*; all others, including the editions of Amaruka, read *prathamaparihāse*; MSS. of Dhanika's *Avaloka* which too quotes this verse read *prathamaparihāse*. Perhaps the significance intended is the same in both the expressions.

प्रतीकाराकरणाद् यथा—

[1]उद्वृत्तारिकृताभिमन्युनिधनप्रोद्भूततीव्रक्रुधः
पार्थस्याकृतशात्रवप्रतिकृतेरन्तः शुचा मुह्यतः ।
कीर्णा बाष्पकणैः पतन्ति धनुषि व्रीडाजडा दृष्टयो
हा वत्सेति गिरः स्फुरन्ति न पुनर्निर्यान्ति कण्ठाद् बहिः ।।

(निशानारायणस्येति शार्ङ्गधरपद्धतिः)

अथावहित्था[2]—

अवहित्थाकारगुप्तिर्जैह्म्यप्राभवनीतिभिः ।। ६८ ।।

(ग-घ)

लज्जासाध्वसदाक्षिण्यप्रागल्भ्यापजयादिभिः ।
अन्यथाकथनं मिथ्याधैर्यमन्यत्र वीक्षणम् ।। ६९ ।।
कथाभङ्गादयोऽप्यस्यामनुभावा भवन्त्यमी ।

(७० क-ख)

जैह्म्याद् यथा—

लिङ्गैर्मुदः संवृतविक्रियास्ते
ह्रदाः प्रसन्ना इव गूढनक्राः ।
वैदर्भमामन्त्र्य ययुस्तदीयां
प्रत्यर्प्य पूजामुपदाच्छलेन ।। (रघु. ७. ३०)

[1] *Pratyagrāri*, etc. is the reading in *Śārṅgadharapaddhati*, instead of *udvṛttāri*, etc.

[2] See *NŚ*, vol. I, p. 370 and the *DR*, IV. 29.

प्राभवाद् यथा–

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ।।

(उत्तररामचरिते ३. १)

नीत्या यथा–

बहिः सर्वाकारप्रवणरमणीयं व्यवहरन्
परा‌भ्यूहस्थानान्यपि तनुतराणि स्थगयति ।
जनं विद्वानेकः सकलमतिसंधाय कपटै-
स्तटस्थः स्वानर्थान् घटयति च मौनं च भजते ।।

(मालतीमाधवे १. १७)

लज्जया यथा–

चिक्षेप लक्ष्मीर्निटिलान्नखाग्रैः
प्रस्वेदवार्यातपमाक्षिपन्ती ।
जुगोप देवोऽपि स रोमहर्षं
जडाब्धिवाताहतिकैतवेन[1] ।।

(कन्दर्पसंभवे इति चमत्कारचन्द्रिका-पुटं १०३)

[1] The *Camatkāracandrikā* of Viśveśvara quotes this verse (*cikṣepa lakṣmīr*, etc.) and says that it is from the *Kandarpasaṃbhava*. The verse is introduced also with the expression *mamaiva*. Perhaps, some of the beautiful verses on Lakṣmī and Viṣṇu (or Hari) quoted in the *RAS*. were also from the *Kandarpasaṃbhava*, though it is not expressly stated so. See, for instance, the verses (1) *varṣāsu tāsu*, etc. (on pp. 77-8), (2) *duṣṭa kāliya*, etc. (on page 86), (3) *tanayāṃ tava yācate hariḥ*, etc. (on page 100), and (4) *śriyo mānaglāneḥ*, etc. (on page 125), which probably came from the same source. See also note 1, p. 192.

साध्वसेन यथा—

श्रुत्वा दुःश्रवमद्भुतं च मिथिलावृत्तान्तमन्तःपत-
च्चिन्तापल्लवसावहित्थवदनत्वग्विप्रकीर्णस्मितः ।
हेलाकृष्टसुरावरोधरमणीसीमन्तसंतानक-
स्रग्वासोज्ज्वलपाणिरप्यवति मां वत्सो न लङ्केश्वरः ।।

(अनर्घराघवे ४. ८)

दाक्षिण्याद् यथा—

त्वय्यर्धासनभाजि किंनरगणोद्गीतैर्भवद्विक्रमै-
रन्तःसंभृतमत्सरोऽपि भगवानाकारगुप्तौ कृती ।
उन्मीलद्भवदीयदक्षिणभुजारोमाञ्चविद्धोच्चर-
द्बाष्पैरेव विलोचनैरभिनयत्यानन्दमाखण्डलः ।।

(अनर्घराघवे १. २९)

प्रागल्भ्येन यथा—

एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद् दूरत-
स्ताम्बूलाहरणच्छलेन रभसाश्लेषोऽपि संविघ्नितः ।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ।।

(अमरुकस्य १८)

अथ स्मृतिः—

स्वास्थ्यचिन्तादृढाभ्याससदृशालोकनादिभिः ।। ७० ।।

(ग-घ)

स्मृतिः पूर्वानुभूतार्थप्रतीतिस्तत्र विक्रियाः ।
कम्पनोद्वहने[1] मूर्ध्नो भ्रूविक्षेपादयोऽपि च ।। ७१ ।।

स्वास्थ्येन यथा—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ।।

(अभिज्ञानशाकुन्तले ५. २)

चिन्तया यथा—

लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च ।
सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभि-
श्चिन्तासंततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया ।।

(मालतीमाधवे ५. १०)

दृढाभ्यासेन यथा—

तद् वक्त्रं नयने च ते स्मितसुधामुग्धं च तद् वाचिकं
सा वेणी स भुजक्रमोऽतिसरलो लीलालसा सा गतिः ।
तन्वी सेति च सेति सेति सततं तद्ध्यानबद्धात्मनो
निद्रा नो न रतिर्न चापि विरतिः शून्यं मनो वर्तते ।।

(रसकलिकायामपि ३२ पुटे)

[1] MSS. 8 & 9 read *kampanodveṣṭane*; others read as given in the text. On *smṛti*, see also the *NŚ*, vol I, p. 362 and the *DR*, IV. 20.

सदृशालोकनेन यथा—

आरक्तराजिभिरियं कुसुमैर्नवकन्दली सलिलगर्भैः ।
कोपादन्तर्बाष्पे स्मरयति मां लोचने तस्याः ॥

(विक्रमोर्वशीये ४. १५)

अथ [1]वितर्कः—

ऊहो वितर्कः संदेहविमर्शप्रत्ययादिभिः ।
जनितो निर्णयान्तः स्यादसत्यः सत्य एव वा ॥ ७२ ॥
तत्रानुभावाः स्युरमी भ्रूशिरःकम्पनादयः ॥

(७३ क-ख)

संदेहप्रत्ययाद् यथा—

अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च संजगरिरे भूच्छायमैच्छन् परे ।
इन्दौ यद् दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तत् सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमा-
चक्ष्महे[2] ॥

(वल्लभस्य सुभाषितावलौ दृश्यते)

अत्र चन्द्रगतकलङ्कविषये बहुविधप्रतिपत्त्या संदिहानस्य [3]चन्द्र-गिलितान्धकारोऽयमित्यसत्यात्मकस्तर्को भवति ।

[1] See *NŚ*, vol. I, p. 374 and the *DR*, the line after IV. 28.

[2] This verse (*aṅkaṃ ke 'pi*, etc.) is given in Vallabha's *Subhāṣitāvali* and is also quoted by Appayadīkṣita in his *Kuvalayānanda*. It is attributed to Bilhaṇa. See *Caurapañcāśikā* 46.

[3] MS. 4 and *RAS*-1 read: *candramilita*, etc. *RAS*-2 and MS. 5 read: *candragilita*, etc.

विमर्शो विचारः । तेन यथा–

गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं
श्वसितमधिकं किं न्वेतत् स्यात् किमन्यदतोऽथ वा ।
भ्रमति भुवने कन्दर्पाज्ञा विकारि च यौवनं
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम् ।।
(मालतीमाधवे १. २०)

अत्र माधवगतां चिन्तामुपलभ्य किमत्र कारणमिति विमृशता मकरन्देन मन्मथनिबन्धन एवायं भाव इति [1]सत्यनिर्णयान्तो वितर्कः ।

अथ [2]चिन्ता–

इष्टवस्त्वपरिप्राप्तेरैश्वर्यभ्रंशनादिभिः ।। ७३ ।।
(ग-घ)
चिन्ता ध्यानात्मिका तस्यामनुभावा भवन्त्यमी ।
कार्श्याधोमुख्यसंतापनिःश्वासोच्छ्वसनादयः ।। ७४ ।।

इष्टवस्त्वलाभेन यथा–

ईसिवलिआवणआ से कूणितपक्खंततारअ त्थिमिआ ।
दिट्ठी कपोलपाली णिहिआ करपल्लवे मनो सुण्णं ।।

(छाया–

ईषद्वलितावनताऽस्याः कूणितपक्ष्मान्ततारका स्तिमिता ।
दृष्टिः कपोलपाली निहिता करपल्लवे मनः शून्यम् ।।)

[1] *RAS*-1 reads *samyaṅnirṇayāntaḥ*; *RAS*-2 and MSS. 4 and 5 read: *satyanirṇayāntaḥ*.

[2] See *NŚ*, vol. I, page 361 and the *DR*, IV. 16.

ऐश्वर्यनाशेन यथा–

यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा ।
कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम् ॥

(कुमारसंभवे २. २७)

अथ मतिः–

नानाशास्त्रार्थमथनादर्थनिर्धारणं [1]मतिः ।
तत्र चेष्टास्तु कर्तव्यकरणं संशयच्छिदा ॥ ७५ ॥
शिष्योपदेशभ्रूक्षेपावूहापोहादयोऽपि च । (७६ क-ख)

यथा–

दशरथकुले संभूतं मामवाप्य धनुर्धरं
दिनकरकुलास्कन्दी कोऽयं कलङ्कनवाङ्कुरः ।
इति न वनितामेतां हन्तुं मनो विचिकित्सते
यदधिकरणं धर्मस्थीयं तवैव वचांसि नः ॥

(अनर्घराघवे २. ६२)

अथ धृतिः[2]–

ज्ञानविज्ञानगुर्वादिभक्तिनानार्थसिद्धिभिः ॥ ७६ ॥ (ग-घ)
लज्जादिभिश्च चित्तस्य नैस्पृह्यं धृतिरुच्यते ।
अत्रानुभावा विज्ञेयाः प्राप्तार्थानुभवस्तथा ॥ ७७ ॥
अप्राप्तातीतनष्टार्थानभिसंक्षोभणादयः[3] । (७८ क-ख)

[1] See *NŚ*, vol. I, page 371 and the *DR*, IV. 27.
[2] See *NŚ*, vol. I, page 363 and the *DR*, IV. 12.
[3] MSS. 7, 8, 9 and 10 read: *anabhisaṃkṣobhaṇādayaḥ*; *RAS*-1, *RAS*-2 and MSS. 4 & 5 read: *anabhisaṃśodhanādayaḥ*.

ज्ञानाद् यथा–

अशीमहि वयं भिक्षामाशावासो वसीमहि ।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ।।

(वैराग्यशतके ५५)

विज्ञानाद् यथा–

[1]अस्त्यद्यापि चतुःसमुद्रपरिखापर्यन्तमुर्वीतलं
[2]सन्त्यन्येऽपि च तत्र तत्र सुधियां गोष्ठीषु सक्ता नृपाः ।
तत्रैकोऽपि निरादरो यदि भवेदन्यो[3] भवेत् सादरो
वाग्देवी वदनाम्बुजे वसति चेत् को नाम दीनो जनः।।

गुरुभक्त्या यथा–

तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किं तथा
यत् संवाहयतः सुखं हि चरणौ तातस्य किं राज्यतः ।
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरो-
रायासः खलु राज्यमुज्झितगुरोस्तत्रास्ति कश्चिद् गुणः ।।

(नागानन्दे १. ७)

अत्र पितृभक्त्या राज्येऽपि नैस्पृह्यं जीमूतवाहनस्य ।

[1] MS. 4 reads: *āsādyāpi*, which is also given in the footnote in *RAS*-1 (as of MS. *ga*); *RAS*-1, (other MSS. than *ga*), *RAS*-2 and MS. 5 read *asty adyāpi*.

[2] *RAS*-1 and MS. 4 read: *santi jñānavidagdhagoṣṭhicaturāḥ kecit kvacid bhūbhujaḥ*. *RAS*-2 and MS. 5 read as given in the text. *RAS*-1 also gives in the footnote this reading with *viduṣām* for *sudhiyām*, but does not mention the MSS. (perhaps *ka*, *kha* and *ṅa*).

[3] *RAS*-1 and MS. 4 read: *eko bhavet sādaraḥ*; *RAS*-2 and MS. 5 read: *anyo bhavet*, etc.

नानार्थसिद्ध्या यथा–

क्रोधान्धैः सकलं हतं रिपुकुलं पञ्चाक्षतास्ते वयं
पाञ्चाल्या मम दुर्नयोपजनितस्तीर्णो निकारार्णवः ।
त्वं देवः पुरुषोत्तमः सुकृतिनं मामादृतो भाषसे
किं नामान्यदतः परं भगवतो याचे प्रसन्नादहम् ।।
(वेणीसंहारे ६. ४५)

अथ[1] हर्षः–

मनोरथस्य लाभेन सिद्ध्या योग्यस्य वस्तुनः ।। ७८ ।।
(ग-घ)
मित्रसंगमदेवादिप्रसादादेश्च कल्पितः ।
मनःप्रसादो हर्षः स्यादत्र नेत्रास्यफुल्लता ।। ७९ ।।
प्रियाभाषणमाश्लेषः पुलकानां प्ररोहणम् ।
स्वेदोद्गमश्च हस्तेन [2]हस्तसंपीडनादयः ।। ८० ।।

मनोरथस्य लाभेन यथा–

निवातपद्मस्तिमितेन चक्षुषा
नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनाद्
गुरुः प्रहर्षः प्रबभूव नात्मनि ।। (रघु. ३. १७)

योग्यवस्तुसिद्ध्या यथा–

स रागवानरुणतलेन पाणिना
पुलोमजापदतलयावकैरिव ।

[1] See *NŚ*, vol. I, page 364 and the *DR*, IV. 14.

[2] *RAS*-1 reads: *saṃpīḍanādayaḥ*; others seem to read: *saṃtāḍanādayaḥ*.

हरिं हरिः [1]स्तनितगभीरहेषितं
मुखे निरामिषकठिने ममार्ज तम् ॥

अत्र उच्चैःश्रवसो लाभेन देवेन्द्रस्य हर्षः ।

मित्रसंगमाद् यथा–

इभकुम्भतुङ्गकठिनेतरेतर-
स्तनभारदूरविनिवारितोदराः ।
परिफुल्लगण्डफलकाः परस्परं
परिरेभिरे कुकुरकौरवस्त्रियः ॥ (माघे १३. १६)

मित्रसंगमः पूज्यादिसंगमादीनामप्युपलक्षणम् । पूज्यसंगमेन यथा–

युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकासमासत ।
तनौ ममुस्तत्र न कैटभद्विष-
स्तपोधनाभ्यागमसंभवा मुदः ॥ (माघे १. २३)

देवप्रसादाद् यथा–

तस्याः प्रसन्नेन्दुमुखः प्रसादं
गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिह्नानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव ॥ (रघु २. ६८)

[1] *RAS*-2 and MS. 5 read:-*hiṇihiṇigarbhaheṣitam*; MS. 4 reads: *maṇiravagarbhaheṣitam*; *RAS*-1 reads: *stanitagabhīraheṣitam*. The metre of this verse is *rucirā*; (*caturgrahair iha rucirā jabhasjagāḥ*). This verse also may be from the *Kandarpasambhava*; see note 1, p. 184.

आदिशब्दाद् गुरुराजप्रसादादयः । गुरुप्रसादाद् यथा–

अस्मद्गोत्रमहत्तरः क्रतुभुजामद्यायमाद्यो रवि-
यज्वानो वयमद्य ते भगवती भूरद्य राजन्वती ।
अद्य स्वं बहु मन्यते सहचरैरस्माभिराखण्डलो
येनैतावदरुन्धतीपतिरपि स्वेनानुगृह्णाति नः ।।
(अनर्घराघवे १. १८)

राजप्रसादाद् यथा–

प्रीतिरस्य ददतोऽभवत् तथा
येन तत्प्रियचिकीर्षवो नृपाः ।
स्पर्शितैरधिकमागमन् मुदं
नाधिवेश्मनिहितैरुपायनैः ।। (माघे १४. ४१)

अथौत्सुक्यम्[1]–

कालाक्षमत्वमौत्सुक्यमिष्टवस्तुवियोगतः ।
तद्दर्शनाद् रम्यवस्तुदिदृक्षादेश्च[2] तत्क्रियाः ।। ८१ ।।
त्वरानवस्थितिः शय्यास्थितिरुत्थानचिन्तने ।
शरीरगौरवं निद्रातन्द्रानिःश्वसितादयः ।। ८२ ।।

इष्टवस्तुवियोगाद् यथा–

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ।।
(मेघसंदेशे २. ४१)

[1] See *NŚ*, vol. I, page 367 and the *DR*, IV. 32.
[2] *RAS*-2 and MS. 5 read: *didṛkṣādiś ca*; others read as given.

इष्टवस्तुदर्शनाद् यथा–

आयाते दयिते मनोरथशतैर्नीत्वा कथंचिद् दिनं
वैदग्ध्यापगमाज्जडे परिजने दीर्घां कथां कुर्वति ।
दष्टास्मीत्यभिधाय सत्वरपदं व्याधूय चेलाञ्चलं
तन्वङ्ग्या रतिकातरेण मनसा नीतः प्रदीपः शमम् ।
(अमरुकस्य ७७)

रम्यदिदृक्षया यथा–

कृतावशेषेण सविभ्रमेण निष्कीलितेनाध्वनि पूरितेन ।
प्रसाधनेनाच्युतदर्शनाय पुरस्त्रियः शिश्रियिरे
गवाक्षान् ।।

अथौग्र्यम्–[1]

अपराधावमानाभ्यां [2]चौर्याभिग्रहणादिभिः ।
असत्प्रलापनाद्यैश्च कृतं चण्डत्वमुग्रता ।। ८३ ।।
क्रियास्तत्रास्यनयनरागो बन्धनताडने ।
शिरसः कम्पनं स्वेदवधनिर्भर्त्सनादयः ।। ८४ ।।

अपराधाद् यथा–

प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ।।
(मालतीमाधवे ५. ३१)

[1] See *NŚ*, vol. I, page 370 and the *DR*, IV. 15.
[2] *RAS*-1 reads: *dhairyādigrahaṇādibhiḥ*; others read as given in the text.

अत्र मालतीनिकाररूपापराधाद् माधवस्यौग्र्यम् ।

अवमानाद् यथा–

अज्ञातपूर्वां द्विषतामवज्ञां
विज्ञापयन्तं [1]प्रतिरुष्टचेताः ।।
आज्ञाहरं प्राज्ञविनिन्द्यकर्मा
[2]यज्ञाशिवैरी गदया जघान ।।

चौर्याभिग्रहणाद्[3] यथा–

भुजविटपमदेन व्यर्थमन्धंभविष्णु-
र्धिगपसरसि चौरंकारमाक्रुश्यमानः ।
त्वदुरसि विदधातु स्वामवस्कारकेलिं
कुटिलकरजकोटिक्रूरकर्मा जटायुः ।।
(अनर्घराघवे ५. ११)

असत्प्रलापाद् यथा–

कथमपि न निषिद्धो दुःखिना भीरुणा वा
द्रुपदतनयपाणिस्तेन पित्रा ममाद्य ।
तव भुजबलदर्पाध्मायमानस्य वामः
शिरसि चरण एष न्यस्यते वारयैनम् ।।
(वेणीसंहारे ३. ४०)

अथामर्षः–[4]

[1] *RAS*-1 reads: *pratighāndhacetāḥ*; *RAS*-2 and MS. 5 read: *pratimūḍhacetāḥ*; MS. 4 reads: *pratiruṣṭacetāḥ*.

[2] Only *RAS*-2 reads: *yajñadviṣantam.*

[3] Only *RAS*-1 reads: *dhairyādigrahaṇād.*

[4] See *NŚ*, vol. I, page 369 and the *DR*, IV. 18.

अधिक्षेपावमानाद्यैः क्रोधोऽमर्ष इतीर्यते ।
तत्र स्वेदशिरःकम्पावाधोमुख्यविचिन्तने ।। ८५ ।।
उपायान्वेषणोत्साहव्यवसायादयः क्रियाः । (८६ क-ख)

अधिक्षेपाद् यथा–

इति भीष्मभाषितवचोऽर्थमधिगतवतामिव क्षणात् ।
क्षोभमगमदतिमात्रमथो शिशुपालपक्षपृथिवीभृतां गणः।।
(माघकाव्ये १५. ४७)

अवमानाद् यथा–

ध्वंसेत हृदयं सद्यः परिभूतस्य मे परैः ।
यद्यमर्षः प्रतीकारं भुजालम्बं न लम्भयेत् ।।
(किरातार्जुनीये ११. ५७)

अथासूया–[1]

परसौभाग्यसंपत्तिविद्याशौर्यादिहेतुभिः ।। ८६ ।।
(ग-घ)

गुणेऽपि दोषारोपः स्यादसूया तत्र विक्रियाः ।
मुखापवर्तनं गर्हा भ्रूभेदानादरादयः ।। ८७ ।।

परसौभाग्येन यथा–

मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।
अन्यापि किं न सखि भाजनमीदृशानां
वैरी न चेद् भवति वेपथुरन्तरायः ।।
(केशटस्येति सुभाषितरत्नकोशे)

[1] See *NS*, vol. I, page 358 and the *DR*, IV. 17.

परसंपत्त्या यथा–

लोकोपकारिणी लक्ष्मीः सतां विमलचेतसाम् ।
तथापि तां विलोक्यैव [1]दूयन्ते दुष्टचेतसः ।।

परविद्यया यथा–

प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः ।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराद्धयते ।।

(प्रबोधचन्द्रोदये २. ४)

यथा वा–

गुणाधारे गौरे यशसि परिपूर्णे विलसति
प्रतापे चामित्रान् दहति तव सिंहक्षितिपते ।
नवैव द्रव्याणीत्यकथयदहो मूढतमधी-
[2]श्चतुर्धा तेजोऽपि व्यभजत कणादो मुनिरपि ।।

[1] *RAS*-2 and MS. 5 read: *vilokyeme dūyante ruṣṭacetasḥ.* Others read as given.

[2] See the *Vaiśeṣikasūtra-s* I. 4 and Praśastapāda thereon. This is a *cāṭuśloka* on Siṃhabhūpāla, probably by Viśveśvara, or some other court-poet of our author. The idea in brief is this. The writer of this verse argues that the *yaśas* of king Siṃha is a separate *dravya* and should be counted as the *tenth*; and that his *pratāpa* is a separate and the (5th) (*Siṃhaja*) sub-division of the 3rd variety (i.e. *viṣaya*) of *tejas* (energy) or *light*; the three varieties are noted as: *śarīra*, *indriya* and *viṣaya*; of these three, the *viṣaya* is sub-divided into four: *bhauma*, *divya*, *audarya* and *ākaraja*. It is said that the dividing of *tejas* into 3, and the sub-dividing of the 3rd into four were done by Praśastapāda, and not found in the original *sūtra-s*; (see Y. V. Athalye's Translation of *Tarkasaṃgraha*, BSS, 55, 1963, p. 112). According to the general dictum: *sūtreṣv eva hi tat sarvaṃ yad vṛttau yacca vārttike*, perhaps, the writer of the verse in this context is using the word *kaṇādo munir api*, and not in the strict sense of the expression. See the Introduction on *cāṭuśloka-s* in *RAS*. See also the verses: *arivrajānām-*, *śrī siṃhabhūpa-*, *śuddhāntasya-*, *ko vā-* and *ayaṃ rāmo*, etc. under Kārikā-s II. 103, 109.

अत्र प्रौढकविसमयप्रसिद्धमार्गानुसारिणो वक्तुः परिमितद्रव्य-वादिनि कणादे महत्यसूया मूढतमधीरिति वागारम्भेण व्यज्यते ।

परशौर्येण यथा–

स्त्रीमात्रं ननु ताटका भृगुसुतो रामस्तु विप्रः शुचि-
मर्मारीचो मृग एव भीतिभवनं वाली पुनर्वानरः ।
भोः काकुत्स्थ विकत्थसे किमथ वा वीरो जितः कस्त्वया
दोर्दर्पस्तु तथापि ते यदि समं कोदण्डमारोपय ।।

(हनुमन्नाटके दृश्यते १४. २१)

अथ चापलम्[1]–

रागद्वेषादिभिश्चित्तलाघवं चापलं भवेत् ।
चेष्टास्तत्राविचारेण परिरम्भावलम्बने ।। ८८ ।।
निष्कासनोक्तिपारुष्ये ताडनाज्ञापनादयः । (८९ क-ख)

रागेण यथा–

विजनमिति बलादमुं गृहीत्वा
क्षणमथ वीक्ष्य विपक्षमन्तिकेऽन्या ।
अभिपतितुमना लघुत्वभीते-
रभवदमुञ्चति वल्लभेऽतिगुर्वी ।।

(माघकाव्ये ७. ५१)

द्वेषेण यथा–

[2]पादाघातैः सुरभिरभितः सत्वरं ताडनीयो
गाढामोदं मलयमरुतः शृङ्खलादाम दत्त ।

[1] See *NŚ*, vol. I, page 364 and the *DR*, IV. 33.
[2] Printed edn. reads *kampāghātaiḥ*.

कारागारे क्षिपत तरसा पञ्चमं रागराजं
चन्द्रं चूर्णीकुरुत च शिलापट्टके पिष्टबिम्बम् ।।
(बालरामायणे ५. ४६)

अत्र सीताविरहेण रावणस्य[1] वसन्तादिविषयद्वेषेण तत्तदधिदेवतानां ताडनाज्ञापनादिभिरनुभावैश्चापल्यं द्योत्यते ।

अथ निद्रा[2]–

मदस्वभावव्यायामनिश्चिन्तत्वश्रमादिभिः ।। ८६ ।।
(ग-घ)

मनोनिमीलनं निद्रा चेष्टास्तत्रास्यगौरवम् ।
[3]आघूर्णमाननेत्रत्वमङ्गानां परिमर्दनम्[4] ।। ६० ।।
निःश्वासोच्छ्वासने[5] सन्नगात्रत्वं नेत्रमीलनम् ।
शरीरस्य च संकोचो जाड्यं चेत्येवमादयः ।। ६१ ।।

मदाद् यथा–

यस्मिन् महीं शासति वाणिनीनां
निद्रां विहारार्धपथे गतानाम् ।
वातोऽपि नास्रंसयदंशुकानि
को लम्बयेदाहरणाय हस्तम् ।। (रघु. ६. ७५)

[1] *RAS*-2 and MS. 5 read *rāghavasya*; *RAS*-1 and MS. 4 read *rāvaṇasya*.

[2] See *NŚ*, vol. I, p. 367 and the *DR*, IV. 23.

[3] Only *RAS*-2 reads: *jṛmbhaṇaṃ mlānanetratvam*, instead of *āghūrṇamānanetratvam* of others.

[4] *RAS*-1 and MSS. 7, 8, 9 &10 read: *parivartanam*; *RAS*-2 and MSS. 4 & 5 read: *parimardanam*.

[5] *RAS*-2 reads: *niḥśvāsocchvasite sannabhāvatvam*; others read as given in the text.

स्वभावाद् यथा—

उत्तानामुपधाय बाहुलतिकामेकामपाङ्गाश्रया-
मन्यामप्यलसां निधाय विपुलाभोगे नितम्बस्थले ।
नीवीं किंचिदिव श्लथां विदधती निःश्वासमुन्मुञ्चती
तल्पोत्पीडनतिर्यगुन्नतकुचा निद्राति शातोदरी ॥

व्यायामाद् यथा—

अलसलुलितमुग्धान्यध्वसंजातखेदाद्
अशिथिलपरिरम्भैर्दत्तसंवाहनानि ।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥
(उत्तररामचरिते १. २४)

नैश्चिन्त्याद् यथा—

दत्तेन्द्राभयविभ्रमाद्भुतभुजासंभारगम्भीरया
त्वद्वृत्त्या शिथिलीकृतस्त्रिभुवनत्राणाय नारायणः ।
अन्तस्तोषतुषारसौरभमयश्वासानिलापूरण-
प्राणोत्तुङ्गभुजङ्गतल्पमधुना भद्रेण निद्रायते ॥
(अनर्घराघवे १. २७)

श्रमाद् यथा—

केवलं प्रियतमादयालुना ज्योतिषामवनतासु
पङ्क्तिषु ।
तेन तत्परिगृहीतवक्षसा नेत्रमीलनकुतूहलं कृतम् ॥
(कुमारसंभवे ८. ८४)

अथ सुप्तिः[1]–

उद्रेक एव निद्रायाः सुप्तिः स्यात् तत्र विक्रियाः ।
इन्द्रियोपरतिर्नेत्रमीलनं स्रस्तगात्रता ।। ९२ ।।
उत्स्वप्नायितनैश्चल्यश्वासोच्छ्वासादयोऽपि च ।
(९३ क-ख)

यथा–

अव्यासुरन्तःकरुणारसार्द्रा
निसर्गनिर्यन्निगमान्तगन्धाः ।
श्वासानिलास्त्वां स्वपतो मुरारेः
शय्याभुजङ्गेन्द्रनिपीतशेषाः ।।

अथ बोधः[2]–

[3]**स्वप्नस्पर्शननिध्वाननिद्रासंपूर्णतादिभिः ।। ९३ ।।**
(ग-घ)

प्रबोधश्चेतनावाप्तिश्चेष्टास्तत्राक्षिमर्दनम् ।
शय्याया मोक्षणं बाहुविक्षेपोऽङ्गुलिमोटनम् ।। ९४ ।।
शिरःकण्डूयनं चाङ्गवलनं चैवमादयः । (९५ क-ख)

स्वप्नाद् यथा–

[4]त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत ।

[1] See *NŚ*, vol. I, p. 368, and the *DR*, IV. 22.

[2] See *NŚ*, vol. I, page 369, and the *DR*, IV. 24.

[3] *RAS*-1, *RAS*-2 and MS. 5 read: *niḥsvāna,* instead of *nidhvāna* of others.

[4] The illustration *tribhāgaśeṣāsu,* and the expression *sparśanād yathā* introducing the next verse are missing in MS. 4.

क्व नीलकण्ठ व्रजसीत्यलक्ष्यवा-
गसत्यकण्ठार्पितबाहुबन्धना ।। (कुमारसंभवे ५. ५७)

स्पर्शनाद् यथा–

आघ्राय चाननमधिस्तनमायताक्ष्याः
सुप्तं तदा त्वरितकेलिभुवा श्रमेण ।
प्राभातिकः पवन एष सरोजगन्धी
प्राबोधयन् मणिगवाक्षसमागतो माम् ।।

शब्दाद्[1] यथा–

उषसि स गजयूथकर्णतालैः
पटुपटहध्वनिभिर्विनीतनिद्रः ।
अरमत मधुराणि तत्र शृण्वन्
विहगविकूजितवन्दिमङ्गलानि ।।

(रघु. ९. ७१)

निद्रासंपूर्त्या यथा–

ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ।
अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ।।

(रघु. १०. ६)

उत्तमाधममध्येषु सात्त्विका व्यभिचारिणः ।। ९५ ।।

(ग-घ)

विभावैरनुभावैश्च वर्णनीया यथोचितम् ।

(अनुक्तचित्तवृत्तीनामुक्तान्तर्भावः)

[1] *RAS*-1 and *RAS*-2 read: *niḥsvānād yathā*; MSS. 4 & 5 read: *śabdād yathā*.

उद्वेगस्नेहदम्भेर्ष्याप्रमुखाश्चित्तवृत्तयः[1] ॥ ९६ ॥

उक्तेष्वन्तर्भवन्तीति न पृथक्त्वेन[2] दर्शिताः ।

(९७ क-ख)

तथा हि– परप्रतारणरूपदम्भस्य [3]जिह्मतावहित्थायामन्तर्भावः । [4]चित्तद्रवतालक्षणस्य स्नेहस्य हर्षेऽन्तर्भावः । स्वविषयदानमाना-

[1] Dhanika notes thus: *anye ca cittavṛttiviśeṣā eteṣām eva vibhāvānubhāvasvarūpānupraveśād na pṛthag vācyāḥ*(page 196, my edn.). After Dhanika, the author of the *Rasakalikā* too says thus: *anye cetovikārāḥ syur eṣvevāntargatā amī, sthāyiny unmagnanirmagnāḥ kallolā iva sāgare*(page 30, R. 2241). The simile in the second line was given in the *DR*, IV 7. Bahurūpamiśra in his *Daśarūpakadīpikā* mentions thus: *yady apy anye cittavṛttiviśeṣā bahavaḥ santi bhāvāḥ, teṣāṃ rasapoṣaupayikānāṃ vyabhicāriṣv eva yathākathaṃcid antarbhāvo draṣṭavyaḥ. ye'pi eṣu (ukteṣu) bhāveṣu parasparapratyāsannarūpās te'pi vibhāvato'nubhāvataś ca sphuṭabhedā ity avagantavyam. sthāyiṣv apīyam eva prakriyā draṣṭavyā* (Trivandrum Transc. pp. 167-168). Jagannātha has the following comments on this point: *atha katham asya (bhāvasya) saṃkhyāniyamaḥ. mātsaryodvegadambherṣyāvivekanirṇayaklaibyakṣamākutukotkaṇṭhāvinayasaṃśayadhārṣṭyādīnām api tatra tatra lakṣyeṣu darśanād iti cet? na. ukteṣv eva eṣām antarbhāveṇa saṃkhyāntarānupapatteḥ.* See further details there. (*RG*, NSP, 1894, p. 98). In the line 18 on the same page of the *RG*, read the expression as: *tadanatiriktatvasyaiva.*

[2] MSS. 7, 8 and 9 read: *na pṛthak pratipāditāḥ*; others read as in the text.

[3] *RAS*-1 reads: *jihmatāvahitthayoḥ*, which is not correct. *jihmatā* is not a separate *bhāva*. *avahitthā* was earlier noted as arising in some cases from *jaihmya*. See *RAS*, II. 68 (*ga* & *gha*), p. 183. MS. 4 reads correctly: *jihmatāvahitthāyām*; *RAS*-2 and MS. 5 read: *asūyāvahitthayoḥ.*

[4] *RAS*-2 and MS. 5 read: *cittārdratālakṣaṇasya*; *RAS*-1 and MS. 4 read: *cittadravatālakṣaṇasya.*

द्यमर्षणरूपाया[1] ईर्ष्याया अमर्षेऽन्तर्भावः। परविषयायास्त्वसूया-याम्। उद्वेगस्य तु निर्वेदविषादादिषु यथोचितमन्तर्भावः इत्यादि द्रष्टव्यम्। तथा च [2]भावप्रकाशिकाकारः—

अन्येऽपि यदि भावाः स्युश्चित्तवृत्तिविशेषतः।
अन्तर्भावस्तु सर्वेषां द्रष्टव्यो व्यभिचारिषु॥

इति। (२५ पुटे)

[3]विभावाश्चानुभावाश्च ते भवन्ति परस्परम्॥ ९७॥ (ग-घ)

कार्यकारणभावस्तु ज्ञेयः प्रायेण लोकतः। (९८ क-ख)

तथा हि—संतापस्य दैन्यं प्रति विभावत्वं ग्लानिं प्रत्यनुभावत्वं च। प्रहारस्य[4] प्रलयमोहौ प्रति विभावत्वम् औग्र्यं प्रत्यनुभावत्वं च। विषादस्य उत्पातावेगं प्रत्यनुभावत्वं स्तम्भं प्रति विभावत्वम्। व्याधे-र्ग्लानिस्तम्भप्रलयादीन् प्रति विभावत्वम्।

[5]स्वातन्त्र्यात् पारतन्त्र्याच्च ते द्विधा व्यभिचारिणः॥ ९८॥ (ग-घ)

[1] This line is missing in *RAS*-2; MS. 4 seems to read: *svaviṣayād anumānādyamarṣaṇarūpa-*; MS. 5 seems to read: *svaviṣayanānādānādyamarṣiṇīparerṣyāyā* (?) *amarṣe'ntarbhāvaḥ*!

[2] MS. 4 reads: *bhāvaprakāśikāyām*; others as given.

[3] In this context, Bahurūpamiśra notes: *tatra sāttvikavyabhi-cārivargayoḥ parasparaṃ vibhāvatvānubhāvate draṣṭavye* (ibid., p. 167). See also fn. 1 on II. 96, p. 203.

[4] This *prahāra* seems to be the same as *ghāta* in *pralayo duḥkhaghā-tādyaiś ceṣṭā tatra visaṃjñatā* (*RAS*, I. 310), and *tāḍana* noted in *kriyāś tatrāsyanayanarāgo bandhanatāḍane* (II. 84) and the mental condition associated with it is the *cittavṛttiviśeṣa* in the context.

[5] *RAS*-2 and MS. 5 read: *svatantrāḥ paratantrās ca dvividhā vyabhicāriṇaḥ*; others read as given in the text.

परपोषकतां प्राप्ताः परतन्त्रा इतीरिताः ।
तदभावे स्वतन्त्राः स्युर्भावा इति च ते स्मृताः ।। ६६ ।।

तत्र पारतन्त्र्येण निर्वेदो यथा–

कुर्युः शस्त्रकथाममी यदि मनोर्वंशे मनुष्याङ्कुराः
स्याच्चेद् ब्रह्मगणोऽयमाकृतिगणस्तत्रेष्यते चेद् भवान् ।
सम्राजां समिधां च साधकतमं धत्ते छिदाकारणं
धिङ् मौर्वीकुशकर्षणोल्बणकिणग्रन्थिर्ममायं करः ।।
(अनर्घराघवे ४. ४४)

इत्यत्र निर्वेदस्य क्रोधाङ्गत्वम् । निर्वेदस्य स्वतन्त्रत्वं यथा–

प्राप्ताः श्रियः सकलकामदुघास्ततः किं
संमानिताश्च विभवैः सुहृदस्ततः किम् ।
न्यस्तं पदं शिरसि विद्विषतां ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ।।
(वैराग्यशतके ६७)

इत्यादि । अत्र निर्वेदस्यानन्याङ्गत्वात् स्वतन्त्रत्वम् ।

ननु निर्वेदस्य शान्तरसस्थायित्वं कैश्चिदुक्तम् । (तत्)कथमस्य [1]अन्यरसोपकरणत्वम् इति चेद्, उच्यते । [2]सति खलु ग्रामे सीमासं-

[1] *RAS*-1 reads: *ananyopakaraṇatvam*; this seems to be unsuitable in the context; *RAS*-2 reads: *anyasyopakaraṇatvam*; MS. 5 seems to read: *anayo* (*nyo*-?) *pakaraṇatvam*; MS. 4 reads clearly: *anyarasopakaraṇatvam*, which appears to be the correct reading in the context.

[2] MS. 4 reads: *sa khalu*, etc.; I think '*ti*' of *sati* is missing here, which must be a mistake of the scribe, as *sati* is clear in others.

भावना। स्थायित्वं नाम संस्कारपाटवेन भावस्य (वासनारूपेण स्थितस्य कारणवशादुद्बोधितस्य) मुहुर्मुहुर्नवीभावः। तेन निर्वेदवासनावासिते भावकचेतसि नैष्फल्येनाभिमतेषु विभावादिषु (भावकानां प्रथमं प्रवृत्तेरेवासंभवात्) तत्सामग्रीफलभूतस्य निर्वेदस्योत्पत्तिरेव न संगच्छते। किं पुनः स्थायित्वम्। किं च [1]असति निर्वेदस्थायिनि शान्तरूपो भावकानामास्वादश्चित्रगतकदलीफलरसास्वादलम्पटानां राजशुकानां विवेकसहोदरो भवेदिति कृतं संरम्भेण।

विषादस्य परतन्त्रत्वं यथा–

वारं वारं तिरयति दृशामुद्गतो बाष्पपूर-
स्तत्संकल्पोपहितजडिम स्तम्भमभ्येति गात्रम्।

[1] *RAS*-1 reads: *asati*; *RAS*-2 and MSS. 4 & 5 read: *sati*. Regarding the controversy about the *śāntarasa*, and other related details, see *The Number of Rasa-s*, by Prof. V. Raghavan, 1967, pp. 15-117. The gist of the discussion of Siṃhabhūpāla here is this: He does not accept the *śāntarasa*, and consequently does not accept any *sthāyibhāva* for it. (See also the fn. under II. 160 & the text on *dhṛti* and *śama*.) Some accepted *śama* as the *sthāyin* for the proposed *śāntarasa*, and others argued for *nirveda* to be its *sthāyin*. (See for instance, the *Kāvyaprakāśa*: *nirvedasthāyibhāvo'sti śānto'pi navamo rasaḥ* (4th *Ullāsa*). Siṃhabhūpāla differs. First, he argues that *nirveda* cannot be a *sthāyibhāva*, though it may be *vyabhicāribhāva*. (But, for those like Abhinavagupta, who accept the *śāntarasa*, there are two *nirveda-s* or two *śama-s* (*sthāyin* as well as *vyabhicārin*). (See *The Number of Rasa-s*, page 100 footnote. See also the *Saṃgītaratnākara*, VII. 1366-7; Adyar Publication.) Secondly, Siṃhabhūpāla continues the argument stating that in the absence of *nirveda* as a *sthāyibhāva*, its *āsvāda* is impossible, and is similar to the eating and tasting by the royal parrots of a banana fruit seen only in a picture, which is not a real banana. In this context, see also Dhanika on *DR*, IV. 36, and Bhaṭṭanṛsiṃha's comments thereon.

सद्यः स्विद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः
पाणिर्लेखाविधिषु नितरां वर्तते किं करोमि ।।
(मालतीमाधवे १. ३८)

अत्र विषादस्य शृङ्गाराङ्गत्वम् । स्वतन्त्रत्वं यथा–

संचारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः ।। (रघु. ६. ६७)

इत्यत्र विषादस्यानन्याङ्गत्वम् । एवमन्येषामपि स्वतन्त्रत्वपरतन्त्रत्वे तत्र तत्रोहनीये ।

आभासता भवेदेषामनौचित्यप्रवर्तिनाम् ।
असत्यत्वादयोग्यत्वादनौचित्यं द्विधा भवेत् ।। १०० ।।
असत्यत्वकृतं तत् स्यादचेतनगतं तु यत् । (१०१ क-ख)

यथा–

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं श्रूयताम् ।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न छायापि परोपकारकरणी मार्गस्थितस्यापि मे ।।
(ध्वन्यालोकेऽपीदमुद्धृतम् ३. ४०)

अत्र वृक्षविशेषत्वादचेतने शाखोटके चित्तविकारस्यासंभवानुचितो निर्वेदोऽयमाभासत्वमापद्यते ।

अयोग्यत्वकृतं प्रोक्तं नीचतिर्यङ्नराश्रयम् ।। १०१ ।।
(ग-घ)

तत्र नीचतिर्यग्गतं यथा—

वेलातटे प्रसूयेथा मा भूः शङ्कितमानसा ।
मां जानाति समुद्रोऽयं टिट्टिभं साहसप्रियम् ।।

अत्र यदि समुद्रवेलायां प्रसूये तर्हि उद्वेलकल्लोलमालाभिर्ममापत्यानि हृतानि भवेयुरिति शङ्कितायां निजगृहिण्यां कश्चित् टिट्टिभः पक्षिविशेषो गर्वायते । तदयं गर्वो नीचतिर्यग्गतत्वादाभासो नातीव स्वदते ।

नीचनराश्रयो यथा—

अत्युत्तानशयालुना करयुगप्राप्तोपधानश्रिया
गन्धूरस्य[1] तरोस्तले घुटपुटध्वानानुसंधायिभिः ।
दीर्घैः श्वासभरैः सफूत्कृतिशतैरास्फोटितोष्ठद्वयं
तत्पूर्वं कृषिकर्मणि श्रमवता क्षुद्रेण निद्रायते ।।

अत्र नीचगता निद्रा भावकेभ्यो नातिस्वदते ।

उत्पत्तिसंधिशाबल्यशान्तयो व्यभिचारिणाम् ।
दशाश्चतस्रस्तत्र स्यादुत्पत्तिर्भावसंभवः ।। १०२ ।।

यथा—

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ।।

(कुमारसंभवे ६. ८४)

अत्र लज्जायाः हर्षस्य वा समुत्पत्तिः ।

सरूपमसरूपं वा भिन्नकारणकल्पितम् ।
भावद्वयं मिलति चेत् स संधिरिति गीयते ।। १०३ ।।

[1] *RAS*-2 and MS. 5 read: *barbūrasya*; *RAS*-1 and MS. 4 read: *gandhūrasya*.

सरूपयोः संधिर्यथा–

अरिव्रजानामनपोतसिंहखङ्गप्रहारैरवनिं गतानाम् ।
प्रियाजनाङ्कप्रहिताङ्गकानां भवन्ति नेत्रान्त-
निमीलनानि ॥

अत्र नायकखङ्गप्रहारप्रियाजनाङ्गस्पर्शाभ्यां कल्पितयोः प्रतिनायकेषु मोहयोः संधिर्नेत्रान्तनिमीलनेन व्यज्यते ।

असरूपयोः संधिर्यथा–

श्रीसिंहभूपप्रतिनायकानां
स्विद्यन्ति गात्राण्यतिवेपितानि ।
तत्तूर्यसंवादिषु गर्जितेषु
प्रियाभिरालम्बितकन्धराणाम् ॥

अत्र गर्जितेषु नायकसंनाहनिःसाणशङ्कयाङ्कुरितस्य प्रतिनायकानां त्रासस्य प्रियालिङ्गनतरङ्गितस्य च हर्षस्य स्वेदवेपथुसादृश्यकल्पित-संश्लेषः संधिः ।

अत्यारूढस्य भावस्य विलयः शान्तिरुच्यते ।
(१०४ क-ख)

यथा–

शुद्धान्तस्य निवारितोऽप्यनुनयैर्निःशङ्कमङ्कूरितो
वृद्धामात्यहितोपदेशवचनै रुद्धोऽपि वृद्धिं गतः ।
मानोद्रेकतरुः प्रतिक्षितिभुजामामूलमुन्मूल्यते
वाहिन्यामनपोतसिंहनृपतेरालोकितायामपि ॥

अत्र हितोपदेशानादराधिरूढस्य प्रतिनायकगतस्य गर्वस्य शान्तिरामूलमुन्मूल्यत इति वागारम्भेण व्यज्यते ।

शबलत्वं तु भावानां संमर्दः स्यात् परस्परम् ।। १०४ ।।

(ग-घ)

यथा–

को वा जेष्यति [1]सोमवंशतिलकानस्मान्
रणप्राङ्गणे (गर्वः)
हन्तास्मासु पराङ्मुखो हतविधिः (विषादासूये)
किं दुर्गमध्यास्महे । (चिन्ता)
अस्मत्पूर्वनृपानसौ निहतवान् (स्मृत्यमर्षौ)
दीर्घान् धिगस्मद्भुजान् (निर्वेदः)
किं वाक्यैरनपोतसिंहनृपतेः सेवैव कृत्यं परम् ।।
(मतिः)

अत्र गर्व-विषादासूया-चिन्ता-स्मृत्यमर्ष-निर्वेद-मतीनां संमर्दो भाव-शाबल्यमित्युच्यते ।

दिगन्तरालसंचारकीर्तिना सिंहभूभुजा ।
एवं संचारिणः सर्वे सप्रपञ्चं निरूपिताः ।। १०५ ।।

इति संचारिभावाः

अथ स्थायिनः

[2]सजातीयैर्विजातीयैर्भावैर्ये त्वतिरस्कृताः ।

[1] See fn. 1, 2 (p. 8) and the Introduction for the significance of the title *Somakulaparaśurāma*, etc. *asau* in this verse is perhaps a reference to Anapota I and not to Siṃha II. In that case *ayam* probably would have been used.

[2] See the *Avaloka* on *DR*, IV. 34, which reads: *sajātīyavijātīya-bhāvāntarair atiraskṛtatvena upanibadhyamāno ratyādiḥ sthāyī*, etc. In the *Pratāparudrīya* the following *kārikā* is quoted: *sajātīyair vijātīyair*

क्षीराब्धिवन्नयन्त्यन्यान् स्वात्मत्वं स्थायिनो हि ते
॥ १०६ ॥

भरतेन च ते कथिता रतिहासोत्साहविस्मयक्रोधाः ।
शोकोऽथ जुगुप्सा भयमित्यष्टौ [1]लक्ष्म वक्ष्यते तेषाम्
॥ १०७ ॥

तत्र रतिः[2]

यूनोरन्योन्यविषया स्थायिनीच्छा रतिर्भवेत् ।
[3]निसर्गेणाभियोगेन संसर्गेणाभिमानतः ॥ १०८ ॥

उपमाध्यात्मविषयैरेषा स्यात् तत्र विक्रियाः ।
कटाक्षपातभ्रूक्षेपप्रियवागादयो मताः ॥ १०९ ॥

atiraskṛtamūrtimān, yāvadrasaṃ vartamānaḥ sthāyī bhāva udāhṛtaḥ (p. 158). This is incorrectly attributed to the *DR*, where it is not found. The verse appears to be based, unless it was from some earlier source, on Dhanika's line noted above. The verse (II. 106) in the *RAS* running as *sajātīyair*, etc. incorporates the definition given by Dhanaṃjaya and Dhanika. The second half of the verse *kṣīrābdhivat*, etc. is a modified presentation of the *lavaṇākara* of the *Daśarūpaka* (IV. 34 ab) into *kṣīrābdhi*. *Lavaṇākara* is a practically known thing, whereas the *kṣīrābdhi* is mythological. See also *NŚ*, vol. I, page 349.

[1] MSS. 7, 8, 9 and 10 read: *bhayam iti teṣāṃ tu vakṣyate lakṣma*; others read as given in the text.

[2] See *NŚ*, vol. I, page 350, and the *DR*, IV. 47-48.

[3] Bhoja has the following in his *Sarasvatīkaṇṭhābharaṇa*: *ratir nisargasaṃsargaupamyādhyātmābhiyogajā, saṃprayogābhimānotthā viṣayotthā ca kathyate. prītir apy evam eva syān na tv asyāṃ sāṃprayogikī, ābhyāsikī tu tatsthāne tadudāhṛtayo yathā. . . .* (page 511).

तत्र निसर्गेण रतिर्यथा–

अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ।।

(कुमारसंभवे ५. ८२)

अत्र रूपादिदृष्टकारणनिरपेक्षा पार्वत्याः रतिर्जन्मान्तरवासनारूपा निसर्गादेव भवति । अभियोगोऽभिनिवेशः । तदेकपरत्वमिति यावत् ।

तेन यथा–

तन्मे मनः क्षिपति यत् सरसप्रहार-
मालोक्य मामगणितस्खलदुत्तरीया ।
त्रस्तैकहायनकुरङ्गविलोलदृष्टिः
साश्लिष्टवत्यमृतसंवलितैरिवाङ्गैः ।।

(मालतीमाधवे ४. ८)

अत्रोत्तरीयस्खलनादिसूचितेन मदयन्तिकाप्रेमाभियोगेन मकरन्दस्य तत्र रतिरुत्पद्यते ।

संसर्गेण यथा–

उत्पत्तिर्देवयजनाद् ब्रह्मवादी नृपः पिता ।
सुप्रसन्नोज्ज्वला मूर्तिरस्यां स्नेहं करोति मे ।।

(महावीरचरिते १. २१)

अत्र देवयजनजनकादिसंबन्धगौरवेण सीतायां रामस्य रतिः ।
अथाभिमानः । इदमेव मम प्रियं नान्यदित्यभिप्रायोऽभिमानः । तेन यथा–

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।
मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः ।।
(मालतीमाधवे १. ३९)

अत्र माधवस्य विलोचनचन्द्रिकानयनमहोत्सवाद्यभिमानेन इतर-रमणीयवस्तुनैःस्पृह्येन च मालत्यां रतिः ।

उपमया यथा–

अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्ष्यीचकार ।
सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे प्रियायाः ।।
(रघु. ९. ६७)

अत्र मृगयान्तरितापि दशरथस्य प्रियाविषया रतिस्तदीयकेशकलाप-सदृशकेकिकलापदर्शनेनोत्पद्यते ।

[1]अध्यात्मं स्वात्मप्रामाण्यमात्रम् । तेन यथा—

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम् ।।
(अभिज्ञानशाकुन्तले ५. ३१)

अत्र दुष्यन्तस्य निजचित्तसंतापप्रत्ययेन शापविस्मृतायामपि शकुन्तलायां रतिः ।

[1] Only MS. 5 reads: *ādhyātmyam*.

विषयाः शब्दादयः । तत्र शब्देन यथा–([1]ममैव)

सखि मे नियतिहतायास्तद्दर्शनमस्तु[2] वा मा वा ।
पुनरपि स वेणुनादो यदि कर्णपथे पतेत् तदेवालम् ।।

अत्र प्रागदृष्टेऽपि कृष्णे वेणुनादेन कामवल्ल्याः रतिः ।

स्पर्शेन यथा–

यदयं रथसंक्षोभादंसेनांसो [3]रथाङ्गसुश्रोण्याः ।
स्पृष्टः सरोमविक्रियमङ्कुरितं मनोभवेनेव[4] ।।

(विक्रमोर्वशीये १. ११)

रूपेण यथा–

[5]अयं रामो नायं स तु जनकधर्मं दलितवान्[6]
अयं कामो नायं स तु [7]मधुमदामोदितमनाः ।

[1] *RAS*-2 and MS. 5 read: *mamaiva*; this is not found in *RAS*-1 and MS. 4. In the *Camatkāracandrikā*, a verse beginning with *varatanukabarīvidhāyinā*, etc. (p. 96) is quoted from a work by the name of *Karṇāmṛta*. The present verse: *sakhi me niyatihatāyāḥ, etc.* conveys about the *rati* (love) of a *nāyikā* mentioned as Kāmavallī, for Kṛṣṇa. Probably there was a work by the name of *Karṇāmṛta*, written by Siṃhabhūpāla, dealing with some (invented) story of Kṛṣṇa and Kāmavallī, on the lines of the *Kuvalayāvalī*. The name *Karṇāmṛta* was adopted, a short form for *Kāmavallīkarṇāmṛta*, perhaps to resemble the well known *Kṛṣṇakarṇāmṛta* of Līlāśuka, from which our author also seems to quote. See the verse *rāmo nāma*, etc. on page 171.

[2] *RAS*-2 and MS. 5 read: *tadbhāgyadarśanam*; *RAS*-1 and MS. 4 read: *taddarśanam*.

[3] *RAS*-2 and MSS. 4 & 5 read: *rathopamaśroṇyāḥ*; *RAS*-1 reads: *rathāṅga*, etc.

[4] Printed edn. reads: *manasijeneva*.

[5] Only MS. 4 reads: *mamaiva*, introducing the verse *ayaṃ rāmo nāyam*, etc.

[6] The significance of the apparently simple first foot is not very clear to me.

[7] Only *RAS*-2 reads: *madhukaramadānāhitamanāḥ*.

सखि ज्ञातं सोऽयं युवतिनयनोत्पादनफलं
निदानं भाग्यानां जयति खलु सिंहक्षितिपतिः ॥

अत्र रामादिस्मरणहेतुना नायकरूपातिशयेन कस्याश्चिद् रतिः ।

रसेन यथा–

हरस्तु किंचित् परिलुप्तधैर्य-
श्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि ॥

(कुमार. ३. ६७)

अत्र [1]यद्यपि संभोगात् प्रागज्ञातस्याधररसस्य रसं प्रति विभावता न संगच्छते, तथापि प्रसिद्धेः संभावितस्य रसस्यैव विभावत्वं बिम्बफलाधरोष्ठ[2] इति पदेन व्यज्यते। अथ वा समास्वादितदाक्षायणीबिम्बाधरस्य परमेश्वरस्य तद्रसेनैव जननान्तर-संगतायामपि तस्यां रतिः ।

गन्धेन यथा ममैव–

उन्मीलन्नवमालतीपरिमलन्यक्कारबद्धव्रतै-
रालोलैरलिमण्डलैः प्रतिपदं प्रत्याशमासेवितः ।
अङ्गानामभिजातचम्पकरुचामस्या मृगाक्ष्या स्फुर-
न्नामोदोऽयमदृष्टपूर्वमहिमा बध्नाति मे मानसम् ।

[1] The portion from *atra yadyapi*, etc. to the verse *aṅkura-pallavakalikā*, etc. (p. 217) is missing in *RAS*-2. MS. 4 reads the portion as: *atra umāmukhe bimbaphalādharoṣṭhe iti padena vyajyate*, etc.

[2] The portion from *iti padena vyajyate* to the verse *gāḍhāliṅgana*, etc. (p. 220) is missing in MS. 5. See fn. 1, p. 220.

अत्र पराशरमुनिप्रसादेन लब्धेन दिव्येन सत्यवतीशरीरसौरभेण शन्तनोस्तस्यां रतिः ।

भोजस्तु[1] संप्रयोगेण रतिमन्यामुदाहरत् ॥

(११० क-ख)

यथा—

उन्नमय्य सकचग्रहमोष्ठं
चुम्बति प्रियतमे हठवृत्त्या ।
हुं [2]हु मुञ्च म म मेति च मन्दं
जल्पितं जयति बालवधूनाम् । ॥

(विज्जिकाया इदमिति सुभाषितावलिः)

व्याकृतं च तेनैव—अत्र[3] तर्जनार्थमोक्षणार्थवारणार्थानां मन्दं मन्दं प्रयोगान्मानवत्याः संप्रयोगे रत्युत्पत्तिः प्रतीयत इति ।

संप्रयोगस्य शब्दादिष्वन्तर्भावान्न तन्मतम् ॥ ११० ॥

(ग-घ)

तथा हि- उक्तोदाहरणे मानवतीजल्पितस्य शब्दरूपत्वमेव । तथा च

[4]आअरपसारिओट्ठं अघडिअणासं अचुंबिअणिडाकं ।
वण्णघिअलिप्पमुहिए तीए परिचुम्बणं भरिमो ॥

[1] See fn. 3, p. 211.

[2] Vallabha's *Subhāṣitāvali* reads the second half thus: *huṃ mameti vadanāntaralīnaṃ jalpitaṃ jayati mānavatīnām*. The *RAS* quotation agrees with the readings of Bhoja's *Sarasvatīkaṇṭhābharaṇa*, except the last expression *mānadhanāyāḥ* (for *bālavadhūnām* of *RAS*). See *SKĀ*, page 517.

[3] See also the *Sarasvatīkaṇṭhābharaṇa*, page 517 (1925).

[4] The reading in the *Gāthāsaptaśatī* (NSP edn., KM 21) is as follows: *āarapaṇāmioṭṭhaṃ . . . . asaṃhaaṇidālam*, *vaṇṇaghiatuppam-uhie . . . .* (*Chāyā*: *ādarapraṇāmitauṣṭham . . . asaṃhatalalāṭam*, *varṇaghṛtaliptamukhyāḥ*, etc. In the footnote in the edn. *tuppa* is said to have been explained as a synonym of *lipta*, by Kulabāladeva.

(छाया–

आदरप्रसारितोष्ठमघटितनासमचुम्बितनिटिलम् ।
वर्णघृतलिप्तमुख्यास्तस्याः परिचुम्बनं स्मरामः ।।)

(गाथासप्तशती १. २२)

इत्यादिषु चुम्बनादीनामपि स्पर्शेष्वन्तर्भावः ।

(अथ [1]रत्यवस्थाः–)

अङ्कुरपल्लवकलिकाप्रसूनफलभोगभागियं क्रमशः[2] ।
प्रेमा मानः प्रणयः स्नेहो रागोऽनुरागश्च ।। १११ ।।

अथ प्रेमा–

[3]**स प्रेमा भेदरहितं यूनोर्यद् भावबन्धनम् ।** (११२ क-ख)

यथा–

[4]रथाङ्गनाम्नोरिव भावबन्धनं
बभूव यत् प्रेम परस्पराश्रयम् ।
विभक्तमप्येकसुतेन तत् तयोः
परस्परस्योपरि पर्यचीयत ।। (रघु. ३. २४)

[1] *RAS*-2 incorrectly reads: *ratyavasthāś catasraḥ*, though the enumeration has six.

[2] This verse is quoted by *Kumārasvāmin*, and introduced with the expression: *rater evāvasthāviśeṣāḥ premādayaḥ ity uktaṃ rasārṇave* (Balamano. edn. 1950, p. 200).

[3] This line, as quoted by Kumārasvāmin, reads thus: *sa premā yan mitho yūnor nirūḍhaṃ bhāvabandhanam* (ibid.).

[4] In *RAS*-2, instead of the verse *rathāṅganāmnoḥ*, etc. the following verse is given for illustration: *ciravirahiṇor atyutkaṇṭhāślathīkṛtagātrayoḥ navam iva jagaj jātaṃ bhūyaś cirād abhinandatoḥ, katham iva dine dīrghe yāte niśām adhirūḍhayoḥ prasarati kathā bahvī yūnor yathā na tathā ratiḥ* (Amaruka, NSP edn., verse 44). *RAS*-1 and MS. 4 give the verse *rathāṅganāmnoḥ*, etc.

अत्र भेदकारणे सुतस्नेहे सत्यपि सुदक्षिणादिलीपयो रतेरपरिहाणेन भेदरहितत्वम् ।

अथ मानः—

यत्तु प्रेमानुबन्धेन स्वातन्त्र्याद्धृदयंगमम् ।। ११२ ।।
(ग-घ)

बध्नाति भावकौटिल्यं सोऽयं मान इतीर्यते ।
(११३ क-ख)

यथा—

व्यपोहितुं[1] लोचनतो मुखानिलै-
रपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः
प्रियं जघानोन्नतपीवरस्तनी ।।
(किरातार्जुनीये ८. १९)

अत्रापराधसंभावनायामपि प्रेमकल्पितस्वातन्त्र्येण अवज्ञारूपं चित्तकौटिल्यम् ।

अथ प्रणयः—

बाह्यान्तरोपचारैर्यत् प्रेममानोपकल्पितैः ।। ११३ ।।
(ग-घ)

बध्नाति भावविस्रम्भं सोऽयं प्रणय उच्यते ।
(११४ क-ख)

[1] In *RAS*-2, instead of the verse *vyapohitum*, etc. the following verse is given: *muñca kopam animittakopane saṃdhyayā praṇamito'smi nānyathā, kiṃ na vetsi sahadharmacāriṇaṃ cakravākasamavṛttim ātmanaḥ.* (*Kumārasaṃbhava*, VIII.51). *RAS*-1 and MS. 4 give the verse *vyapohitum, etc.*

यथा–

[1]प्रतिश्रुतं द्यूतपणं सखीभ्यो
विवक्षति प्रेयसि कुञ्चितभ्रूः ।
कण्ठं कराभ्यामवलम्ब्य तस्य
मुखं पिधत्ते स्वकपोलकेन ।।

अत्र भावबन्धनापराधकौटिल्ययोरनुवृत्तौ कण्ठालम्बनादिनोपचारेण विस्रम्भः ।

अथ स्नेहः–

विस्रम्भे परमां काष्ठामारूढे दर्शनादिभिः ।। ११४ ।। (ग-घ)

यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्यते । (११५ क-ख)

[2]दर्शनेन यथा कन्दर्पसंभवे[3]–

उभे तदानीमुभयोस्तु चित्ते
कदुष्णनिःश्वासचरिष्णुकेन ।

[1] In *RAS*-2, instead of the verse *pratiśrutam*, etc. the following verse is given: *kāñcyā gāḍhatarāvanaddhavasanaprāntā kimartham punarmugdhākṣī svapitīti tatparijanam svairam priye pṛcchati, mātaḥ svaptum apīha vārayati mām ity āhitakrodhayā paryasya svapanacchalena śayane datto'vakāśas tayā* (Amaruka, v. 21). *RAS*-1 and MS. 4 give the verse *pratiśrutam*, etc. MS. 4 alone, however, reads *bhuktam śrutam*, etc. instead of *pratiśrutam*. Other expressions are common in both *RAS*-1 and MS. 4.

[2] The portion from *darśanena* to *sparśanena*, including the verse *ubhe tadānīm*, etc. is missing in *RAS*-2.

[3] After *Kandarpasambhave*, and before the verse *ubhe tadānīm*, etc. the expression *mamaiva* is found only in *RAS*-1. *RAS*-2 and MS. 4 do not have *mamaiva*; the portion is missing in MS. 5 (See fn. 2, p. 215). Previously, the verse *cikṣepa lakṣmīr*, etc. was quoted in the text (page 184), which is mentioned as of Viśveśvara in the *Camatkāracandrikā* (on page 103), his own work. On the

एकीकरिष्यन्ननुरागशिल्पी
रागोष्मणैव द्रवतामनैषीत् ।।

अत्र लक्ष्मीनारायणयोरन्योन्यदर्शनेनान्तःकरणद्रवीभावः ।
स्पर्शनेन यथा–

[1]गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा ।
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ।।

(अमरुकस्य ४०)

स त्रेधा कथ्यते प्रौढमध्यमन्दविभेदतः ।। ११५ ।।

(ग-घ)

previous occasion when the verse *cikṣepa*, etc. was quoted in the *RAS* (p. 184), the expression *mamaiva* was not found in any of the MSS. of the *RAS*, and not found even in *RAS*-1, which we could have expected, if the *Kandarpasaṃbhava* was written by Siṃhabhūpāla, as the expression *mamaiva* appearing in *RAS*-1, here alone seemed to indicate. I, therefore, think that the expression *mamaiva* found only in *RAS*-1, before the verse *ubhe tadānīm*, etc. is incorrect being not corroborated by any other manuscript of the *RAS*. On the basis of the single and dubious occurrence of the expression *mamaiva* in *RAS*-1, introducing the verse (*ubhe tadānīm*, etc.) from the *Kandarpasaṃbhava*, it is not correct to say that both *RAS* and *Kandarpasaṃbhava* were written by Viśveśvara. (See the Introduction to the *CC*, p. 21). I also think that it would be better to understand that the *Kandarpasaṃbhava* was written by Viśveśvara, as mentioned on page 103 of the *CC*, and that it was not written by Siṃhabhūpāla, as *mamaiva* is not found in any other MSS. of the *RAS* while introducing the verse *ubhe tadānīm*, etc. Regarding the authorship of the *RAS*, see the discussion in the Introduction.

[1] See fn. 2, p. 215.

प्रवासादिभिरज्ञातचित्तवृत्तौ प्रिये जने ।
इतरक्लेशकारी यः स प्रौढः स्नेह उच्यते ॥ ११६ ॥

यथा–

एतस्मान् मां कुशलिनमभिज्ञानदानाद् विदित्वा
मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ह्रासिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥
(मेघसंदेशे २. ४५)

अत्र प्रोषिते यक्षे स्नेहजनितया तदन्यासङ्गशङ्कया जनितः प्रियाक्लेशः मय्यविश्वासिनी मा भूरिति प्रत्याश्वासनेन व्यज्यते ।

अथ मध्यमः—

इतरानुभवापेक्षां [1]सहते यः स मध्यमः ।
(११७ क-ख)

यथा–

किं देव्याः कृतदीर्घरोषमुषितस्निग्धस्मितं तन्मुखं
किं वा सागरिकां क्रमोद्धतरुषा संतर्ज्यमानां तथा ।
बद्ध्वा नीतमितो वसन्तकमहं किं चिन्तयाम्यद्य भोः
सर्वाकारकृतव्यथः क्षणमपि प्राप्नोमि नो निर्वृतिम् ॥
(रत्नावल्याम् ३. १९)

अत्र सागरिकानुभवापेक्षया राजस्नेहो वासवदत्तायां मध्यमः ।

[1] MSS. 7, 8, 9 and 10 read: *īkṣate*, instead of *sahate* of others.

अथ मन्दः–

द्वयोरेकस्य मानादौ तदन्यस्य करोति यः ।। ११७ ।।
(ग-घ)

नैवापेक्षां न चोपेक्षां स स्नेहो मन्द उच्यते ।
(११८ क-ख)

यथा–

मन्ये प्रियाहृतमनास्तस्याः प्रणिपातलङ्घनं सेवाम् ।
एवं हि प्रणयवती सा शक्यमुपेक्षितुं कुपिता ।।
(मालविकाग्निमित्रे ३. २३)

अत्र कुपितायामिरावत्यामुपेक्षापेक्षाभावस्य कथनेन राज्ञः स्नेहस्तद्विषयो मन्दः । आदिशब्दादतिपरिचयादयः । यथा–

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ।।
(शीलाभट्टारिकाया इदमिति शार्ङ्गधरपद्धतौ)

अत्र कस्याश्चित् स्वैरिण्याः गृहिणीत्वपरिचयेन पतिदशां प्राप्तेऽपि जारे उपेक्षापेक्षयोरभावकथनान्मन्दः स्नेहः ।

अथ रागः–

दुःखमप्यधिकं चित्ते सुखत्वेनैव रज्यते ।। ११८ ।।
(ग-घ)

येन स्नेहप्रकर्षेण स राग इति गीयते ।

[1]कुसुम्भनीलीमाञ्जिष्ठरागभेदेन स त्रिधा ॥ ११९ ॥
कुसुम्भरागः स ज्ञेयो यश्चित्ते रज्यति क्षणात् ।
अतिप्रकाशमानोऽपि क्षणादेव विनश्यति ॥ १२० ॥

यथा—

बहुवल्लहस्स जा [2]होइ वल्लहा कहवि पञ्जदि अहाइं ।
सा किं छट्ठं मग्गई कत्तो मिट्ठं अ बहुअं अ ॥

(छाया—

बहुवल्लभस्य या भवति वल्लभा कथमपि
पञ्चदिवसानि ।
सा किं षष्ठं मृगयते कुतो मृष्टं च बहुकं च ॥)
(गाथासप्तशती १. ७२)

नीलीरागस्तु यः सक्तो नापैति न च दीप्यते ।
(१२१ क-ख)

यथा—

यदैव पूर्वे जनने शरीरं सा दक्षरोषात् सुदती ससर्ज ।
तदा प्रभृत्येव विमुक्तसङ्गः पतिः पशूनामपरिग्रहोऽभूत्॥
(कुमारसंभवे १. ५३)

[1] The three halves from *kusumbhanīlī,* etc. to *vinaśyati,* are missing in *RAS*-2.

[2] *RAS*-1, *RAS*-2 and MSS. 4 & 5 read: *bahuvallahassa kā hoi vallahā ahavā paṃca diahāiṃ, tā kiṃ satthaṃ miggai jassiṃ diṭṭhama bahua.* (*Chāyā*: *bahuvallabhasya kā bhavati vallabhā atha vā pañca divasān, tat kiṃ śāstraṃ mṛgyate yasmin dṛṣṭaṃ ca bahu ca*). (*RAS*-2 reads *miṭṭham* & *mṛṣṭaṃ,* for *diṭṭham* & *dṛṣṭam.*) The reading given in the text is the reading in the NSP edn. of *GS,* which seems to make better sense.

अत्र पशुपतिचित्तरागः सतीसंगमाभावनिश्चयेनापि नापैति । विषयाभावान्न प्रकाशते च ।

अचिरेणैव संसक्तश्चिरादपि न नश्यति ।। १२१ ।।

(ग-घ)

अतीव शोभते योऽसौ माञ्जिष्ठो राग उच्यते ।

(१२२ क-ख)

यथा–

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात् परिणते यत् स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत् प्राप्यते ।।

(उत्तररामचरिते १. ३८)

राग एव स्वयं वेद्यदशाप्राप्त्या प्रकाशितः ।। १२२ ।।

(ग-घ)

यावदाश्रयवृत्तिश्चेदनुराग इतीरितः ।

(१२३ क-ख)

यथा ममैव–

अश्रान्तकण्टकोद्गममनवरतस्वेदमविरतोत्कम्पम् ।
[1]अनिशमुकुलितापाङ्गं मिथुनं कलयामि तदविनाभूतम् ।।

अत्र पार्वतीपरमेश्वरयो रतिः शरीरैक्यसंबन्धेन यावदाश्रयवृत्तिः अनुभूतसर्वरागोपप्लवतया स्वसंवेद्यदशाप्रकाशितनित्यभोगरूपा अश्रान्तरोमाञ्चादिभिरनुभावैर्व्यज्यते ।

[1] *RAS*-2 and MS.5 read: *aniśonmīladapāṅgam*; *RAS*-1 and MS. 4 read as given.

अन्ये[1] प्रीतिं रतेर्भेदमामनन्ति न तन्मतम् ॥ १२३ ॥

(ग-घ)

असंप्रयोगविषया सेयं हर्षान्न भिद्यते ।

अथ[2] हासः–

भाषणाकृतिवेषाणां क्रियायाश्च विकारतः ॥ १२४ ॥
लौल्यादेश्च परस्थानामेषामनुकृतेरपि ।
विकारश्चेतसो हासस्तत्र चेष्टाः समीरिताः ॥ १२५ ॥
दृष्टेर्विकारो नासोष्ठकपोलस्पन्दनाद्यः । (१२६ क-ख)

भाषाविकारो भाषणासंबद्धत्वादिः । आकृतिविकृतिरतिवामनदन्तुरत्वादिः । वेषविकारो विरुद्धालंकारकल्पना । क्रियाविकारो विकटगतित्वादिः । एषामुदाहरणानि कैशिक्यां [3]शुद्धहास्यजे नर्मणि निरूपितानि द्रष्टव्यानि ।

लौल्याद् यथा–

बालेयतण्डुलविलोपकदर्थिताभि-
रेताभिरग्निशरणेषु सधर्मिणीभिः ।
उत्त्रासहेतुमपि दण्डमुदस्यमान-
माघ्रातुमिच्छति मृगे मुनयो हसन्ति ॥

(अनर्घराघवे २. २०)

अत्र मृगाणां संत्रासनयष्टिसमाघ्राणलौल्येन मुनीनां हासः ।

[1] See Bhoja's *SKĀ* (NSP, 1925), V. 138, p. 488.
[2] See *NŚ*, vol. I, p. 350, and the *DR*, IV. 76.
[3] See the earlier portion from I. 274 and the following.

परानुकरणेन यथा–

पि पि प्रिय स स स्वयं मु मु मुखासवं देहि मे
त त त्यज दु दु द्रुतं भ भ भ भाजनं काञ्चनम् ।
इति स्खलितजल्पितं मदवशात् कुरङ्गीदृशः
प्रगे[1] हसितहेतवे सहचरीभिरध्यैयत ॥
(भोजस्य सरस्वतीकण्ठाभरणे १४२ पुटे, ४६८ पुटे च)

अथोत्साहः[2]–

शक्तिधैर्यसहायाद्यैः फलश्लाघ्येषु कर्मसु ॥ १२६ ॥
(ग-घ)

सत्वरा मानसी वृत्तिरुत्साहस्तत्र विक्रियाः ।
कालाद्यवेक्षणं धैर्यं [3]वागारम्भादयोऽपि च ॥ १२७ ॥
सहजाहार्यभेदेन स द्विधा परिभाष्यते । (१२८ क-ख)

शक्त्या सहजोत्साहो यथा–

अथो महेन्द्रं गिरिमारुरोह
वारां निधिं लङ्घयितुं हनूमान् ।
वामेतराक्षिस्फुरणेन जानन्
करस्थितां राघवकार्यसिद्धिम् ॥

अत्र हनूमतः स्वशक्तिजनितः समुद्रतरणोत्साहो महेन्द्रारोहणेन व्यज्यते ।

[1] *prage* is an indeclinable particle, and means 'in the morning'. Amara notes: *prage prātaḥ prabhāte.*

[2] See *NŚ*, vol. I, p. 353 and the *DR*, IV. 73.

[3] *RAS*-2 and MSS. 5,7,8,9 and 10 read: *tyāgārambhādayo'pi ca*; *RAS*-1 and MS. 4 read: *vāgārambhādayo'pi ca.*

स एव धैर्येण यथा–

शक्त्या वक्षसि मग्नया सह मया मूढे प्लवङ्गाधिपे
निद्राणेषु च विद्रवत्सु कपिषु प्राप्तावकाशे द्विषि ।
मा भैष्टेति निरुन्धतः कपिभटानस्योर्जितात्मस्थितेः[1]
सौमित्रेरधियुद्धभूमि गदिता वाचस्त्वया न श्रुताः ।।

अत्र रावणशक्तिप्रहारेण क्षीणशक्तेरपि लक्ष्मणस्य धैर्यजनितोत्साहः कपिभटाश्वासनादिभिर्व्यज्यते ।

सहायेन सहजोत्साहो यथा–

स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे विजिगीषया ।।
(रघु. ४. २६)

शक्त्याहार्योत्साहो यथा–

हस्तालम्बितमक्षसूत्रवलयं कर्णावतंसीकृतं
स्रस्तं भ्रूयुगमुन्नमय्य रचितं यज्ञोपवीतेन च ।
संनद्धा जघने च वल्कलपटी पाणिश्च धत्ते धनु-
र्दृष्टं भो जनकस्य योगिन इदं दान्तं विरक्तं मनः ।।
(वालरामायणे १. ५३)

धैर्यसहायाभ्यामाहार्यो यथा–

तव प्रसादात् कुसुमायुधोऽपि
सहायमेकं मधुमेव लब्ध्वा ।

[1] *RAS*-1 reads: *asyorjitabhrūsthiteḥ*; MS. 4 reads: *asyojjhitabhrū-sthiteḥ*. Both read the last foot as *sattvacchedaviśaṃsthulākṣarajaḍā vācas tvayā na śrutāḥ*. *RAS*-2 and MS. 5 read as given.

कुर्यां हरस्यापि पिनाकपाणे-
धैर्यच्युतिं के मम धन्विनोऽन्ये ॥

(कुमारसंभवे ३. १०)

अत्र स्वभावशक्तिरहितस्य मन्मथस्य इन्द्रप्रोत्साहनजनितेन धैर्येण वसन्तसहायेन चाहृतोत्साहो धैर्यच्युतिचिकीर्षाकथनादभिव्यज्यते ।

अथ विस्मयः[1]–

लोकोत्तरपदार्थानां [2]तत्पूर्वालोकनादिभिः ॥ १२८ ॥
(ग-घ)
विस्तारश्चेतसो यस्तु विस्मयः स निगद्यते ।
क्रियास्तत्राक्षिविस्तारसाधूक्तिपुलकादयः ॥ १२९ ॥

यथा–

शिला कम्पं धत्ते शिव शिव वियुङ्क्ते कठिनता-
महो नारीच्छायामयति वनिताभूयमयते ।
वदत्येवं रामे विवलितमुखी वल्कलमुरः-
स्थले कृत्वा बद्ध्वा कचभरमुदस्थाद् ऋषिवधूः ॥

अथ क्रोधः[3]–

वधावज्ञादिभिश्चित्तज्वलनं क्रोध ईरितः ।
एष त्रिधा भवेत् क्रोधकोपरोषप्रभेदतः ॥ १३० ॥
वधच्छेदादिपर्यन्तः क्रोधः क्रूरजनाश्रयः ।
अभ्यर्थनावधिः प्रायः कोपो वीरजनाश्रयः ॥ १३१ ॥

[1] See *NŚ*, vol. I, p. 355, and the *DR*, IV. 79-80.
[2] Only *RAS*-2 reads: *apūrvālokanādibhiḥ.*
[3] See *NŚ*, vol. I, p. 352, and the *DR*, IV. 75.

शत्रुभृत्यसुहृत्पूज्याश्चत्वारो विषयास्तयोः ।
मुहुर्दष्टोष्ठता भुग्नभ्रुकुटीदन्तघट्टनम् ।। १३२ ।।
हस्तनिष्पीडनं गात्रकम्पः शस्त्रप्रतीक्षणम् ।
स्वभुजावेक्षणं कण्ठगर्जाद्याः शात्रवक्रुधि ।। १३३ ।।

वधेन शत्रुविषयक्रोधो यथा–

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ।।
(वेणीसंहारे ३. २४)

अवज्ञया शत्रुविषयक्रोधो यथा–

[1]श्रुतिशिखरनिषद्यावेद्यमानप्रभावं
पशुपतिमवमन्तुं चेष्टते यस्य बुद्धिः ।
प्रलयशमनदण्डोच्चण्डमेतस्य सोऽहं
शिरसि चरणमेनं पातयामि त्रिवारम् ।।

अत्र [2]परमेश्वरावज्ञया जनितो दक्षविषयो दधीचिक्रोधः परुषवागारम्भेण व्यज्यते ।

भृत्यक्रोधे तु चेष्टाः स्युस्तर्जनं मूर्धधननम् ।
निर्भर्त्सनं च बहुधा मुहुर्निर्वर्णनादयः ।। १३४ ।।

[1] *RAS*-2 & MS. 5 read: *śrutiśikharavacobhiḥ*, etc.; *RAS*-1 & MS. 4 read as given.

[2] *RAS*-1 and MS. 5 read: *paraśurāmeṇeśvarāvajñāyā janito dadhīcikrodhaḥ paruṣavāgārambheṇa vyajyate*; *RAS*-2 and MS. 5 read as given in the text.

यथा वीरानन्दे—

आधूतमूर्धदशकं तरलाङ्गुलीकं
रूक्षेक्षणं परुषहुंकृतिगर्भकण्ठम् ।
पश्यन् निशाचरमुखानि ततोऽवतीर्णः
सौधात् प्लवङ्गपतिमुष्टिहतो दशास्यः ॥

अत्र सुग्रीवसंपाते पलायितेषु भृत्येषु रावणस्य क्रोधो मूर्धधूननादिभिरनुभावैर्व्यज्यते ।

[1] **मित्रक्रोधे विकाराः स्युर्नेत्रान्तःपतदश्रुता ।**
तूष्णींध्यानं च नैश्चल्यं श्वसितानि मुहुर्मुहुः ॥ १३५ ॥
मौनं विनम्रमुखता भुग्नदृष्टयादयोऽपि च ।
(१३६ क-ख)

यथा ममैव—

सुभद्रायाः श्रुत्वा तदनुमतिमत् तेन हरणं
कृतं कौन्तेयेन क्षुभितमनसः स्तब्धवपुषः ।
नमद्वक्त्राः स्वान्ते किमपि विलिखन्तोऽतिकुटिलै-
रपश्यन्नुद्बाष्पैर्यदुपतिमपाङ्गैर्यदुभटाः ॥

अत्र सुभद्राहरणानुमत्या जनितः कृष्णविषयो यदूनां क्रोधः कुटिलवीक्षणादिभिर्व्यज्यते ।

पूज्यक्रोधे तु चेष्टाः स्युः स्वनिन्दा नम्रवक्त्रता
॥ १३६ ॥ (ग-घ)

[1] The portion from *mitrakrodhe*, etc., the following illustration, and the comments are missing in *RAS*-2. Others have them.

अनुत्तरप्रदानाङ्गस्वेदगद्गदिकादयः । (१३७ क-ख)

यथा वीरानन्दे—

रामप्रवासजननीं जननीं विलोक्य
रूक्षं विवक्षुरपि गद्गदिकां दधानः ।
नम्राननः कुटिलरज्यदपाङ्गदृष्टि-
र्जज्वाल चेतसि परं भरतो महात्मा ।।

शत्रुक्रोधे तु चेष्टाः स्युर्भावगर्भितभाषणम्
।। १३७ ।। (ग-घ)

भ्रूभेदनिटिलस्वेदकटाक्षारुणिमादयः । (१३८ क-ख)

यथा—

कोपेन प्रविधूतकुन्तलभरः सर्वाङ्गजो वेपथुः
किंचित्कोकनदच्छदेन सदृशे नेत्रे स्वयं रज्यतः ।
धत्ते कान्तिमिदं च वक्त्रमनयोर्भङ्गेन भीमभ्रुवो-
श्चन्द्रस्योद्भटलाच्छनस्य कमलस्योद्भ्रान्त-
भृङ्गस्य च ।। (उत्तररामचरिते ५. ३६)

अत्र लवस्य चन्द्रकेतोश्च परस्परविषयः कोपो भ्रूभेदादिभिर्व्यज्यते ।

भृत्यादिकोपत्रितये तत्तत्क्रोधोदिताः क्रियाः ।।१३८।।
(ग-घ)

अथ रोषः—

मिथः स्त्रीपुंसयोरेव रोषः स्त्रीगोचरः पुनः ।
प्रत्ययावधिरत्र स्युर्विकाराः कुटिलेक्षणम् ।। १३९ ।।
अधरस्फुरणापाङ्गरागनिःश्वसितादयः । (१४० क-ख)

यथा वीरानन्दे—

भ्रूभङ्गभिन्नमुपरञ्जितलोचनान्त-
माकम्पिताधरमतिश्वसितानुबन्धम् ।
पत्युर्मुखं क्षितिसुता परिलोकयन्ती
काराविमुक्तिरपि कष्टतरेति मेने ।।

अत्र रावणकारागारशङ्कया जनितः सीताविषयो रामस्य रोषो भ्रभङ्गादिभिरनुभावैर्व्यज्यते ।

प्रत्ययावधित्वं यथा—

दिष्टयार्धश्रुतविप्रलम्भजनितक्रोधादहं नो गतो
दिष्टया नो परुषं रुषार्धकथिते किंचिन्मया व्याहृतम् ।
मां प्रत्याययितुं विमूढहृदयं दिष्टया कथान्तं गता
मिथ्यादूषितयानया विरहितं दिष्टया न जातं जगत् ।।
(वेणीसंहारे २. १३)

अत्र स्वप्नवृत्तान्तश्रवणभ्रान्तिजनितस्य भानुमतीविषयकस्य सुयोधनरोषस्य स्वप्नशेषश्रवणजनितप्रत्ययकृता शान्तिः दिष्टयेत्यादिवागारम्भेण व्यज्यते ।

द्वेधा निगदितः स्त्रीणां रोषः पुरुषगोचरः ।। १४० ।।
(ग-घ)

सपत्नीहेतुराद्यः स्यादन्यः स्यादन्यहेतुकः ।
सपत्नीहेतुको रोषो विप्रलम्भे प्रपञ्चयते ।। १४१ ।।
अन्यहेतुकृते त्वत्र क्रियाः पुरुषरोषवत् । (१४२ क-ख)

यथा–

मय्येव विस्मरणदारुणचित्तवृत्तौ
वृत्तं रहःप्रणयमप्रतिपद्यमाने ।
भेदाद् भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ।।

(अभिज्ञानशाकुन्तले ५. २३)

अत्र मानप्रणोदनघनगर्जितसंत्रासस्य प्रियप्रयत्नैर्विना दैववशेन संभूतत्वाद् यादृच्छिकत्वम् ।

प्रत्युत्पन्नधिया पुंसा कल्पितं बुद्धिपूर्वकम् ।। २१४ ।।
(ग-घ)

यथा—

लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित् केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा कुड्मलिताननेन ददती वायुं स्थिता तस्य सा
भ्रान्त्या धूर्ततयाथ सा नतिमृते तेनानिशं चुम्बिता ।।

(अमरुकस्य ७२)

अत्र मानापनोदनस्य प्रियत्रासस्य नेत्रव्यावृत्तिनटनलक्षणतया नायकस्य प्रत्युत्पन्नमत्या कल्पितत्वाद् बुद्धिपूर्वकत्वम् ।

अथ प्रवासः—

पूर्वसंगतयोर्यूनोर्भवेद् देशान्तरादिभिः ।
[1]चरणव्यवधानं यत् स प्रवास इतीरितः ।। २१५ ।।

[1] MS. 4 reads (on the margin) also *marana* (for *caraṇa*); MS. 10 reads *kāraṇavyavadhānam*; all others read: *caraṇavyavadhānam*. *caraṇavyavadhāna* seems to be in the sense of 'obstacle to free movement'. *caraṇa* is a *lyuḍanta* form from the root *cara=gati*, etc.

तज्जन्यो विप्रलम्भोऽपि प्रवासत्वेन संमतः ।
हर्षगर्वमदव्रीडा वर्जयित्वा समीरिताः ॥ २१६ ॥
शृङ्गारयोग्याः सर्वेऽपि प्रवासव्यभिचारिणः ।
कार्यतः संभ्रमाच् छापात् स त्रिधा तत्र कार्यजः ॥ २१७ ॥
बुद्धिपूर्वतया यूनोः [1]संविधानव्यपेक्षया ।
वृत्तो वर्तिष्यमाणश्च वर्तमान इति त्रिधा ॥ २१८ ॥

धर्मार्थसंग्रहाय[2] बुद्धिपूर्वो व्यापारः कार्यम् । तेन वृत्तो यथा–

क्रियाप्रबन्धादयमध्वराणामजस्रमाहूतसहस्रनेत्रः ।
शच्याश्चिरं पाण्डुकपोललम्बान्मन्दारशून्यानलकांश्चकार ॥
(रघु. ६. २३)

अत्र पुरंदरस्य पूर्वं शचीमामन्त्र्य पश्चादध्वरप्रदेशगमनेन तयोः संविधानव्यपेक्षया (कार्यतो) विप्रलम्भस्य भूतपूर्वत्वम् ।

वर्तिष्यमाणो यथा–

भवतु विदितं व्यर्थालापैरलं प्रिय गम्यतां
तनुरपि न ते दोषोऽस्माकं विधिस्तु पराङ्मुखः ।

[1] *RAS*-1, *RAS*-2 and MSS. 4 & 5 read: *saṃnidhānavyapekṣayā*; MSS. 7, 8, 9 and 10 read: *saṃvidhānavyapekṣayā*, which I think is better. *saṃvidhānam* means situation. *buddhipūrvatayā saṃvidhānavyapekṣayā vipralambhaḥ* means 'intentional separation caused by the necessity of the situation'.

[2] *RAS*-1 and MS. 4. read:-*saṃgraho*; *RAS*-2 and MS. 5 read: -*saṃgrahāya*. Commenting on IV. 65, etc. Dhanika says thus: *ādyaḥ kāryajaḥ samudragamanasevādikāryapravṛttau buddhipūrvakatvād bhūtabhaviṣyadvartamānatayā trividhaḥ* (page 237).

तव यदि तथारूढं प्रेम प्रपन्नमिमां दशां
प्रकृतितरले का नः पीडा गते हतजीविते ॥

(अमरुकस्य ३०; धर्मकीर्तेरिति सुभाषितरत्नकोशः, सूक्तिमुक्तावलिः, सुभाषितावलिश्च)

वर्तमानो यथा–

यामीति प्रियपृष्टायाः प्रियायाः कण्ठलग्नयोः ।
वचोजीवितयोरासीत् पुरो निःसरणे रणः ॥

अथ संभ्रमात्–

आवेगः संभ्रमः सोऽपि नैको दिव्यादिभेदतः ।

(२१६ क-ख)

तत्र दिव्यो यथा–

तिष्ठेत् कोपवशात् प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन् मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः ॥

(विक्रमोर्वशीये ४. ६)

अत्र विप्रलम्भस्य कारणान्तरनिरासेन कोऽयं विधिरिति विधेः कारणत्वाभिप्रायेण दिव्यसंभ्रमजनितत्वं प्रतीयते ।

अथ शापः[1]–

शापो वैरूप्यताद्रूप्यप्रवृत्तेर्द्विविधो भवेत् ॥ २१६ ॥

(ग-घ)

[1] *RAS*-2 reads: *atha śāpāt*, and the next line as *śāpo vairūpyatācintyapravṛttir dvividho bhavet*; others read as given.

प्रवासः शापवैरूप्यादहल्यागौतमादिषु । (२२० क-ख)

ताद्रूप्यण यथा—

कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।।

(मेघसंदेशे १)

अथ करुणविप्रलम्भः—

द्वयोरेकस्य मरणे पुनरुज्जीवनावधौ ।। २२० ।।

(ग-घ)

विरहः करुणोऽन्यस्य [1]संगमाशानुवर्तनात् ।
करुणभ्रमकारित्वात् सोऽयं करुण उच्यते ।। २२१ ।।
संचारिणोऽनुभावाश्च करुणेऽपि प्रवासवत् ।

(२२२ क-ख)

यथा—

अथ मदनवधूरुपप्लवान्तं
व्यसनकृशा प्रतिपालयां बभूव ।
शशिन इव दिवातनस्य रेखा
किरणपरिक्षयधूसरा प्रदोषम् ।।

(कुमारसंभवे ४. ४६)

[1] *RAS*-2 and MS. 5 read: . . . *karuṇo na syāt saṃgamāśānuvartanāt*; *RAS*-1 reads: *anyasya saṃgamāśānivartanaḥ*; MS. 4 reads: . . . . *anuvartanaḥ*; others read as given in the text.

अत्राकाशसरस्वतीप्रत्ययेन रतेर्विप्रलम्भः कृशत्वाद्यनुमितैर्ग्लान्यादिभिः व्यभिचारिभावैः पोषितः[1] समयपरिपालनादिभिरनुभावैर्व्यज्यते ।

अत्र [2]केचिदाहुः– करुणो नाम विप्रलम्भशृङ्गारो नास्ति । उभयालम्बनस्य तस्य एकत्रैवासंभवात् । यत्र त्वेकस्यापाये सति तदितरगताः प्रलापादयो भवन्ति स शोकान्न भिद्यते इति । तदयुक्तम् । यत्र [3]पुनरुज्जीवनेन संभोगो नास्ति तत्र सत्यं शोक एव । यत्र सोऽस्ति तत्र विप्रलम्भ एव । अन्यथा संभोगशिरस्के अन्यतरापायलक्षणे वैरूप्यशापप्रवासेऽपि शोकरूपत्वापत्तेः । नन्वेवं प्रवासकरुणयोः (प्रवासस्य करुणविप्रलम्भस्य च) को भेद इति चेद् उच्यते, शरीरेण देशान्तरगमने प्रवासः । प्राणैर्देशान्तरगमने करुण (विप्रलम्भः) इति ।

अत्र केचित् अयोगशब्दस्य पूर्वानुरागवाचकत्वं विप्रयोगशब्दस्य मानादिवाचकत्वं चाभिप्रेत्य अयोगो विप्रयोगश्चेति (द्वेधा) संभोगादन्यस्य शृङ्गारस्य विभागमाहुः । विप्रलम्भपदस्याप्रयोगे[4] च कारणं

[1] *RAS*-1 and MS. 4 read: *proṣitasamaya*, etc.; *RAS*-2 and MS. 5 read: *poṣitaḥ*, etc.

[2] See the *DR*, IV. 67 and Dhanika and Bhaṭṭanṛsiṃha thereon. The *Śṛṅgāratilaka* has the following: *vipralambhābhidhāno'yaṃ śṛṅgāraḥ syāccaturvidhaḥ, pūrvānurāgo mānākhyaḥ pravāsaḥ karuṇātmakaḥ* (II. 1, p. 44). The *Rasakalikā* also says: *tatra virahaś caturvidhaḥ pūrvānurāgamānākhyapravāsakarūṇātmakaḥ*: (page 36, R2241). See, in the Introduction, the topic on *Rudraṭa* mentioned in the *RAS*. The expressions *kecid āhuḥ*, etc. seem to be a reference to the view of Dhanaṃjaya and Dhanika. See the *DR*, IV. 67 and Dhanika and Bhaṭṭanṛsiṃha thereon (p. 240). See also, for a discussion on *karuṇavipralambha*, *The Number of Rasa-s*, Adyar, 1975, pp. 169-178.

[3] *RAS*-1 reads: *anujjīvanena sambhogābhāvas tatra*; MS. 4 has a defective line here; *RAS*-2 and MS. 5 read as given in the text.

[4] *RAS*-1 reads: *prayoge ca*, etc.; MS. 4 reads: *vipralambhasya ayogasya kāraṇaṃ brūte* ! *RAS*-2 and MS. 5 read clearly as given in the text. *atra kecid*, etc. is a reference to the view of Dhanaṃjaya

ब्रुवते–(संकेतस्थानमागमिष्यामीति)[1] उक्त्वा संकेतमप्राप्तौ तद्व्यतिक्रमे (ततो) नायिकान्तरानुसरणे च विप्रलम्भशब्दस्य (मुख्यः) प्रयोगः। वञ्चनार्थत्वात् तस्य। (अयोगविप्रयोगविशेषत्वाद् विप्रलम्भस्य तादृशविशेषाभिधायकस्य विप्रलम्भशब्दस्य) तत्सामान्याभिधायित्वे तु विप्रलम्भशब्दस्य उपचरितत्वापत्तेरिति। तदयुक्तम्। चतुर्विधेऽपि विप्रलम्भे वञ्चनरूपस्यार्थस्य मुख्यत एव सिद्धेः। तथा च श्रीभोजः–

[2]विप्रलम्भस्य यदि वा वञ्चनामात्रवाचिनः।
विना समासे चतुराश्चतुरोऽर्थान् नियुञ्जते॥
[3]पूर्वानुरागे विविधं वञ्चनं व्रीडितादिभिः।
माने विरुद्धं तत् प्राहुः पुनरीर्ष्यायितादिभिः॥

and Dhanika. See the *DR*, IV. 50(ab), and Dhanika and Bhaṭṭanṛsiṃha thereon.

[1] This is a reference, as noted in the previous note, to the discussion in the *Daśarūpaka*. The portion here in the *RAS* utilizes the wording of Dhanika's *Avaloka*, without mentioning his name. But the text of the *RAS* of the previous editions is defective here also, as in some other places. I have tried to give a correct reading on the basis of the MSS., including those of the *Avaloka* and the *Laghuṭīkā*. See my note 314 to the *Daśarūpāvaloka*, and my note 262 to the *LṬ*, and my Introduction to the *DR* (pp. LII to LIII, and LXX to LXXIII).

[2] *RAS*-2 and MS. 5 read: *pralambhetyasya yadi vā*; *RAS*-1 reads: . . . *vācinaḥ*; MS. 4 reads: . . . *vedinaḥ*. Printed edn. of the *SKĀ* reads: *pralambhety atra yadi vā vañcanāmātravācini*. Instead of taking the full line from one MS., I have selected the expressions from different MSS., in giving the full line. *RAS*-1 reads: *samāsaiḥ*; others read: *samāse*.

[3] *RAS*-1 and MS. 4 read: *pūrvānurāgo vividho*, etc. *RAS*-2 and MS. 5 have the readings which agree with those of the printed edn. of the *SKĀ*. The quotation from Bhoja only shows that the meaning of '*vi*' is different in four cases of *vipralambha*, i.e.

व्याविद्धं दीर्घकालत्वात् प्रवासे तत् प्रतीयते ।
विनिषिद्धं तु करुणे करुणत्वेन गीयते ।।
(सरस्वतीकण्ठाभरणे ५. ६३, ६५, ६६)

अथ संभोगः–

स्पर्शनालिङ्गनादीनामानुकूल्यान् निषेवणम् ।। २२२ ।।
(ग-घ)

घटते यत्र यूनोर्यत् स संभोगश्चतुर्विधः । (२२३ क-ख)

अत्रायमर्थः—प्रागसंगतयोः संगतवियुक्तयोर्वा नायिकानायकयोः परस्परसमागमे प्रागुत्पन्ना तदानींतनी वा रतिः प्रेप्सितालिङ्गनादीनां प्राप्तौ सत्याम् उपजायमानैर्हर्षादिभिः संसृज्यमाना चन्द्रोदयादिभिरुद्दीपिता स्मितादिभिर्व्यज्यमाना प्राप्तप्रकर्षा संभोगशृङ्गार इत्याख्यायते । स च वक्ष्यमाणक्रमेण चतुर्विधः ।

संक्षिप्तः संकीर्णः संपन्नतरः समृद्धिमानिति ते
।। २२३ ।। (ग-घ)

पूर्वानुरागमानप्रवासकरुणानुसंभवाः[1] क्रमतः ।

तत्र संक्षिप्तः–

vividha, *viruddha*, *vyāviddha* and *viniṣiddha*. This does not give any convincing answer to the point noted by Dhanika. *vrīḍitādi*, etc. in the *pūrvānurāga* type would only mean the inability of the person concerned to put the desire into action, and it does not mean that there is *mukhyavañcana* (i.e. intentional deceiving) on the part of the one or the other. I do not find this argument convincing. See my Introduction to the *Daśarūpaka*, as mentioned in the note 1, p. 276.

[1] Only *RAS*-2 and MS. 5 read: . . . .*samṛddhimān itīryante* . . . .-*karuṇānubandhataḥ kramaśaḥ*.

युवानो यत्र संक्षिप्तान् साध्वसव्रीलितादिभिः

॥ २२४ ॥

उपचारान् निषेवन्ते स संक्षिप्त इतीरितः ।

(२२५ क-ख)

पुरुषगतसाध्वसेन संक्षिप्तो यथा–

लीलाए[1] तुलिअसेलो रक्खदु वो राहिआइ थणपट्ठे ।
हरिणो पुढमसमाअमसद्धसवसवेविल्लो हत्थो ॥

(सरस्वतीकण्ठाभरणेऽप्युद्धृतमिदम् ५५१ पुटे)

(छाया–

लीलया तुलितशैलो रक्षतु वो राधिकायाः स्तनपृष्ठे ।
हरेः प्रथमसमागमसाध्वसवशवेपनशीलो हस्तः ॥)

स्त्रीसाध्वसात् संक्षिप्तो यथा–

चुम्बनेष्वधरदानवर्जितं सन्नहस्तमदयोपगूहने ।
क्लिष्टमन्मथमपि प्रियं प्रभोर्दुर्लभप्रतिकृतं [2]वधूरतम् ॥

(कुमारसंभवे ८. ८)

अथ संकीर्णः–

संकीर्णस्तु पराधीनव्यलीकमरणादिभिः ॥ २२५ ॥

(ग-घ)

[1] The *SKĀ* has some slight differences in the reading of some expressions here. The *chāyā* of the verse is also given differently.

[2] See also the *Raghuvaṃśa*, XIX. 27. Commenting on the verse *cumbaneṣvadharadāna*, etc. of the *Kumārasmbhava* Mallinātha quotes the definition of the *RAS yuvāno yatra*, etc. of the *saṃkṣiptaśṛṅgāra*, with the expression *tad uktaṃ bhūpālena*.

संकीर्यमाणः संभोगः किंचित्पुष्पेषुपेशलः ।
(२२६ क-ख)

यथा–

विमर्दरम्याणि समत्सराणि विभेजिरे तैर्मिथुनै रतानि ।
वैयात्यविस्रम्भविकल्पितानि मानावसादाद् विशदीकृतानि ।।

अथ संपन्नः–

भयव्यलीकस्मरणाद्यभावात् प्राप्तवैभवः ।। २२६ ।।
(ग-घ)

प्रोषितागतयोर्यूनोर्भोगः संपन्न ईरितः । (२२७ क-ख)

यथा–

दंतक्खअं कवोले कअग्गहुव्वेल्लिओ अ धम्मिल्लो ।
[1]परिघुम्मिराअ दिट्ठी पिआगमं साहइ बहूए ।।
(सरस्वतीकण्ठाभरणेऽपीदमुद्धृतम् ५४७ पुटे)

(छाया–

दन्तक्षतं कपोले कचग्रहोद्वेल्लितश्च धम्मिल्लः ।
परिघूर्णनशीला च दृष्टिः प्रियागमं साधयति वध्वाः।।)

अत्र अप्रथमसंभोगत्वाद् भयाभावः । दन्तक्षतादिष्वङ्गार्पणानुकूल्येन व्यलीकस्मरणाद्यभावः । ताभ्यामुपारूढवैभवः संपद्यते संभोगः।

अथ समृद्धिमान्–

[2]पुनरुज्जीवने भोगसमृद्धिः कियती भवेत् ।। २२७ ।।
(ग-घ)

[1] MSS. of the *RAS* read: *paricumbiāa (paricūmbitā ca)*, instead of *parighummirāa*, and *sūai (sūcayati)* instead of *sāhai*.

[2] *RAS*-1 and MSS. 4 & 5 read: *punar ujjīvatām*; *RAS*-2 reads: *prasarajjīvatām*; MSS. 7, 8, 9 and 10 read: *punar ujjīvitā*; *RAS*-1 gives the footnote reading as *punar ujjīvane*.

शिवाभ्यामेव विज्ञेयमित्ययं हि समृद्धिमान् ।

(२२८ क-ख)

यथा–

चन्द्रापीडं सा च जग्राह कण्ठे
कण्ठस्थानं जीवितं च प्रपेदे ।
तेनापूर्वा सा समुल्लासलक्ष्मी-
मिन्दुस्पृष्टां सिन्धुलेखेव भेजे ।।

(अभिनन्दस्य कादम्बरीकथासारे ८. ८०)

यथा वा–

अकलिअपरिरम्भविब्भमाइ
अजणिअचुम्बणडम्बराइ दूरं ।
अघडिअघणताडणाइ णिच्चं
णमह अणंगरहीण मोहणाइं ।।

(छाया–

अकलितपरिरम्भविभ्रमाणि
अजनितचुम्बनडम्बराणि दूरम् ।
अघटितघनताडनानि नित्यं
नमतानङ्गरत्योर्मोहनानि ।।)

अत्र पुनरुज्जीवितेन कामेन सह रत्या रतेर्बाह्योपचारानपेक्षयैव तत्फलरूपसुखप्राप्तिकथनात् संभोगः समृद्ध्यति ।

अथ हास्यः–

[1]**विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः ।। २२८ ।।**

(ग-घ)

[1] See the *DR*, IV. 76 and the *Avaloka* thereon.

हासः सदस्यरस्यत्वं नीतो हास्य इतीर्यते ।
तत्रालस्यग्लानिनिद्राव्याध्याद्या[1] व्यभिचारिणः
॥ २२९ ॥

एष द्वेधा भवेदात्मपरस्थितिविभागतः ।
आत्मस्थस्तु यदा स्वस्य विकारैर्हसति स्वयम्
॥ २३० ॥

यथा बालरामायणे, भृङ्गिरिटिः (आत्मानं निर्वर्ण्य सोपहासम्)–

अहो त्रिभुवनाधिपतेरस्य अनुचरस्य महार्हवेषता ।
कौपीनाच्छादने वल्कमक्षसूत्रं जटाच्छटाः ।
रुद्राङ्कुशस्त्रिपुण्ड्रं च वेषो भृङ्गिरिटेरयम् ॥ (२. २)

अत्र भृङ्गिरिटिः स्ववेषवैकृतेनैव स्वयमात्मानं हसति ।

परस्थस्तु परप्राप्तैरेतैर्हसति चेत् परम् । (२३१ क-ख)

यथा–

त्रस्तः समस्तजनहासकरः करेणो-
स्तावत् खरः प्रखरमुल्ललयांचकार ।
यावच्चलासनविलोलनितम्बबिम्ब-
विस्रस्तवस्त्रमवरोधवधूः पपात ॥
(माघकाव्ये ५. ७)

[2]प्रकृतिवशात् स च षोढा स्मितहसिते विहसितावहसिते
च ॥ २३१ ॥ (ग-घ)

[1] *RAS*-2 and MS. 5 read: *vyādhyādyāḥ*; others read: *bodhādyāḥ*.
[2] This and the following half verse seem to constitute an *āryā* verse. But, serial numbering was adopted just for convenience.

अपहसितातिहसितके ज्येष्ठादीनां क्रमाद् द्वे द्वे ।
स्मितं चालक्ष्यदशनं दृक्कपोलविकासकृत् ।। २३२ ।।

यथा–

उत्फुल्लगण्डमण्डलमुल्लसितदृगन्तसूचिताकूतम् ।
[1]नमयन्त्यापि मुखाम्बुजमुन्नमितं रागसाम्राज्यम् ।।
(कुवलयावली २. १५)

अत्र गण्डमण्डलविकासदृगन्तोल्लासाभ्यां नायिकायाः स्मितं व्यज्यते।

तदेव लक्ष्यदशनशिखरं हसितं भवेत् । (२३३ क-ख)

यथा–

स्मयमानमायताक्ष्याः किंचिदभिव्यक्तदशनशोभि मुखम् ।
असमग्रलक्ष्यकेसरमुच्छ्वसदिव पङ्कजं दृष्टम् ।।
(मालविका. २. ११)

अत्र किंचिदभिव्यक्तदशनत्वादिदं हसितम् ।

तदेव कुञ्चितापाङ्गगण्डं मधुरनिःस्वनम् ।। २३३ ।।
(ग-घ)

कालोचितं सानुरागमुक्तं विहसितं भवेत् ।
(२३४ क-ख)

यथा–

सविधेऽपि मय्यपश्यति शिशुजनचेष्टाविलोकनव्याजात् ।
हसितं स्मरामि तस्याः सस्वनमाकुञ्चितापाङ्गम् ।।

फुल्लनासापुटं यत् स्यान्निकुञ्चितशिरोंसकम्
।। २३४ ।। (ग-घ)

[1] *RAS*-2, MS. 5 and the printed edn. of *Kuvalayāvalī* read: *namayantyāpi*; *RAS*-1 and MS. 4 read: *namitam*, etc.

जिह्मावलोकिनयनं तच्चावहसितं मतम् ।
(२३५ क-ख)

यथा–

[1]खर्वाटधम्मिल्लभरं करेण
संस्पृष्टमात्रं पतितं विलोक्य ।
निकुञ्चितांसं कुटिलेक्षणान्तं
फुल्लाग्रनासं हसितं सखीभिः ॥

कम्पिताङ्गं साश्रुनेत्रं तच्चापहसितं भवेत् ॥ २३५ ॥
(ग-घ)

यथा–

समं पुत्रप्रेम्णा करटयुगलं चुम्बितुमनो
गजास्ये कृष्टास्ये निबिडमिलदन्योन्यवदनम् ।
अपायात् पायाद् वः प्रमथमिथुनं वीक्ष्य तदिदं
हसन् क्रीडानृत्तश्लथचलिततुन्दः स च शिशुः ॥

करोपगूढपार्श्वं यदुद्धतायतनिःस्वनम् ।
बाष्पाकुलाक्षयुगलं तच्चातिहसितं भवेत् ॥ २३६ ॥

यथा–

इति वाचमुद्धतमुदीर्य सपदि सह वेणुदारिणा ।
सोढरिपुबलभरोऽसहनः स जहास दत्तकरतालमुच्चकैः ॥
(माघकाव्ये १५. ३९)

अथ वीरः–

विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः ।
नीतः सदस्यरस्यत्वमुत्साहो वीर उच्यते ॥ २३७ ॥

[1] *RAS*-1 and MS. 4 read: *kharvāṭa*, etc.; *RAS*-2 and MS. 5 read: *vallyātha.*

[1]एष त्रिधा समासेन दानयुद्धदयोद्भवाः ।
दानवीरे धृतिर्हर्षो मत्याद्या व्यभिचारिणः ।। २३८ ।।
स्मितपूर्वाभिभाषित्वं स्मितपूर्वं च वीक्षितम् ।
प्रसादे बहुदातृत्वं तद्वद् वाचानुमोदितम् ।। २३९ ।।
गुणागुणविचाराद्यास्त्वनुभावाः समीरिताः ।
(२४० क-ख)

यथा—

अमुष्मै [2]चौराय प्रतिहतभिये भोजनृपतिः
परं प्रीतः प्रादादुपरितनपादद्वयकृते ।
सुवर्णानां कोटीर्दश दशनकोटिक्षतगिरीन्
करीन्द्रानप्यष्टौ मदमुदितगुञ्जन्मधुलिहः ।।
(किंचित्पाठभेदेन चौरस्येति सुभाषितावलिः)

युद्धवीरे हर्षगर्वामर्षाद्या व्यभिचारिणः ।। २४० ।।
(ग-घ)

असाहाय्येऽपि युद्धेच्छा समरादपलायनम् ।
भीताभयप्रदानाद्या विकारास्तत्र कीर्तिताः ।। २४१ ।।

यथा—

रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः ।

[1] See the *DR*, IV. 73, and Dhanika and Bhaṭṭanṛsiṃha thereon.

[2] The verse in Vallabha's *Subhāṣitāvali* reads: *amuṣmai corāya pratiniyatamṛtyupratibhiye, prabhuḥ prītaḥ prādād upari navapādadvayakṛte*. The MSS. of the *RAS* read as given in the text. *RAS*-1 alone reads *harīn,* though other MSS. I collated read *girīn* (in the third foot).

विलोलयामास महावराहः
कल्पक्षयोद्वृत्तमिवार्णवाम्भः ॥ (रघु ७. ५६)

दयावीरे धृतिमतिप्रमुखा व्यभिचारिणः ।
स्वार्थप्राणव्ययेनापि विपन्नत्राणशीलता ॥ २४२ ॥
आश्वासनोक्तयः स्थैर्यमित्याद्यास्तत्र विक्रियाः ।
(२४३ क-ख)

यथा—

आर्तं कण्ठगतप्राणं परित्यक्तं स्वबान्धवैः ।
त्राये नैनं यदि ततः कः शरीरेण मे गुणः ॥
(नागानन्दे ४. ११)

अथाद्भुतः—

विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः ॥ २४३ ॥
(ग-घ)
नीतः सदस्यरस्यत्वं विस्मयोऽद्भुततां व्रजेत् ।
अत्र धृत्यावेगजाड्यहर्षाद्या व्यभिचारिणः ॥ २४४ ॥
चेष्टास्तु नेत्रविस्तारस्वेदाश्रुपुलकादयः । (२४५ क-ख)

यथा—

सोढाहे नमतेति दूतमुखतः कार्योपदेशान्तरं
तत्तादृक् समराङ्गणेषु भुजयोर्विक्रान्तमव्याहतम् ।
भीतानां परिरक्षणं पुनरपि स्वे स्वे पदे स्थापनं
स्मारं स्मारमरातयः पुलकिता रेचर्लसिंहप्रभोः ॥

अत्र नायकगुणातिशयजनितो विरोधिनां विस्मयः स्मृति-हर्षादिभिः व्यभिचारिभिरुपचितः पुलकादिभिरनुभावैर्व्यज्यमानोऽद्भुतत्वमापद्यते ।

अथ रौद्रः–

विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः ।। २४५ ।।
(ग-घ)

क्रोधः सदस्यरस्यत्वं नीतो रौद्र इतीर्यते ।
आवेगगर्वौग्र्यमर्षमोहाद्या व्यभिचारिणः ।। २४६ ।।
प्रस्वेदभ्रुकुटीनेत्ररागाद्यास्तत्र विक्रियाः । (२४७ क-ख)

यथा करुणाकन्दले–

आत्माक्षेपक्षोभितैः पीडितोष्ठैः
प्राप्तोद्योगैर्यौगपद्यादभेद्यैः ।
भिन्धिच्छिन्धिध्वानिभिर्भिल्लवर्गै-
[1]र्दर्पादन्धैरानिरुद्धिर्निरुद्धः ।।

अत्र [2]वज्रविषयो भिल्लवर्गक्रोधः स्वात्माक्षेपादिभिरुद्दीपिता दर्पान्धपरुषवागारम्भाद्यनुमितैर्गर्वासूयादिभिः परिपोषितः स्वोष्ठ-पीडनशत्रुनिरोधादिभिरनुभावैरभिव्यक्तो रौद्रतया निष्पद्यते ।

अथ करुणः–

विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः ।। २४७ ।।
(ग-घ)

[1] *RAS*-1 reads: *darpāndhair yair*, etc.; MS. 4 reads: *darpāndhāndhair*, etc.; *RAS*-2 and MS. 5 read: *darpād andhair*, etc.

[2] Vajra was the name of Aniruddha's son. See the *Bhāgavata* X. 90. 33-37.

नीतः सदस्यरस्यत्वं शोकः करुण उच्यते ।
अत्राष्टौ सात्त्विका जाड्यनिर्वेदग्लानिदीनताः
॥ २४८ ॥

आलस्यापस्मृतिव्याधिमोहाद्या व्यभिचारिणः ।
(२४९ क-ख)

यथा करुणाकन्दले–

कुलस्य व्यापत्त्या सपदि शतधोद्दीपिततनु-
र्मुहुर्बाष्पं श्वासान् मलिनमपि रागं प्रकटयन् ।
श्लथैरङ्गैः शून्यैरसकृदुपरुद्धैश्च करणै-
र्युतो धत्ते ग्लानिं करुण इव मूर्तो यदुपतिः ॥

अत्र बन्धुव्यापत्तिजनितो वसुदेवस्य शोको बन्धुगुणस्मरणादिभिरुद्दीपितो म्लानत्वेन्द्रियशून्यत्वादिसूचितैर्दैन्यमोहग्लान्यादिसंचारिभिः प्रपञ्चितो मुहुर्बाष्पश्वासमलिनमुखरागादिभिरनुभावैरभिव्यक्तः करुणत्वमापद्यते ।

अथ बीभत्सः–

विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः ॥ २४९ ॥
(ग-घ)

जुगुप्सा पोषमापन्ना बीभत्सत्वेन रस्यते ।
अत्र ग्लानिश्रमोन्मादमोहापस्मारदीनताः ॥ २५० ॥

विषादचापलावेगजाड्याद्या व्यभिचारिणः ।
स्वेदरोमाञ्चनासाग्रच्छादनाद्याश्च विक्रियाः
॥ २५१ ॥

यथा—

अंहःशेषैरिव[1] परिवृतो मक्षिकामण्डलीभिः
पूयक्लिन्नं व्रणमभिमृशन् वाससः खण्डकेन ।
रथ्योपान्ते द्रुतमपसृतं संकुचन्नेत्रकोणं
छन्नघ्राणं रचयति जनं दद्रुरोगी दरिद्रः ॥

अत्र दद्रुरोगिविषया रथ्याजनजुगुप्सा मक्षिकापूयादिभिरुद्दीपिता त्वरापसरणानुमितैर्विषादादिभिः पोषिता नेत्रसंकोचनादिभिरभिव्यक्ता बीभत्सतामाप्नोति ।

अथ भयानकः—

विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः ।
भयं सदस्यरस्यत्वं नीतं प्रोक्तं भयानकः ॥ २५२ ॥
तत्र संत्रासमरणचापलावेगदीनताः ।
विषादमोहापस्मारशङ्काद्या व्यभिचारिणः ॥ २५३ ॥
विक्रियास्त्वास्यशोषाद्याः सात्त्विकाश्चाश्रुवर्जिताः ।
(२५४ क-ख)

यथा—

श्रीसिंहक्षितिनायकस्य[2] रिपवो धाटीश्रुतेराकुलाः
शुष्यत्तालुपुटं स्खलत्पदतलं व्यालोकयन्तो दिशः ।
धावित्वा कथमप्युपेत्य तमसा गाढोपगूढां गुहाम्
अन्विष्यन्ति [3]तदन्तरेऽपि करसंस्पर्शेन गर्तान्तरम् ॥

[1] This verse (*aṃhaḥśeṣair iva*, etc) is also quoted in the *CC* (page 125).

[2] The verse *śrīsiṃha*, etc. is also quoted in the *CC* (p. 126).

[3] *RAS*-1 and MS. 4 read: *tadantare karatalasparśena*: *RAS*-2 and MS. 5 read: *tadantare'pi kara*, etc.

अत्र नायकप्रतिभूपतीनां भयं तद्धाटीश्रवणादिनोद्दीपितं व्याकुलत्वतालुशोषपदस्खलनाद्यनुमितैरावेगशङ्कात्रासादिभिर्व्यभिचारिभिरुपचितं पलायनगुहाप्रवेशगर्तान्तरान्वेषणादिभिरनुभावैरनुभूयमानं भयानकत्वेन निष्पद्यते ।

केचित् समानबलयो [1]रसयोः संकरं विदुः ।। २५४ ।।
(ग-घ)

न परीक्षाक्षममिदं मतं प्रेक्षावतां भवेत् ।
तुष्यत्वे पूर्वमास्वादः कतरस्येत्यनिश्चयात् ।। २५५ ।।
[2]स्पर्धापरत्वादुभयोरनास्वादप्रसङ्गतः ।
तयोरन्यतरस्यैव प्रायेणास्वादनादपि ।। २५६ ।।
युगपद् रसनीयत्वं नोभयोरुपपद्यते ।
[3]एषामङ्गाङ्गिभावेन संकरो मम संमतः ।। २५७ ।।

तथा च भारतीये—

भावो वापि रसो वापि प्रवृत्तिर्वृत्तिरेव वा ।
सर्वेषां समवेतानां रूपं यस्य भवेद् बहु ।।
स मन्तव्यो रसः स्थायी शेषाः संचारिणो मताः । इति ।
(नाटचशास्त्रे ७. ११९, ३७९ पुटे)

[1] *RAS*-1 reads: *samānabalayor anayoḥ*, etc.; *RAS*-2 and other MSS. read: *rasayoḥ*, etc. Regarding the *rasasaṃkara* referred to here, see the *SKĀ*, pp. 624 ff. The *Rasakalikā* also notes about the *rasasaṃkara* thus: *rasāntarasaṃkaro dvividhaḥ*; *svatantraḥ prastutopayogī ceti*, etc. (p. 44, R 2241).

[2] MSS. 7, 8, 9 and 10 read: *svargāpavargayos tulyam anusvādaprasaṅgataḥ*; all others read as given in the text.

[3] The line *eṣām*, etc. is missing in MSS. 7, 8, 9 & 10; others have it. On *aṅgāṅgibhāva*, see also the *Daśarūpaka*, III. 31-33, the *Avaloka* and the *Laghuṭīkā* thereon.

तुलाधृतत्वमनयोर्न स्यात् प्रकरणादिना ।
कवितात्पर्यविश्रान्तेरेकत्रैवावलोकनात् ।। २५८ ।।

अथ परस्परविरुद्धरसप्रतिपादनम्–

उभौ[1] शृङ्गारबीभत्सावुभौ वीरभयानकौ ।
रौद्राद्भुतावुभौ हास्यकरुणौ प्रकृतिद्विषौ ।। २५९ ।।
स्वभाववैरिणोरङ्गाङ्गिभावेनापि मिश्रणम् ।
विवेकिभ्यो न स्वदते गन्धगन्धकयोरिव ।। २६० ।।
विरोधिनोऽपि सांनिध्यादतिरस्कारलक्षणम् ।
पोषणं प्रकृतस्येति चेदङ्गत्वं न तावता ।। २६१ ।।
यत्किंचिदुपकारित्वादङ्गस्याङ्गित्वमङ्गिनि ।
न [2]तत्संनिधिमात्रेण चर्वणानुपकारतः ।। २६२ ।।
[3]अन्यथा पानकाद्येषु शर्करादेरिवापतेत् ।
अन्तरा पतितस्यापि तृणादेरुपकारिता ।। २६३ ।।
तच्चर्वणाभिमाने स्यात् सतृणाभ्यवहारिता ।
(२६४ क-ख)

निसर्गवैरिणोरङ्गाङ्गिभावात् स्वादाभावो यथा–

लालाजलं स्रवतु वा दशनास्थिपूर्ण-
मप्यस्तु वा रुधिरबन्धुरिताधरं वा ।

[1] See also the *Śṛṅgāratilaka*, III. 35, and the *Pratāparudrīya*, Balamanorama Press ed. 1950, p. 207.

[2] *RAS*-1 and MS. 4 read the foot as *tatsaṃnidhānamātreṇa*; *RAS*-2 and MS. 5, 7, 8, 9 and 10 read: *na tatsaṃnidhimātreṇa*.

[3] *RAS*-2 and MS. 5 read; *tadyathā*; others read: *anyathā*.

[1]सुस्निग्धमांसकलितोज्ज्वललोचनं वा
संसारसारमिदमेव मुखं भवत्याः ।।

अत्र शृङ्गाररसाङ्गतामङ्गीकृतवता बीभत्सेन अङ्गिनोऽपि विच्छेदाय मूले कुठारो व्यापारितः । एवमन्येषामपि विरोधिनामङ्गाङ्गि-भावेनास्वादाभावस्तत्र तत्रोदाहरणे द्रष्टव्यः ।

भृत्ययोर्नायकस्येव निसर्गद्वेषिणोरपि ।। २६४ ।।

(ग-घ)

अङ्ग्योरङ्गिनो वृद्धौ भवेदेकत्र संगतिः ।

(२६५ क-ख)

यथा—

[2]कस्तूर्या तत्कपोलद्वयभुवि मकरीनिर्मितौ प्रस्तुतायां
निर्मित्सूनां स्ववक्षस्यतिपरिचयनात् त्वत्प्रशस्तीरुपांशु ।
वीर श्रीसिंहभूप [3]त्वदहितकुभुजां राज्यलक्ष्मीसपत्नी-
मानव्याजेन लज्जां सपदि विदधते स्वावरोधे प्रगल्भाः ।।

अत्र प्रतिनायकगतयोः शृङ्गारबीभत्सयोः नायकगतवीररसाङ्ग-त्वादेकत्र समावेशो न दोषाय ।

1 *RAS*-1 reads:-*kalalojjvalalocanam*, etc.; *RAS*-2 and MSS. 4 & 5 read:-*kalitojjvala*, etc.

2 The verse *kastūryā*, etc. is also quoted and discussed in the *CC* (pp. 62-63).

3 *RAS*-1 reads: *tvadarimahibhujām*, where *mahi* is to be taken in the sense of *mahī*; *RAS*-2 and MS. 5 read: *tvadahitakubhṛtām*; MS. 4 reads: *tvadahitakubhujām*.

नन्वत्र शत्रूणां स्ववक्षसि नायकबिरुदविलेखनेन [1]जीवितान्तर्निर्मितिस्थानीयेन जनिता निजजीवितजुगुप्सा स्वावरोधसांनिध्यादिभिरुद्दीपिता लज्जानुमितैर्निर्वेददैन्यविषादादिभिरुपचिता तदनुमितैरेव मानसिककुत्सादिभिः अभिव्यक्ता सती नायकगतं शरणागतरक्षालक्षणं वीरं पुष्णातीति प्रतीयते। न पुनः प्रतिनायकगतस्य शृङ्गारस्य नायकवीरोपकरणत्वम् (इति चेद्), उच्यते। नायककृपाकटाक्षस्थिरीकृतराज्यानां प्रतिनायकानां तादृशाः (श्रृङ्गार-) विनोदाः संभवेयुः। [2]नान्यथेति तस्य शृङ्गारस्य नायकवीरोपकरणत्वं विरुदधारणादिपरिचयेन राज्यलक्ष्मीसपत्नीपदप्रयोगेण चाभिव्यज्यते।

अथ रसाभासः—

अङ्गेनाङ्गी रसः स्वेच्छावृत्तिर्वर्धितसंपदा ॥ २६५ ॥

(ग-घ)

अमात्येनाविनीतेन स्वामीवाभासतां व्रजेत्।

(२६६ क-ख)

तथा च भावप्रकाशिकायाम्—

शृङ्गारो[3] हास्यभूयिष्ठः शृङ्गाराभास ईरितः।
हास्यो बीभत्सभूयिष्ठो[4] हास्याभास इतीरितः॥

[1] The portion in the MSS. here is defective. *RAS*-1 reads: *jīvitāntanirmitsayā*; MS. 4 seems to read: *jīvitāntarnirmatsaratayā*; *RAS*-2 reads: *nirmitasthena*; MS. 5 seems to read: *nirmitasthayā*. What is given is only my guess.

[2] *RAS*-1 and MS. 4 read: *nānyatreti*; *RAS*-2 and MS. 5 read: *nānyatheti*.

[3] The printed edn. of the *Bhāvaprakāśa* reads the line thus: *hāsyābhibhūtaḥ śṛṅgāras tadābhāso bhaviṣyati* (page 132, line 17).

[4] The *Bhāvaprakāśa* reads: *bībhatsamilito* (ibid.). The other lines too have some slight differences.

वीरो भयानकप्रायो वीराभास इतीरितः ।
अद्‌भुतः करुणाश्लेषादद्‌भुताभास उच्यते ।।
रौद्रः शोकभयाश्लेषाद् रौद्राभास इतीरितः ।
करुणो हास्यभूयिष्ठः करुणाभास उच्यते ।।
बीभत्सोऽद्‌भुतशृङ्गारी बीभत्साभास उच्यते ।
स स्याद् भयानकाभासो रौद्रवीरोपसंगमात् ।। इति ।

(भावप्रकाशे १३२ पुटे सप्तदशादयः पङ्क्तयः)

अत्र शृङ्गाररसस्य अरागाद् अनेकरागात् तिर्यग्रागात् म्लेच्छरागाच्चेति [1]चतुर्विधमाभासभूयस्त्वम् । तत्र अरागस्त्वेकत्र रागाभावः । तेन रसस्याभासत्वं यथा–

[2]स रामो नः स्थाता न युधि पुरतो लक्ष्मणसखो
भवित्री रम्भोरु त्रिदशवदनग्लानिरधुना ।
प्रयास्यत्येवोच्चैर्विपदमचिराद् वानरचमू-
र्लघिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुनः ।।

(हनुमन्नाटके १०. १२)

अत्र सीतायां रावणविषयरागात्यन्ताभावादाभासत्वम् ।

[1] *RAS*-2 and MSS. 4 & 5 read: *hāsyabhūyastvam*; *RAS*-1 reads: *ābhāsabhūyastvam*.

[2] In the *Hanumannāṭaka* (X. 12) the second foot is read first, and the first foot as the second. Theie is also some slight difference in the reading of other expressions. The first three lines are supposed to have been addressed by Rāvaṇa to Jānakī, in order to frighten her. The last foot was stated by Jānakī. *ṣaṣṭhākṣaraparavilopa*, dropping the syllables after the sixth, i.e. dropping the seventh syllable in each foot, which would give the expressions thus: (a) *rāmaḥ yudhi sthātā*; (b) *daśavadanaglāniḥ bhavitrī*; (c) *vānaracamūḥ uccaiḥ padaṃ prayāsyati*.

नन्वेकत्र रागाभावाद् रसस्याभासत्वं न युज्यते । प्रथममजातानुरागे वत्सराजे जातानुरागायाः रत्नावल्याः–

दुल्लहजणाणुराओ लज्जा गुरुई परव्वसो अप्पा ।
पिअसहि विसमं पेम्मं मरणं सरणं नु वरमेक्कं ।।

(छाया–

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।
प्रियसखि विषमं प्रेम मरणं शरणं नु वरमेकम् ।।)

(रत्नावल्याम् २. १)

इत्यत्र पूर्वानुरागस्याभासत्वप्रसङ्ग इति चेद् उच्यते । अभावो हि त्रिविधः[1] प्रागभावोऽत्यन्ताभावः प्रध्वंसाभावश्चेति । तत्र प्रागभावे दर्शनादिकारणेषु संभावितेषु[2] रागोत्पत्तिसंभावनया ना[3]भासत्वम् । इतरयोस्तु कारणसद्भावेऽपि रागानुत्पत्तेराभासत्वमेव । अन्ये तु

[1] This seems to leave out the *anyonyābhāva*; but we should or we may take that the author is speaking of the three kinds of *saṃsargābhāva* ('negation by contact' as rendered literally by some). There is no scope for the *anyonyābhāva* in the discussion on *rasābhāsa*.

[2] *saṃbhāviteṣu* is missing in *RAS*-1 and MS. 4; but it is clear in *RAS*-2 and MS. 5. See also the *Ratnāpaṇa* on the verse from the *Rasakalikā* (page 45, R. 2241) which is quoted in the *Pratāparudrīya* thus: *ekatraivānurāgaś cet tiryaṅmlecchagato'pi vā, yoṣito bahusaktiś ced rasābhāsas tridhā mataḥ* (Balamano. edn. p. 163). Kumārasvāmin says: *ekatraivetyevakāreṇa (avadhāraṇena) anyatrānurāgātyantābhāvaḥ sūcyate. yathā rāvaṇe sītāyāḥ. tena strīpuṃsayor ekatrānurāge jāte anyatra anurāgaprāgabhāve ca vibhāvādisaṃpūrtisaṃbhāvanayā naiva rasābhāsatvam iti bhāvaḥ.* ... See the full portion there.

[3] *na* is very clear in *RAS*-2 and MS. 5, which is supplied within brackets in *RAS*-1; MS.4 is defective here.

स्त्रिया एव रागाभावे रसस्याभासत्वं प्रतिजानते । न तदुपपद्यते । पुरुषेऽपि रागाभावे रसस्यानास्वादनीयत्वात् । यथा–

गते प्रेमावेशे प्रणयबहुमानेऽपि गलिते
निवृत्ते सद्भावे प्रणयिनि जने गच्छति पुरः ।
तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसान्
न जाने को हेतुर्दलति शतधा यन्न हृदयम् ॥
(अमरुकस्य ४३)

अत्र हृदयदलनाभावपूर्वगतदिवसोत्प्रेक्षाद्यनुमितैर्निर्वेदस्मृत्यादिभिरभिव्यक्तोऽपि स्त्रिया अनुरागः प्रेमावेशश्लथनादिकथितेन [1]पुरुषगतरागध्वंसनेन चारुतां नाप्नोति ।

पुरुषरागात्यन्ताभावेन रसाभासत्वं यथा–

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातापि नो रक्षसि ।
मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः कुतोऽन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो [2]बुद्धो जिनः पातु वः ॥
(नागानन्दे १.१)

अत्र जिनस्य रागात्यन्ताभावेन रसाभासत्वम् ।

[1] Arjunavarmadeva, however, in his commentary on this verse notes thus: *nāyikāḥ khalu sānurāgam api nāyakam īrṣyākāleṣu niranurāgaṃ vyapadiśantīti ekānurāgo nātra śaṅkanīyaḥ* (NSP edn. 1954, p. 38). Vemabhūpāla's *śṛṅgāradīpikā* notes thus: *gate ityādivākyacatuṣṭayena krameṇa premṇaḥ hrāso'vagamyate. atra nirvedo nāma saṃcārī bhāvaḥ* (Poona Oriental Series 101, 1959, p. 50).

[2] *RAS*-1 reads: *bodhau*; printed edns. read: *buddho*; *RAS*-2 and MSS. 4 & 5 read: *śauddhodaniḥ pātu vaḥ*.

अनेकत्र योषितो रागाभासत्वं यथा–

परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव ।
अमर्त्यभावेऽपि कयोश्चिदासीदेकाप्सरःप्रार्थनयोर्विवादः ।।
(रघु. ७. ५३)

अत्र कस्याश्चिद् दिव्यवनितायाः वीरद्वये रणानिवृत्तिमरणप्राप्तदेवताभावे अनुरागस्य [1]निरुपमानशूरगुणोपाधेरवैषम्येण प्रतिभासनादाभासत्वम् ।

अनेकत्र पुंसो रागाद् यथा–

रम्यं गायति मेनका कृतरुचिर्वीणास्वनैरुर्वशी
चित्रं वक्ति तिलोत्तमा परिचयं नानाङ्गहारक्रमे ।
आसां रूपमिदं तदुत्तममिति प्रेमानवस्था द्विषा
भेजे [2]श्रीयनपोतसिंहनृपते त्वत्खड्गभिन्नात्मना ।।

अत्र नायकखड्गधारागलितात्मनः कस्यचित् स्वर्गतप्रतिनायकवीरस्य मेनकादिस्वर्लोकगणिकासु अवैषम्येण रागादाभासत्वम् ।

नन्वेवं दक्षिणादीनामपि[3] रागस्याभासत्वमिति चेत्, न । दक्षिणस्य नायकस्य नायिकासु अनेकासु वृत्तिमात्रेणैव [4]साधारण्यम् । न

[1] *RAS*-1 reads: *guṇopādeyatādeḥ*; *RAS*-2 and MS. 5 read: *śūnyaguṇopādheḥ*; MS. 4 reads: *nirūpyamāṇaśūraguṇāyādhairya*, etc. ! What is given is my conjecture.

[2] The regionalized form of Anapota as Yanapota, after the word *śrī*, is used by the writer even in Sanskrit, because of the exigencies of the metre, where rules of Telugu *saṃdhi* seem to have been applied. See also the Introduction on Telugu and Sanskrit titles in *RAS* (particularly on the title *arigāyagovāla*), and the note on verse *nityaṃśrīyannapota*, etc. (p. 300).

[3] See also the *Ratnāpaṇa* on page 163 (Balamano. edn., 1950).

[4] See Dhanika and Bhaṭṭanṛsiṃha on the *DR*, II. 7 (pp. 85-6).

रागेण । तदेकस्यामेव रागस्य प्रौढत्वम् । इतरासु तु मध्यमत्वं मन्दत्वं चेति तदनुरागस्य नाभासता । अत्र तु [1]अवैषम्येण अनेकत्र प्रवृत्तेराभासत्वमुपपद्यते ।

तिर्यग्रागाद् यथा—

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।
शृङ्गेण संस्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ।।
(कुमारसंभवे ३. ३६)

म्लेच्छरागाद् यथा—

अज्जं मोह्णसुहिअं मुअत्ति मोत्तू पलाइए हलिए ।
दरफुडिअवेण्टभारोणआइ हसिअं व फलहीए ।।
(गाथासप्तशती ४. ६०)

(छाया—

आर्यां मोहनसुखितां मृतेति मुक्त्वा पलायिते हलिके ।
दरस्फुटितवृन्तभारावनतया हसितमिव कार्पास्या ।।)

अत्र सुरतमोहनसुप्तिमरणदशयोर्विवेकाभावेन हालिकस्य म्लेच्छत्वं गम्यते ।

ननु तिर्यङ्म्लेच्छगतयोराभासत्वं न युज्यते । तयोर्विभावादि-संभवात् । आस्वादयोग्यताप्रतीतेरिति[2] चेत् न । भो [3]म्लेच्छरसवादिन् उत्कलाधिपतेः शृङ्गाररसाभिमानिनो नरसिंहदेवस्य चित्तमनुवर्तमानेन

[1] *RAS*-1 and MS. 4 read: *vaiṣamyeṇa*; *RAS*-2 and MS. 5 read: *avaiṣamyeṇa*.

[2] *RAS*-1 and MS. 4 read: *asaṃbhave nāsvādayogyatā iti cet*; *RAS*-2 and MS. 5 read clearly: *āsvādayogyatāpratīteḥ*.

[3] The expressions: *na, bho mleccharasavādin utkalādhipateḥ* are missing in *RAS*-2 and MS. 5; they are found in *RAS*-1 and MS. 4.

विद्याधरेण कविना [1]बाढमभ्यन्तरीकृतोऽसि । एवं खलु समर्थितमेकावल्यामनेन—

अपरे तु रसाभासं तिर्यक्षु प्रचक्षते । तद् न परीक्षाक्षमम् । तेष्वपि विभावादिसंभवात् । विभावादिज्ञानशून्यास्तिर्यञ्चो न भाजनं भवितुमर्हन्ति रसस्येति चेत् न । मनुष्येष्वपि केषुचित् तथाभूतेषु [2]रसविषयभावाभावप्रसङ्गात् । विभावादिसंभवो [3]हि रसं प्रति प्रयोजकः । न विभावादिज्ञानम् । ततश्च तिरश्चामप्यस्त्येव रसः इति ।

(एकावल्याम् १०६ पुटे)

न तावत् तिरश्चां विभावत्वमुपपद्यते । शृङ्गारे हि समुज्ज्वलस्य शुचिनो दर्शनीयस्यैव वस्तुनो मुनिना विभावत्वेनाम्नानात् । तिरश्चाम् उद्वर्तनमज्जनाकल्परचनाद्यभावात् उज्ज्वलशुचिदर्शनीयत्वानामसंभावना प्रसिद्धैव । अथ स्वजातियोग्यैर्धर्मैः करिणां करिणीं प्रति (ददौ सरःपङ्कजइत्यादि . . . कुमारसंभवपद्ये ३. ३७ इव) विभावत्वमिति चेत्, न । तस्यां कक्ष्यायां करिणां करिणीरागं प्रति कारणत्वं न पुनर्विभावत्वम् । किं च जातियोग्यैर्धर्मैर्वस्तुनो न विभावत्वम् । अपि तु भावकचित्तोल्लासहेतुभिः [4]रतिविशिष्टैरेव । किं च विभावादिज्ञानं नाम औचित्यविवेकः । तेन शून्यास्तिर्यञ्चो न विभावतामर्हन्ति[5] । तर्हि विभावादिज्ञानर-

[1] *abhyantarīkṛto'si* is missing in *RAS*-2 and MS. 5; they are found in *RAS*-1 and MS. 4.

[2] *rasaviṣayabhāvābhāvaprasaṅgāt* is clear in *RAS*-2 and MS. 5, which is also the reading in the printed edition of the *Ekāvalī* (page 106). *rasaviṣayabhāva* is explained by Mallinātha as: *rasāśrayatvam.* In *RAS*-1 and MS. 4, the reading is defective.

[3] *-sambhavo hi* is clear in *RAS*-2 and MS. 5, which is the reading in the printed edition of the *Ekāvalī* too. *RAS*-1 and MS. 4 read: *sambhavo'pi.*

[4] *rativiśiṣṭair eva* is not found in *RAS*-2 and MS. 5, but found in *RAS*-1 and MS. 4.

[5] *RAS*-2 and MS. 5 read: *arhanti*; *RAS*-1 and MS. 4 read: *yānti..*

हितेषु[1] मनुष्येषु रसाभासप्रसङ्ग इति चेत्, नैष दोषः। विवेकरहितजनोपलक्षणम्लेच्छगतस्य रसस्याभासत्वे स्वेष्टावाप्तेः। किं च विभावादिसंभवो हि रसं प्रति प्रयोजको न [2]विभावादिज्ञानम् इत्येतद् न युज्यते। तथा हि–विभावादेर्विशिष्टस्य वस्तुमात्रस्य वा संभवो रसं प्रति प्रयोजकः। विशिष्टप्रयोजकत्वाङ्गीकारे विवेकादिप्रवेशोऽङ्गीकृत इति अस्मदनुसरणमेव शरणं गतोऽसि। अत्र विवेकं विना तदितरविशेषवत्त्वं वैशिष्ट्यमिति चेत्, न। विशेषाणां धर्मिणि परमोत्कर्षानुसंधानतत्पराणामन्योन्यसहिष्णूनाम् इयत्तया नियमासंभवात्। अथ यदि वस्तुमात्रस्य तर्हि

अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम्। (रघु. १. ५६)

इत्यादावपि स्त्रीपुंसव्यक्तिमात्रविभावसद्भावाद् अन्वासनालक्षणानुभावसंभवाच्च शृङ्गारः स्वदनीयः प्रसज्येत। किं च

[3]अज्जं मोहणसुहिअं मुअत्ति मोत्तू पलाइए हलिए।
दरफुडिअवेण्टभारोणआइ हसिअं व फलहीए॥

इत्यादिषु स्त्रीपुंसव्यक्तिमात्रविभावसद्भावः (स्फुट एव)। तदविवेकजनितहास्यपङ्कनिर्मग्नं शृङ्गारगन्धगजमुद्धर्तुं त्वरताम् इत्यलं रसाभासापलापसंरम्भेण।

ननु सीतादिविभावैर्वस्तुमात्रैरेव योषिन्मात्रप्रतीतौ सामाजिकानां रसोदयः। न पुनर्विशिष्टैः। तत् कथमिति चेद् उच्यते। अत्र [4]जनकतनयात्वरामपरिग्रहत्वादिविरुद्धधर्मपरिहारेण ललितोज्ज्वलशुचिदर्शनीयत्वादिविशिष्ट एव श(ब्द)तः (प्रतिपाद्यमानो) सीतादिविभावो योषित्सामान्यं तादृशमेव ज्ञापयति। न पुनः स्त्रीजातिमात्रम् इति सकलमपि कल्याणम्।

[1] *RAS*-2 and MS. 5 read here only as: *vibhāvādijñānam ity etad api na yujyate*, which in fact occurs later. The portion prior to *vibhāvādijñānam*, etc. seems to be missing in *RAS*-2 and MS. 5.

[2] See the previous note.

[3] See *chāyā* on page 297.

[4] See Dhanika and Bhaṭṭanṛsiṃha on the *DR*, IV. 40-41.

हरिश्चन्द्रो [1]रक्षाकरणरुचिसत्येषु वचसां
विलासे वागीशो महति नियमे नीतिनिगमे ।
विजेता गाङ्गेयं जनभरणसंमोहनकला-
व्रतेषु श्रीसिंहक्षितिपतिरुदारो विहरते ॥
नित्यं [2]श्रीयन्नपोतक्षितिपतिजनुषः सिंहभूपालमौलेः
सौन्दर्यं सुन्दरीणां हरिणविजयिनां वागुरा लोचनानाम् ।
दानं [3]मन्दारचिन्तामणिसुरसुरभीगर्वनिर्वापणाङ्कं
विज्ञानं [4]सर्वविद्यानिधिबुधपरिषच्छेमुषीभाग्यरेखा ॥

इति [5]श्रीमदान्ध्रमण्डलाधीश्वरप्रतिगण्डभैरव-श्रीमदनपोतनरेन्द्र-
नन्दनभुजबलभीमश्रीसिंहभूपालविरचिते रसार्णवसुधाकर-
नाम्नि नाट्यालंकारशास्त्रे[6] रसिकोल्लासो नाम
द्वितीयो विलासः ।

---

[1] *rakṣākaraṇarucisatyeṣu* is clear in *RAS*-2 and MS. 5; *RAS*-1 (MS. 4 also seems so) reads: *rakṣākararucirasatyeṣu*, and suggests within brackets (*racana*). This verse is also quoted in the *Camatkāracaṇdrikā*, page 136, with the readings as given in the text.

[2] See fn. 2, p. 296, and the Introduction on Telugu and Sanskrit titles in the *RAS*.

[3] *RAS*-2 and MS. 5 read: *-surabhirgarva*, etc. *RAS*-1 and MS. 4 read as given in the text.

[4] *-vidyānidhibudha*, etc. is clear in *RAS*-2 and MS. 5. *RAS*-1 and MS. 4 read: *-vidyānidhimuṣipariṣat*, etc., where *RAS*-1 suggests within brackets *-muni-* for *muṣi*.

[5] See in the Introduction, for the significance of the title *pratigaṇḍabhairava*, etc., and the topic on Telugu and Sanskrit titles in the *RAS*.

[6] *RAS*-2 and MS. 5 read at the end of the first and the third chapters as: *nāṭyālaṃkāraśāstre*, though here they read: *nāṭyālaṃkāre*. Just with the intention of keeping uniformity, I preferred the expression *nāṭyālaṃkāraśāstre* here too. *RAS*-1 and MS. 4, however, read *nāṭyālaṃkāre*, throughout.

तृतीयो विलासः

स[1] क्षेमदायी कमलानुकूलः कठोरपारावतकण्ठनीलः।
कृपानिधिर्भव्यगुणाभिरामः परः पुमान् [2]राजमहीध्र-
वासी ॥ १ ॥

[1] This invocatory verse (*sa kṣemadāyī*, etc.) together with the following expressions *bhavatu*, etc. is found in *RAS*-2 and MS. 5; this is not found in *RAS*-1 and MS. 4; *RAS*-2 reads *sa*, whereas MS. 5 reads *vaḥ*.

[2] *RAS*-2 and MS. 5 read: *toyamahīdhravāsī*; similarly at the end of this work again, *RAS*-2 and MSS. 5 & 6 have the following verse:

śrītoyaśailavasatiḥ sa tamālanīlo, etc.

In both these cases, the meaning of the expression *toyamahīdhra* and *toyaśaila* need not be puzzling. For explanation see below.

A temple dedicated to Rāma had existed in the past on the Rājācala, the capital of Siṃhabhūpāla (see *RAS*, I. 41), parts of which remain even now on the eastern side of Racakoṇḍa. (See in the Introductory section the portion on 'A visit to Racakoṇḍa,' etc.). To this Rāma, the incarnation of Viṣṇu, whose *vigraha* is the one now preserved in the temple, perhaps the reference in these verses is intended by the author. More than one temple consecrated to Viṣṇu seems to have existed in the past on this Rājācala, because the *prastāvanā* to the *Kuvalayāvalī* of Siṃhabhūpāla (TSS ed., 1941) refers to the god Prasanna-Gopāladeva (the printed edition reads: Prasanna-Gomaladeva), which then existed in a temple on Rājaśaila. The *vigraha* of Veṇugopālasvāmin, now seen on the western side in the *garbha-gṛha* of the temple of Rāma, was probably the *vigraha* of this Prasanna-Gopāladeva.

भवत्विति संबन्धः स्मरणीयः ।

तदीदृशरसाधारं नाटचं रूपकमित्यपि ।
नटस्यातिप्रवीणस्य कर्मत्वान्नाटचमुच्यते ॥ २ ॥
यथा मुखादौ पद्मादेरारोपे रूपकप्रथा ।
तथैव नायकारोपो नटे [1]रूपकमुच्यते ॥ ३ ॥

Also inscriptions of Anapota, the father of Siṃhabhūpāla, are said to have been found 'in the temple of Rāma, and near the statue of Āñjaneya—on the eastern side of Rācakoṇḍa'—(*Inscriptions of the Madras Presidency*, Rangacharya, Volume III). To the one or the other of the incarnations of Viṣṇu perhaps the reference *toyamahīdhravāsī* or *toyaśailavasatiḥ* is intended.

In the verse at the beginning of the 3rd chapter, the expression *bhavyaguṇābhirāmaḥ* was probably intended to imply the reference to Rāma. In the *RAS* there is a reference to a drama by name *Abhirāmarāghava*, which is also noted as *Anapotanāyakīya* (See note on the line following 3. 174). Most probably Anapota, the father of our author, wrote this drama, which was perhaps the result of his profound devotion to this personal god. The drama, which must have been a beautiful piece, unfortunately has not come to light so far, except for a few quotations seen in the *RAS*.

I should like to give here my interpretation of the expression *toyaśaila*, etc. The place of Rājācala itself (or a specific spot) was perhaps given the name as Toyācala, in the sense of *toyapradhānaḥ acalaḥ=toyācalaḥ* (or *toyaśaila* similarly—to be treated under *śākapārthivādi*) signifying that this place was well known in those days for the abundance of pure water it possessed. This is only my surmise, and I cannot cite any inscriptional or other evidence to support the name for the place. Toyaśaila or toyamahīdhra is similar to *jalamaṇḍapa*. See the *Kādambarī*, page 566 (NSP edn., 1948). Arjunapaṇḍita's commentary on this explains it thus: *jalaparikṣiptaṃ śītamaṇḍapaṃ jalamaṇḍapam ity ucyate* (page 96 of the Madras transcript in my possession). See also the note on the verse *śrīrāja*- at the end.

[1] See also Dhanika and Bhaṭṭanṛsiṃha on the *DR*, I.7.

तच्च[1] नाट्यं दशविधं वाक्यार्थाभिनयात्मकम् ।

(४ क-ख)

तथा च भारतीये—

नाटकं सप्रकरणमङ्को व्यायोग एव च ।
भाणः समवकारश्च वीथी प्रहसनं डिमः ॥
ईहामृगश्च [2]विज्ञेयो दशधा नाट्यलक्षणम् ।

(नाट्यशास्त्रे १८. २-३)

रसेतिवृत्तनेतारस्तत्तद्रूपकभेदकाः ॥ ४ ॥ (ग-घ) ।

[3]लक्षितौ रसनेताराविति वृत्तं तु कथ्यते ।
इतिवृत्तकथावस्तुशब्दाः पर्यायवाचिनः ॥ ५ ॥
इतिवृत्तं प्रबन्धस्य शरीरं [4]त्रिविधं हि तत् ।
ख्यातं कल्प्यं च संकीर्णं ख्यातं रामकथादिकम् ॥ ६ ॥
कविबुद्धिकृतं कल्प्यं मालतीमाधवादिकम् ।
संकीर्णमुभयायत्तं लवराघवचेष्टितम् ॥ ७ ॥
[5]लक्ष्येष्वेतत्तु बहुधा दिव्यमर्त्यादिभेदतः ।
तच्चेतिवृत्तं विद्वद्भिः पञ्चधा परिकीर्तितम् ॥ ८ ॥

1 *RAS*-1 and MS. 4 read: *tatra*; all others read: *tacca*.

2 *RAS*-1 and MS. 4 read: *vijñeyo daśadhā nāṭyam ityapi*; *RAS*-2 and MSS. 5, 7, 8, 9 and 10 read: . . . *nāṭyalakṣaṇam*.

3 *RAS*-1 and MS. 4 read: *rakṣitāras tu netāraḥ*! *RAS*-2 and MS. 5 read: *lakṣitā rasanetāraḥ*; MSS. 7, 8, 9 and 10 read: *lakṣitau rasanetārau*.

4 See Bhaṭṭanṛsiṃha on the *DR*, I. 15-16.

5 *RAS*-1 and MS. 4 read: *lakṣye sthitaṃ tu*; *RAS*-2 and MSS. 5, 7, 8, 9 and 10 read: *lakṣyes etat tu*.

बीजं[1] बिन्दुः पताका च प्रकरी कार्यमित्यपि ।
यत् तु स्वल्पमुपक्षिप्तं बहुधा विस्तृतिं गतम् ।। ९ ।।
कार्यस्य कारणं प्राज्ञैस्तद् बीजमिति कथ्यते ।
उप्तं बीजं तरोर्यद्वदङ्कुरादिप्रभेदतः ।। १० ।।
फलाय[2] कल्पते तद्वन्नायकादिविभेदतः ।
फलायैतद् भवेत् तस्माद् बीजमित्यभिधीयते ।। ११ ।।

यथा बालरामायणे प्रथमद्वितीयाङ्कयोः कल्पिते मुखसंधौ स्वल्पो रामोत्साहो बीजमित्युच्यते ।

अथ बिन्दुः—

फले प्रधाने बीजस्य प्रसङ्गोक्तैः फलान्तरः ।
विच्छिन्ने [3]यदविच्छेदकारणं बिन्दुरिष्यते ।। १२ ।।
[4]जलबिन्दुर्यथा सिञ्चंस्तरुमूलं फलाय हि ।
तथैवायमुपक्षिप्तो[5] बिन्दुरित्यभिधीयते ।। १३ ।।

यथा तत्रैव (बालरामायणे) तृतीयचतुर्थाङ्कयोः कल्पिते प्रतिमुखसंधौ [6]निक्षिप्तो रावणविरोधमूलं सीतापरिग्रहो बिन्दुरित्युच्यते ।

[1] Dhanaṃjaya, Dhanika and Bhoja refer to these five by the term *arthaprakṛti*. Regarding the meaning of the term, and the difference in the interpretation see my note 51 to the *Laghuṭīkā* on the *Daśarūpaka*.

[2] *RAS*-1 and MS. 4 read: *phalāya tad bhaved yasmāt*; all others read as given in the text.

[3] Only *RAS*-2 reads: *tadavicchedāt*; others read: *yadavicchedāt*.

[4] See the *DR*, I. 17, where Dhanika notes *bindur jale tailabinduvat prasāritvāt*. See also the *Laghuṭīkā* on this portion.

[5] *RAS*-1, *RAS*-2 and MSS. 4 & 5 read: *muhuḥ kṣipto*; MSS. 7, 8, 9 and 10 read: *upakṣipto*.

[6] *RAS*-1 and MS. 4 read: *vikṣipto*; *RAS*-2 and MS. 5 read: *nikṣipto*.

अथ पताका (प्रकरी च)—

यत्[1] प्रधानोपकरणप्रसङ्गात् स्वार्थम् ऋच्छति ।
सा स्यात् पताका [2]सुग्रीवमकरन्दादिवृत्तवत् ।। १४ ।।
यत् केवलं परार्थस्य साधनं च प्रदेशभाक् ।
प्रकरी सा तु [3]हनुमत्सौदामन्यादिवृत्तवत् ।। १५ ।।

पताकाप्रकरीव्यपदेशो भावप्रकाशिकाकारेणोक्तः । यथा—

यथा पताका कस्यापि शोभाकृच्चिह्नरूपतः ।
स्वस्योपनायकादीनां वृत्तान्तस्तद्वदुच्यते ।।
शोभायै वेदिकादीनां यथा पुष्पाक्षतादयः ।
[4]तथर्तुवर्णनादिस्तु प्रसङ्गे प्रकरी भवेत् ।। इति ।

(भावप्रकाशे २०२ पुटे)

अथ पताकास्थानकानि—

अङ्कस्य[5] च प्रधानस्य भाव्यवस्थस्य सूचकम् ।
यदागन्तुकभावेन पताकास्थानकं हि तत् ।। १६ ।।

[1] See the *DR*, I. 13, and the *Avaloka* & *Laghuṭikā* thereon.

[2] Sugrīva in the Rāma plays, and Makaranda in the *Mālatī-mādhavaprakaraṇa*.

[3] There is a slight difference in the definitions as given in the *Daśarūpaka* (and *Avaloka*) and the *RAS*. See also the *DR*, I. 13. Hanumat in the Rāma plays, and Saudāmanī in the *Mālatī-mādhava*.

[4] *RAS*-2 and MSS. 4, 5, 7 and 10 read: *tathartuvarṇanādis tu prasaṅge*, etc. which is suggested in the footnote of the *RAS*-1, where the reading in the body is given as: *tathā tu*, etc. and *prasaṅgau*. MSS. 8 & 9 read: *tathā tadvarṇanādis tu*, etc.; printed edn. of the *BPr*. reads: *tathātra varṇanādis tu prabandhe.*

[5] *RAS*-1 and MS. 4 read: *aṅkasya*; others read: *aṅgasya.*

एतद् [1]द्विधा तुल्यसंविधानं तुल्यविशेषणम् ।
तत्राद्यं त्रिप्रकारं स्याद् द्वितीयं त्वेकमेव हि ।। १७ ।।
एवं चतुर्विधं ज्ञेयं पताकास्थानकं बुधैः । १८ (क-ख)

तथा च भरतः–

सहसैवार्थसंपत्ति[2]र्गुणवत्युपचारतः ।
पताकास्थानकमिदं प्रथमं परिकीर्तितम् ।। इति ।
(नाट्यशास्त्रे १९. ३१)

यथा रत्नावल्याम्, विदूषकः– भोः एसा क्खु अवरा देवी वासवदत्ता– (छाया– भोः एषा खलु अपरा देवी वासवदत्ता–) (राजा साशङ्कं [3]रत्नावलीहस्तं विसृजति) (रत्नावल्याम् ८४ पुटे)

इत्यत्र इय वासवदत्तेत्यनेनोपचारप्रयोगेण भाविनो वासवदत्ताकोपस्य सूचनात् सहसार्थसंपत्तिरूपमिदमेकं पताकास्थानकम् ।

तथा च (भरतः)–

वचः सातिशयं श्लिष्टं काव्यबन्धसमाश्रयम् ।
पताकास्थानकमिदं द्वितीयं परिकीर्तितम् ।। इति ।
(नाट्यशास्त्रे १९. ३२)

[1] See the *DR*, I. 14, the *Avaloka* and the *LṬ* thereon, and my note 47 to *LṬ*.

[2] *RAS*-1 reads: *guṇavṛttyupacārataḥ*; MSS. 7, 8, 9 & 10 are defective here; *RAS*-2 and MSS. 4 & 5 read: *guṇavatyupacārataḥ*, which is the reading according to Abhinavagupta too.

[3] There are some slight differences in the readings of the *Ratnāvalī*- portions as quoted in the MSS. of the *RAS* and the printed edn. of the drama. I am not noting minor differences, if they do not affect seriously the meaning in the context.

यथा उत्तररामचरिते—

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥
(१. ३८)

(प्रविश्य) प्रतीहारी— देव उपस्थितः । रामः— अये कः । इत्यत्र भविष्यतः सीताविरहस्य सूचनादिदं श्लिष्टं नाम द्वितीयं पताकास्थानकम् ।

तथा च (भरतः)—

अर्थोपक्षेपणं यत्र लीनं सविनयं भवेत् ।
श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमिष्यते ॥ इति ।
(नाट्यशास्त्रे १९. ३३)

यथा वेणीसंहारे, राजा—

लोलांशुकस्य पवनाकुलितांशुकान्तं
त्वद्दृष्टिहारि मम लोचनबान्धवस्य ।
अध्यासितुं तव चिरं जघनस्थलस्य
पर्याप्तमेव करभोरु ममोरुयुग्मम् ॥ (२. २३)

(प्रविश्य संभ्रान्तः) कञ्चुकी— देव भग्नम् । देव भग्नम् । राजा— केन । कञ्चुकी— देव भीमेन । राजा— आः किं प्रलपसि इत्यत्र श्लिष्टप्रत्युत्तरेण कञ्चुकिवाक्येन भाविनो दुर्योधनोरुभङ्गस्य सूचनेन श्लिष्टोत्तरं नाम तृतीयमिदं पताकास्थानकम् ।

तथा च (भरतः)–

द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।
उपन्याससुयुक्तश्च तच्चतुर्थमुदाहृतम् ।। इति ।
(नाट्यशास्त्रे १९. ३४)

यथा–

[1]उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणाद्
आयासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः ।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ।।
(रत्नावल्याम् २. ४)

[1] The verse *uddāmotkalikām,* etc. was perhaps given by some earlier writers as an example of the (4th) *patākāsthānaka*, as was done by Bhoja in his *Śṛṅgāraprakāśa* (Mysore edn., page 504), and Siṃhabhūpāla here. Some writers seemed to have accepted it as such, and others, probably, did not. Dhanika, Bhoja and Siṃhabhūpāla seem to belong to the first group, whereas Abhinava seems to belong to the second. He says in this context thus: *uddāmotkalikām iti tu nodāharaṇam; dvyarthatāpratipattāv api hi nātrārthena sahakāritā kutracid ācaritā; tasmād etad vīthyaṅgasya vyāhārasyaiva udāharaṇaṃ yuktam,* etc. (*ABh.*, GOS, Vol. III, pp. 21-22). The *NŚ* gives the definition of *vyāhāra* thus: *pratyakṣavṛttir ukto vyāhāro hāsyaleśārthaḥ* (GOS, Vol. II. p. 458) and the *Daśarūpaka* has *anyārtham eva vyāhāro hāsyalobhakaraṃ vacaḥ* (III. 20) and this is reproduced by Śāradātanaya too (page 233, line 6). Siṃhabhūpāla also states: *anyārthaṃ vacanaṃ hāsyakaraṃ vyāhāra ucyate* (*RAS*, III. 180). I am unable to see the element of *hāsyakaratva* in this verse (*uddāmotkalikām,* etc.), and consequently I find it difficult to take it as an example of *vyāhāra* as contended by Abhinava. This was perhaps one of the reasons that Siṃhabhūpāla, like Dhanika and Bhoja, cited the verse *uddāma,* etc. as an example of the *patākāsthānaka* (and not of *vyāhāra*), and by doing so he seemed to imply the rejection of the stand taken by Abhinavagupta. In many other places too he appears to differ from Abhinava.

इत्यत्र विशेषणश्लेषेण भाविनो रत्नावलीसंदर्शनस्य सूचनात् तुल्यविशेषणं नाम चतुर्थं पताकास्थानकमिदम् ।

अथ कार्यम्—

[1]**वस्तुनस्तु समस्तस्य धर्मकामार्थलक्षणम् ॥ १८ ॥**

(ग-घ)

फलं कार्यमिदं शुद्धं मिश्रं वा कल्पयेत् सुधीः ।

(१९ क-ख)

शुद्धं यथा मालतीमाधवे, कामन्दकी—

यत् प्रागेव मनोरथैर्वृतमभूत् कल्याणमायुष्मतो-
स्तत् पुण्यैर्मदुपक्रमैश्च फलितं क्लेशोऽपि मच्छिष्ययोः ।
निष्णातश्च समागमोऽभिविहितस्त्वत्प्रेयसः कान्तया
संप्रीतौ नृपनन्दनौ यदपरं प्रेयस्तदप्युच्यताम् ॥

(मालतीमाधवे १०. २३)

इत्यत्र काव्योपसंहारश्लोकेन तृतीयपुरुषार्थस्यैव फलत्वकथनात् शुद्धं कार्यमिदम् ।

मिश्रं यथा बालरामायणे—

रुग्णं चाजगवं न चातिकुपितो भर्गः सुरग्रामणीः
सेतुश्च ग्रथितः प्रसन्नमधुरो दृष्टश्च वारांनिधिः ।
पौलस्त्यश्चरमस्थितश्च भगवान् प्रीतः श्रुतीनां कविः
प्राप्तं यानमिदं च याचितवते दत्तं कुबेराय च ।

(बालरामायणे १०. १०४)

[1] Only *RAS*-1 reads: *vastunas tu matam tasya* ! *RAS*-2 and MSS. 4, 5, 7, 8, 9 and 10 read *vastunas tu samastasya*. See *NS*, XIX. 26 (GOS, Vol. III, page 15), and the *DR*, I. 16, and *Avaloka* and *Laghuṭīkā* thereon.

इत्यनेनोपसंहारश्लोकेन मिश्रस्य त्रिवर्गफलस्य कथनान्मिश्रमिदम् ।

प्रधानमङ्गमिति च तद् वस्तु द्विविधं पुनः ।। १९ ।।
(ग-घ)

प्रधाननेतृचरितं प्रधानफलबन्धि च ।
काव्ये [1]व्यापि प्रधानं तद् यथा रामादिचेष्टितम्
।। २० ।।

नायकार्थकृदङ्गं स्यान्नायकेतरचेष्टितम् ।
नित्यं [2]पताका प्रकरी चाङ्गं बीजादयः क्वचित् ।। २१ ।।
बीजत्वाद् बीजमादौ स्यात् फलत्वात् कार्यमन्ततः ।
तयोः संधानहेतुत्वान्मध्ये बिन्दुं [3]प्रकल्पयेत् ।। २२ ।।
यथायोगं पताकायाः प्रकर्याश्च नियोजनम् ।

(अथ कार्यस्य पञ्चावस्थाः)–

कार्यस्य पञ्चधावस्था [4]नायकादिक्रियावशात् ।। २३ ।।

[1] *RAS*-1 reads: *kāvye cāpi*; others read: *kāvye vyāpi*.

[2] This line (*nityaṃ patākā*, etc.) seems to be intended to convey that *patākā* and *prakarī* are always (i.e. *nitya*—) *aṅga*(*s*)—subordinate and none of them can be *pradhāna*. Only the *pradhānanetṛcarita* (which is *vyāpi*) can be the *pradhāna*. The significance of the expression *kvacid* is not clear to me. *bījādayas tathā* would be, perhaps, better. But the MSS. I have read only *kvacit*. See also the *RAS*. III. 28 and my Introduction to the *DR*, LX-LXII.

[3] *RAS*-1, *RAS*-2 and MSS. 4 & 5 read: *muhuḥ kṣipet*; MSS. 7, 8, 9 and 10 read: *prakalpayet*.

[4] *RAS*-1 and MS. 4 read: *patākādikriyāvaśāt*; *RAS*-2 and MS. 5 read: *saṃbhavāvasthā* (instead of *pañcadhāvasthā*); MSS. 7, 8, 9 and 10 read: *nāyakādikriyāvaśāt*. See *Abhinavabhāratī* on XIX. 7 and 13. See also the *DR*, I. 20 and the *Laghuṭīkā* thereon.

आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ।
तत्र [1]मुख्यफलोद्योगमात्रम् आरम्भ इष्यते ॥ २४ ॥

यथा बालरामायणे मुखसंधौ रामस्य लोकोत्तरोत्कर्षप्राप्तये व्यवसायमात्रमारम्भः ।

अथ यत्नः—

यत्नस्तु तत्फलप्राप्त्यामौत्सुक्येन तु वर्तनम् ।
(२५ क-ख)

यथा तत्रैव प्रतिमुखसंधौ ताटकापातनभूतपतिधनुर्दलनादिषु रामस्य यत्नः ।

अथ प्राप्त्याशा—

प्राप्त्याशा तु महार्थस्य सिद्धिसद्भावभावना ॥ २५ ॥
(ग-घ)

यथा तत्रैव गर्भसंधौ [2]माल्यवन्मायाप्रयोग-वनप्रवाससीतापहरणादिभिरन्तरितायाः रामस्य परमोत्कर्षप्राप्ते[3]र्धनुर्भङ्गादिसुग्रीवसंधिसेतुबन्धनादिभिः सिद्धिसद्भावभावनाकथनात् प्राप्त्याशा ।

अथ नियताप्तिः—

नियताप्तिरविघ्नेन कार्यसंसिद्धिनिश्चयः । (२६ क-ख)

[1] See the *Daśarūpaka*, I. 20 with the *Avaloka*.

[2] *mālyavanmāyāprayoga*, etc. is clear in *RAS*-2 and MS. 5, though not clear in *RAS*-1 and MS. 4.

[3] *RAS*-2 reads: *danubandhāvalokana*, etc.; MS. 5 seems to read: *danukabandhādiphalana*, etc. Both *RAS*-2 and MS. 5 read: *saṃdhisaṃbhāvanāmātra-*, instead of *siddhisadbhāvanā*, etc. *RAS*-1 and MS. 4 read: *-dhanurbhaṅga*, etc. as given in the text.

यथा तत्रैव (बालरामायणे) विमर्शसंधौ निखिलरक्षःकुलनिबर्हणादविघ्नेन रामस्य फलसंसिद्धिनिश्चयो नियताप्तिः ।

अथ फलागमः—

समग्रेष्टफलावाप्तिर्नायकस्य फलागमः ।। २६ ।। (ग-घ)

यथा तत्रैव (बालरामायणे) निर्वहणसंधौ रामस्य ताताज्ञानिर्वहणवैरप्रशमनराज्योपभोगै[1]र्लोकोत्तरत्रिवर्गफलस्यावाप्तिः फलागमः ।

अथ संधिः—

एकैकस्यास्त्ववस्थायाः प्रकृत्या चैकयैकया ।
योगः[2] संधिरिति ज्ञेयो नाट्यविद्याविचक्षणैः ।। २७ ।।
[3]पताकायास्त्ववस्थानं क्वचिदस्ति न वा क्वचित् ।
[4]पताकाविरहे बीजं बिन्दुं वा कल्पयेत् सुधीः ।। २८ ।।
[5]मुख्यप्रयोजनवशात् कथाङ्गानां समन्वये ।
अवान्तरार्थसंबन्धः संधिः संधानरूपतः ।। २९ ।।

[1] *RAS*-1 and MS. 4 read: *bhogottara* (for *lokottara*) & *phalalābhaprāptiḥ*; *RAS*-2 and MS. 5 read *lokottara*, and the subsequent expression . . . *phalasya avāptiḥ*.

[2] See the *DR*, I. 22(cd) & 23(ab), and Dhanika and Bhaṭṭanṛsiṃha thereon. See also my Introduction to the *DR*, p. LIX to LXIV.

[3] See the *DR*, I. 36, and Dhanika and Bhaṭṭanṛsiṃha thereon, and my note 58 to *LṬ*.

[4] *RAS*-2 and MS. 5 read: *patākāvirahe bījaṃ binduṃ vāpi niveśayet*; MSS. 7, 8, 9 and 10 read: . . . *binduṃ vā kalpayet sudhīḥ*; *RAS*-1 and MS. 4 read: *patākayā vihīne tu binduṃ vā viniveśayet*. This statement is in line with that of Śāradātanaya who says: *apatāke niveśaḥ syād bindor bījasya vā kvacit*.

[5] *RAS*-1 and MS. 4 read: *mukhaprayojana*, etc.; all others read: *mukhyaprayojana*, etc. See the *DR*, I. 23(cd), and Dhanika thereon.

(तत्र पञ्च संधयो भवन्ति ।)

मुखप्रतिमुखे गर्भविमर्शावुपसंहृतिः ।
पञ्चैते संधयः

(मुखसंधिस्तदङ्गानि चेत्थम्)–

तेषु यत्र बीजसमुद्भवः ।। ३० ।।
[1]नानाविधानामर्थानां रसानामपि कारणम् ।
तन्मुखं तत्र चाङ्गानि बीजारम्भानुरोधतः ।। ३१ ।।
उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ।। ३२ ।।
[2]उद्भेदभेदौ करणमिति द्वादश योजयेत् ।

(तत्रोपक्षेपः)–

उपक्षेपस्तु बीजस्य सूचना कथ्यते बुधैः ।। ३३ ।।

यथा बालरामायणे प्रतिज्ञातपौलस्त्यनामनि प्रथमेऽङ्के, (ततः प्रविशति विश्वामित्रशिष्यः) शुनःशेपः– प्रातःसवन एव यजमानं द्रष्टुमिच्छामि इत्युपक्रम्य–राक्षसरक्षौषधं राममानेतुं सिद्धाश्रमादयोध्यां गतवता तातविश्वामित्रेण यज्ञोपनिमन्त्रितस्य परमसुहृदः श्रोत्रियक्षत्रियस्य सीरध्वजस्य स्वप्रतिनिधिः प्रेषितोऽस्मि–इत्यन्तेन

[1] In this context, Bahurūpamiśra says: *nānābhūtānām arthānāṃ rasānāṃ ca hetur bījānām utpettir (yatra saḥ)? mukhasaṃdhir iti* (page 21, Trivandrum Tr.). This line of Bahurūpa seems to have been quoted by Kumārasvāmin. See his *Ratnāpaṇa* (Bāla-, p. 77). See also my Introduction to the *DR*, p. LXIX.

[2] *RAS*-1 reads: *udbhedabhedakaraṇam iti dvādaśadhoditāḥ*; MS. 4 reads: *udbhedabhedakaraṇe iti dvādaśa yojitāḥ*; *RAS*-2 and MSS. 5, 7, 8, 9 and 10 read as given in the text.

(१. २३ पद्यात् पूर्वम्) [1]रावणादिदुष्टराक्षसशिक्षालक्षणरामोत्साहोपबृंहकविश्वामित्रारम्भरूपस्य बीजस्य सूचनादुपक्षेपः ।

अथ परिकरः—

परिक्रिया तु बीजस्य बहुलीकरणं मतम् । (३४ क-ख)

[2]यथा तत्रैव (बालरामायणे), (प्रविश्य तापसच्छद्मना) राक्षसः—

संप्रेषितो माल्यवताहमद्य
ज्ञातुं प्रवृत्तिं कुशिकात्मजस्य ।
पुरीं निमीनां मिथिलां च गन्तुं
तां चाप्ययोध्यां रघुराजधानीम् ॥ (१. २३)

कुलपुत्रकेति सप्रसादमाश्लिष्टोऽस्मि इत्युपक्रम्य—स हि नक्तंचराणां निसर्गामित्रो विश्वामित्रो व्रतचर्यया, वीरव्रतचर्यया समर्थो दशरथोऽपि तथाविध एव (१. २५ पद्यादनन्तरम्) इत्यन्तेन विश्वामित्रारम्भस्य माल्यवदादिवितर्कगोचरत्वेन बहुलीकरणात् परिकरः ।

अथ परिन्यासः—

बीजनिष्पत्तिकथनं परिन्यास इतीर्यते ॥ ३४ ॥
(ग-घ)

यथा तत्रैव (बालरामायणे), राक्षसः (पुरोऽवलोक्य)—कथं तापसः । (प्रत्यभिज्ञाय) तत्रापि विश्वामित्रधर्मपुत्रः [3]शुनःशेपः

[1] *RAS*-1 reads: *duṣṭarākṣasaśiṣṭarāmalakṣmaṇa*, etc.; MS. 4 is highly defective here; *RAS*-2 and MS. 5 read as given in the text.

[2] The portion from the illustration of *parikara* to the end of *vimarśasaṃdhi* is missing in MS. 4.

[3] For information on Śunaḥśepa, adopted by Viśvāmitra, see Apte's Dictionary under Śunaḥśepa.

इत्युपक्रम्य–संप्रत्येव राक्षसभयात्[1] सत्रे दीक्षिष्यमाणः स भगवान् गोप्तारं रामभद्रं वरीतुम् अयोध्यां गतः। राक्षसः (सत्रासं स्वगतम्)–हन्त कथमेतदपि निष्पन्नम्। (प्रकाशम्) भगवन् मा कोपीः–इत्यादिना (स्वगतम्)–कृतं यत् कर्तव्यम्। संप्रति चारसंचारस्यायमवसरः (१. २७ पद्यादनन्तरम्)–इत्यन्तेन विश्वामित्रानुभावकथनाद् सराक्षत्रासकथनाच्च बीजनिष्पत्तेः परिन्यासः।

अथ विलोभनम्–

नायकादिगुणानां यद् वर्णनं तद् विलोभनम्।

(३५ क-ख)

यथा तत्रैव (बालरामायणे) रावणः–

यस्यारोपणकर्मणापि बह्वो वीरव्रतं त्याजिताः।

इत्युपक्रम्य–रावणः (सप्रत्याशम्)–

निर्माल्यं नयनश्रियः कुवलयं वक्त्रस्य दासः शशी
कान्तिः प्रावरणं तनोर्मधुमुचो यस्याश्च वाचः किल।
विंशत्या रचिताञ्जलिः करपुटैस्त्वां याचते रावण-
स्तां द्रष्टुं जनकात्मजां हृदय हे नेत्राणि मित्रीकुरु॥

(१. ४०)

इत्यन्तेन तद्गुणवर्णनाद् विलोभनम्।

अथ युक्तिः–

सम्यक् प्रयोजनानां हि निर्णयो युक्तिरिष्यते॥३५॥

(ग-घ)

[1] *RAS*-1 and *RAS*-2 clearly read: *rākṣasabhayāt satre dīkṣiṣya-māṇaḥ*, etc.; MS. 5 reads: *rākṣasasadīkṣiṣyamāṇaḥ*, etc.

यथा तत्रैव (बालरामायणे) परशुरामरावणीयनामनि द्वितीयाङ्के– (ततः प्रविशति भृङ्गिरिटिः । परिक्रामन्नात्मानं निर्वर्ण्य)– अये विरूपतापि क्वचिन्महतेऽभ्युदयाय–इत्युपक्रम्य, भृङ्गिरिटिः–आम्, नारद यथा समर्थयसे । तथा हि–

एकः कैलासमद्रिं करगतमकरोच्चिच्छिदे क्रौञ्चमन्यो
लङ्कामेकः कुबेरादहृत वसतये कोङ्कणानब्धितोऽन्यः ।
एकः शक्रस्य जेता समिति भगवतः कार्तिकेयस्य चान्य-
स्तत् कामं कर्मसाम्यात् किमपरमनयोर्मध्यगा वीरलक्ष्मीः ॥

(२. १५)

इत्यन्तेन राघवप्रतिनायकयोर्भार्गवरावणयोः कर्मसाम्यनिर्णयकथनाद् युक्तिः ।

अथ प्राप्तिः–

प्राज्ञैः सुखस्य संप्राप्तिः प्राप्तिरित्यभिधीयते ।

(३६ क-ख)

यथा तत्रैव (बालरामायणे), नारदः (सहर्षं हस्तमुद्यम्य)–

चित्रं नेत्ररसायनं त्रिदशतासिद्धेर्महामङ्गलं
मोक्षद्वारमपावृतं मम मनःप्रह्लादनाभेषजम् ।
साकं नाकपुरंध्रिभिर्नवपतिप्राप्त्युत्सुकाभिः सुराः
सर्वे पश्यत रामरावणरणं वक्त्येष वो नारदः ॥

(२. १६)

इत्यत्र नारदस्य युद्धावलोकनहर्षप्राप्तेः प्राप्तिः ।

अथ समाधानम्–

बीजस्य पुनराधानं समाधानमिहोच्यते ॥ ३६ ॥

(ग-घ)

यथा तत्रैव (बालरामायणे) भृङ्गिरिटिः—युद्धरुचे मा निर्भरं संरम्भस्व—इत्युपक्रम्य, अयोध्यां गत्वा परं रामरावणीयं योजयिष्यामि (२. १६ पद्यादनन्तरम्) इत्यन्तेन राघवोत्साहबीजस्य नारदेन पुनराधानात् समाधानम् ।

अथ विधानम्—

सुखदुःखकरं यत्तु तद् विधानं बुधा विदुः । (३७ क-ख)

यथा तत्रैव (बालरामायणे) प्रथमाङ्के, सीता (ससाध्वसौत्सुक्यम्)—अम्मो रक्खसो त्ति सुणिअ सच्चं सज्झसकोदहलाणं मज्झे वट्टामि—(अंहो राक्षस इति श्रुत्वा सत्यं साध्वसकौतूहलयोरन्तरे वर्ते) इत्युपक्रम्य, सीता—तादसदानंदमिस्साणं अन्तरे उवविसिस्सं (तातशतानन्दमिश्राणामन्तरे उपवेक्ष्यामि, १. ४२ पद्यात् पूर्वम्)—इत्यन्तेन सीतायाः अदृष्टपूर्वराक्षसदर्शनेन सुखदुःखव्यतिकराख्यानाद्, विधानम् ।

अथ परिभावना—

श्लाघ्यैश्चित्तचमत्कारो गुणाद्यैः परिभावना ।। ३७ ।। (ग-घ)

यथा तत्रैव (बालरामायणे), रावणः (सौत्सुक्यं विलोक्य स्वगतम्)—अहो त्रिभुवनातिशायि मकरध्वजसंजीवनं रामणीयकमस्याः । तथा हि—

इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमलता श्यामेव हेमप्रभा ।
पारुष्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव ।।
(१. ४२)

इत्युपक्रम्य, शतानन्दः (अपवार्य)– अहो लङ्काधिपतेरपूर्वगर्वगरिमा । यन्ममापि शतानन्दस्य न निश्चिनुते चेतः । किं भविष्यति (१. ४६ पद्यादनन्तरम्)–इत्यन्तेन रावणस्य सीतारामणीयकदर्शनेन शतानन्दस्य रावणोत्साहदर्शनेन च तयोश्चित्तचमत्कारकथनात् परिभावना ।

अथोद्भेदः–

उद्घाटनं यद् बीजस्य स उद्भेदः प्रकीर्तितः ।

(३८ क-ख)

यथा तत्रैव (बालरामायणे) द्वितीयाङ्के, रावणः–त्रैयम्बकः परशुरेष निसर्गचण्ड (२. ३९) इत्यादि पठति । जामदग्न्यः– अपकुर्वतापि भवता परमुपकृतम् । यदेष स्मारितोऽस्मीत्युपक्रम्य (२. ४४ पद्यात् पूर्वम्)–

लोकोत्तरं चरितमर्पयति प्रतिष्ठां
पुंसां कुलं न हि निमित्तमुदारतायाः ।
वातापितापनमुनेः कलशात् प्रसूति-
र्लीलायितं पुनरमुष्य समुद्रपानम् ॥ (२. ५१)

इत्यन्तेन गूढशंकरधनुरधिक्षेपोद्घाटनाद् वा लोकोत्तरचरितसामान्यवर्णनेन तिरोहितरामचन्द्रोत्साहोद्घाटनाद् वा उद्भेदः ।

अथ भेदः–

[1]**बीजस्योत्तेजनं भेदो यद्वा संघातभेदनम् ॥ ३८ ॥**

(ग-घ)

[1] *RAS*-1 alone reads: *bījasyodbhedanam*; all others read: *bījasyottejanam*.

यथा तत्रैव (बालरामायणे), रावणः (विलोक्य)—अथ याचित-परशुना परशुरामेण किमभिहितमासीत्। [1]मायामयः—त्रैलोक्यमाणिक्य-रामोदन्तम् आकर्णयतु स्वामी।

पौलस्त्यः प्रणयेन याचत इति श्रुत्वा मनो मोदते
देयो नैष हरप्रसादपरशुस्तेनाधिकं ताम्यति।
तद् वाच्यः स दशाननो मम गिरा दत्ता द्विजेभ्यो मही
तुभ्यं ब्रूहि रसातलत्रिदिवयोर्निर्जित्य किं दीयताम्॥
(२. २०)

रावणः—कदा नु खलु परशुरामो रसातलत्रिदिवयोर्जेता दाता च संवृत्तः। रावणः पुनः प्रतिग्रहीता च। ततस्त्वया किमसौ, प्रत्युक्तः। इत्युपक्रम्य, मायामयः— देव प्रकृतिरोषणो रेणुकापुत्रः। तत् तमेवागत-महमुत्प्रेक्षे[2]। रावणः—प्रियं नः (२. २४ पद्यात् पूर्वम्) इत्यन्तेन प्रतिनायकरूपभार्गवरावणयोरुत्तेजनाद् भेदः।

अथ करणम्—

प्रस्तुतार्थसमारम्भं करणं परिचक्षते। (३९ क-ख)

[1] Detailed portions of the *Bālarāmāyaṇa*, which are cited as related to several *saṃdhyaṅga-s*—such as the portion here from *māyāmayaḥ* to *aham utprekṣe* (see the note below)—are not given in full in *RAS*-1. *RAS*-2 and MS. 5 give always the full text necessary. I mean, instead of giving merely the initial expressions, as seen in *RAS*-1, full verses and detailed prose portions are supplied in *RAS*-2 and MS. 5, which I have followed in full in all such places, as I think the full portions as cited in the MSS. are very useful for a clear understanding of the points under discussion; particularly this will be very helpful for the readers as the printed text of the *Bālarāmāyaṇa*, of any edition, is not at all available. The difference can be seen by comparing the present text with *RAS*-1 in the 3rd chapter.

[2] See the previous note.

यथा तत्रैव (बालरामायणे), (२. ५५ पद्यादनन्तरम्) (उभावपि चापारोपणं नाटयतः) इत्युपक्रम्य आ अङ्कपरिसमाप्तेः जामदग्न्य-रावणयोः प्रस्तुतयुद्धारम्भकथनात् करणम् ।

अथ प्रतिमुखसंधिः—

बीजप्रकाशनं यत्र [1]दृश्यादृश्यतया भवेत् ।। ३९ ।।
(ग-घ)
तत् स्यात् प्रतिमुखं बिन्दोः प्रयत्नस्यानुरोधतः ।
इह त्रयोदशाङ्गानि प्रयोज्यानि मनीषिभिः ।। ४० ।।
विलासपरिसर्पौ च विधूतं शमनर्मणी ।
नर्मद्युतिः[2] प्रगमनं निरोधः पर्युपासनम् ।। ४१ ।।
पुष्पं वक्त्रमुपन्यासो वर्णसंग्रहणं तथा ।

(तत्र विलासः)—

विलासः संगमार्थस्तु व्यापारः परिकीर्तितः ।। ४२ ।।

यथा तत्रैव (बालरामायणे) विलक्षलङ्केश्वरनामनि तृतीयाङ्के— (३. २१ पद्यात् पूर्वम्) रामः—अये इयमसौ सा सीता, यस्याः स्वयं वसुमती माता यागभूर्जन्ममन्दिरम् इन्दुशेखरकार्मुकारोपणं च पणः । (सस्पृहं निर्वर्ण्य) इत्यारभ्य, प्रतीहारः—

एतेनोच्चैर्विहसितमसौ काकलीगर्भकण्ठो
लौल्याच्चक्षुः प्रहितममुना साङ्गभङ्गः स्थितोऽयम् ।

[1] Only *RAS*-1 reads: *dṛśyādṛśyāntaraṃ bhavet*; all others read: *dṛśyādṛśyatayā bhavet.*

[2] *RAS*-2 reads: *premadyutiḥ prakramaṇam*; MS. 5 seems to read: *kramadyutiḥ prakramaṇam*; *RAS*-1 and other MSS. read as given in the text.

हारस्याग्रं कलयति करेणैष हृर्षाच्च किंचित्
स्त्रैणः पुंसां नवपरिगमः काममुन्मादहेतुः ।।
(३. २६)

इत्यन्तेन रामादीनां सीतालम्बनाभिलाषकथनाद् विलासः ।

अथ परिसर्पः–

पूर्वदृष्टस्य[1] बीजस्य त्वङ्कुच्छेदादिना तथा ।
नष्टस्यानुस्मृतिः शश्वत् परिसर्प इति स्मृतः ।। ४३ ।।

यथा तत्रैव (बालरामायणे), प्रतीहारः (स्वगतम्)–कथमेते क्षत्रियजनसमुचितेऽपि चापारोपणकर्मणि निखिलाः क्षत्रियाः वितथ-सामर्थ्याः वर्तन्ते । तदेष परमनाकलितसारो विकर्तनकुलकुमार आस्ते । यद्वा किमनेनापि–

यस्य वज्रमणेर्भेदे भिद्यन्ते लोहसूचयः ।
करोतु तत्र किं नाम नारीनखविडम्बनम्[2] ।।
(३. ६६)

(विचिन्त्य) भवतु । तथापि संकीर्तयाम्येनम् । अनाकलितसारो हि वीरप्रकाण्डसंभूतिः–इत्युपक्रम्य, हेमप्रभा–संपण्णं च पिअसहीए पाणिग्गहणम्–(३-७९ पद्यादनन्तरम्) (संपन्नं च प्रियसख्याः पाणिग्रहणम्)–इत्यन्तेन पूर्वं ताटकादिवधदृष्टस्य पश्चान्निखिल-क्षत्रियदुरारोपधूर्जटिचापारोपणप्रभाववर्णनाद् नष्टस्य रामभद्रोत्साहस्य तद्धनुर्भङ्गक्रियारूपेण स्मरणात् परिसर्पः ।

[1] Only *RAS*-1 reads: *pūrvoddiṣṭasya*.

[2] *RAS*-1 reads: *vilekhanam*; *RAS*-2 and MS. 5 read: *-viḍambanam*.

21

अथ विधूतम्–[1]

नायकादेरीप्सितानामर्थानामनवाप्तितः ।
अरतिर्या भवेत् तद्धि विद्वद्भिर्विधुतं मतम् ।। ४४ ।।
अथवानुनयोत्कर्षे विधूतं स्यान्निराकृतिः ।

(४५ क-ख)

यथा तत्रैव (बालरामायणे) भार्गवभङ्गनामनि चतुर्थेऽङ्के,

शतानन्दः–

यस्यास्ते जननी स्वयं क्षितिरयं योगीश्वरस्ते पिता

(४. ४२)

इत्यारभ्य, रामः (विचिन्त्य स्वगतम्)–रुदत्यपि कमनीया जानकी–इत्यन्तेन (४. ४७ पद्यादनन्तरम्) सीतायाः बन्धुविरहजनितारतिकथनाद् विधुतम् । अथ वा मतान्तरेण तत्रैव, रामः (समुपसृत्य)–भगवन् भार्गव सदयं प्रसीद इत्यारभ्य, जामदग्न्यः–[2]नाभिवादनप्रसाद्यो रेणुकासूनुः (४. ५८ पद्यात् पूर्वम्) इत्यत्र रामानुनयस्य भार्गवेणास्वीकाराद् विधूतम् ।

अथ शमः–

अरतेः शमनं तज्ज्ञाः शममाहुर्मनीषिणः ।। ४५ ।।

(ग-घ)

यथा तत्रैव (बालरामायणे) (४. ५१ पद्यात् पूर्वम्), हेमप्रभा–जुज्जइ पफुल्लकोदूहलत्तणं । परसुरामदंसणेण उण ससज्झसत्तणं

[1] The expression is found sometimes with long *ū* (as *vidhūtam*) and sometimes with short *u* (as *vidhutam*).

[2] *RAS*-1 reads: *nābhivandana*; *RAS*-2 and MS. 5 read: *nābhivādana-*.

भग्गधनद्दण्डचण्डचरितस्स पुरदो रामचंदस्स–(युज्यते प्रफुल्लकौतूहलत्वं परशुरामदर्शनेन पुनः ससाध्वसत्वं भग्नधनुर्दण्डचण्डचरितस्य पुरतो रामचन्द्रस्य) इत्यत्र रामचन्द्रपराक्रमकथनात् सीतायाः अरतिशमनात् शमः ।

अथ नर्म–

परिहासप्रधानं यद् वचनं नर्म तद् विदुः । (४६ क-ख)

यथा तत्रैव (बालरामायणे) तृतीयेऽङ्के, रामः (सकण्ठरोधम्)–

वाचा कार्मुकमस्य कौशिकपतेरारोपणायार्पितं
मद्दोर्दण्डहठाञ्चनेन तदिदं भग्नं कृतन्यक्कृति ।
नो जाने जनकस्तदत्र भगवान् व्रीडावशादुत्तरं
निक्षेप्त्रे नतकन्धरो भगवते रुद्राय किं दास्यति ।।
(३. ७१)

इत्यत्र जनकाधिपापलापेन हासप्रधानं नर्म ।

अथ नर्मद्युतिः–

कोपस्यापह्नवार्थं यद्धास्यं नर्मद्युतिर्मता ।। ४६ ।।
(ग-घ)

यथा तत्रैव (बालरामायणे) चतुर्थेऽङ्के, विश्वामित्रः (जामदग्न्यं प्रति)–

रामः शिष्यो भृगुभव भवान् भागिनेयीसुतो मे
वामे बाहावुत तदितरे कार्यतः को विशेषः ।
दिव्यास्त्राणां तव पशुपतेरस्य लाभस्तु मत्त-
स्तत् त्वां याचे विरम कलहादार्यकर्मारभस्व ।।
(४. ६९)

जामदग्न्यः (विहस्य)– मातुर्मातुल न किंचिदन्तरं भवतो भवानीवल्लभस्य च । इत्युपक्रम्य—रामः (विहस्य)–जामदग्न्य एकः पुनरयं शस्त्रग्रहणाधिकारो यद् गुरुष्वपि तिरस्कारः (तत्रैव किंचित् परस्तात्) इत्यन्तेन भार्गवराघवयोः पूज्यविषयक्रोधापह्नवार्थं हास्यकथनात् नर्मद्युतिः ।

अथ [1]प्रगमनम्–

तत् तु प्रगमनं यत् स्यादुत्तरोत्तरभाषणम् । (४७ क-ख)

यथा तत्रैव (बालरामायणे) रामः–किं पुनरिमाः सर्वंकषा रोषवाचः

सर्वत्यागी परिणतवयाः सप्तमः पद्मयोनेः (४. ७१)

इति श्लोकान्ते, जामदग्न्यः–ततः किम् । रामः (सखेदम्)–

यस्याचार्यकमिन्दुमौलिरकरोत् सब्रह्मचारी चिरं
जातो यत्र गुहश्चकार च भुवं यद्गीतवीरव्रताम् ।
तत् कोदण्डरहस्यमद्य भगवन् द्रष्टैष रामः स ते
हेलोज्जृम्भितजृम्भकेण धनुषा क्षत्रं च नालं वयम् ।।
(४. ७२)

जामदग्न्यः–साधु रे क्षत्रियडिम्भ साधु–इत्यन्तेन भार्गवराघवयोरुक्तिप्रत्युक्तिकथनात् प्रगमनम् ।

अथ निरोधः[2]–

यत्र व्यसनमायाति निरोधः स निगद्यते ।। ४७ ।।
(ग-घ)

[1] *RAS*-2 and MS. 5 read: *praśamana* instead of *pragamana* of other MSS.

[2] See the *DR*, I. 34. *RAS*-1 reads: *virodhaḥ*; *RAS*-2 and MSS. 5, 7, 8, 9 and 10 read: *nirodhaḥ*.

यथा तत्रैव (बालरामायणे) जामदग्न्यः—

पक्वकर्पूरनिष्पेषमयं निरपिषत् त्रयम् ।
मम व्रीडां च चण्डीशचापं च स्वं च जीवितम् ॥
(४. ६५)

जनकः—कथं संन्यस्तशस्त्रस्यापि पुनरस्त्रग्रहणक्षणो वर्तते—इत्युपक्रम्य

प्रहिणु तदिह बाणान् वार्धकं मां दुनोति । (४. ६७)

दशरथः—भोः संवन्धिन् कृतं कार्मुकपरिग्रहव्यसनेन—इत्यन्तेन जनकस्य भार्गवनिमित्तस्य जरानिमित्तस्य वा व्यसनस्य कथनाद् निरोधः ।

अथ पर्युपासनम्—

रुष्टस्यानुनयो यः स्यात् पर्युपासनमीरितम् ।
(४८ क-ख)

यथा तत्रैव (बालरामायणे) विश्वामित्रः (जामदग्न्यं प्रति)—

रामः शिष्यो भृगुसुत भवान् भागिनेयीसुतो मे ।
(४. ६९)

इत्यत्र श्लोके रोषान्धस्य भार्गवस्यानुनयो विश्वामित्रेण कृत इति पर्युपासनम् । अथ पुष्पम्—[1]

सविशेषाभिधानं यत् पुष्पं तदिति संज्ञितम् ॥ ४८ ॥
(ग-घ)

यथा तत्रैव (बालरामायणे) तृतीयाङ्के (प्रविश्य) कोहलः—

कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने । (३. ११)

[1] See the *DR*, I. 34 (d).

इत्युपक्रम्य–

प्रकटितरामाम्भोजः कौशिकवान् सपदि लक्ष्मणानन्दी ।
सुरचापनमनहेतोरयमवतीर्णः शरत्समयः ॥ (३. १६)

इत्यन्तेन [1]रामचन्द्रलक्षणार्थविशेषाभिधानात् पुष्पम् ।

अथ वज्रम्–

वज्रं तदिति विज्ञेयं साक्षान्निष्ठुरभाषणम् । (४६ क-ख)

यथा तत्रैव (बालरामायणे) चतुर्थाङ्के, जामदग्न्यः–निर्दशितलाघव राघव तदाकर्णय यत् ते करोमि–

त्रुटितनिबिडनाडीचक्रवालप्रणाली-
प्रसृतरुधिरधारार्चितोच्चण्डरुण्डम् ।
मडमडितमृडानीकान्तचापस्य भङ्क्तुः
परशुरमरवन्द्यः खण्डयत्यद्य मुण्डम् ॥ (४. ६१)

इत्युपक्रम्य–यः प्रेतनाथस्यातिथ्यमनुभवितुकाम–इत्यन्तेन [2]वज्र-निष्ठुरभाषणाद् वज्रम् ।

अथोपन्यासः–

युक्तिभिः सहितो योऽर्थ उपन्यासः स इष्यते ॥ ४६ ॥ (ग-घ)

यथा तत्रैव (बालरामरयणे) मातलिः–अयं हि पितृभक्त्यतिशयः परशुरामस्य यदुत रेणुकाशिरश्छेदः (४. २९ पद्यादनन्तरम्) इत्युपक्रम्य–

[1] *RAS*-2 and MS. 5 read: *rāmacandrād vilakṣaṇārthaviśeṣābhidhānāt*; *RAS*-1 reads as given in the text.

[2] The portion from *vajraniṣṭhurabhāṣaṇād* to *astv añjaliḥ* (See the note below) is missing in *RAS*-2 and MS. 5.

यद्वा ते गुरवोऽविचिन्त्यचरितास्तेभ्योऽयमस्त्वञ्जलिः[1]
(४. ३३)

इत्यन्तेन उपपत्तिभिः पितुर्निदेशकरणादपि मातृवधकरणस्यैव प्रतिपादनाद् वा गुरूणामविचिन्त्यचरितत्वोपन्यासेन सर्वोपपन्नत्व-प्रतिपादनाद् वा उपन्यासः ।

अथ वर्णसंहारः[2]–

सर्ववर्णोपगमनं वर्णसंहार उच्यते । (५० क-ख)

यथा तत्रैव (बालरामायणे), जामदग्न्यः (कर्णं दत्त्वा आकाशे)– किं ब्रूथ–केन न वर्णितं दाशरथेः शंकरकार्मुकारोपणम् । को न विस्मि-तस्तद्भङ्गेन । (साक्षेपम्) (केन न वर्णितमित्यादि पठति) शृणुत भोः ।

यः कर्ता हरचापदण्डदलने यश्चानुमन्ता ननु
द्रष्टा यश्च परीक्षिता च य इह स्तोता च वक्ता च यः ।
(४. ५६)

इत्युपक्रम्य–

रामो राममयं स्वयं गुहसहाध्यायी समन्विष्यति ।
(४. ५७)

इत्यन्तेन [3]हरचापदलनस्य निषिद्धया कर्तृतया अनुमन्तृतया स्तोतृतया च राघवविश्वामित्रपौरादिपरामर्शेन ब्राह्मणक्षत्रियादिवर्णानां संग्रहणाद् वर्णसंहारः ।

[1] See the previous note.

[2] In the enumeration at the beginning, this was mentioned as *varṇasaṃgrahaṇam* (See *kārikā* III. 42). See also the *DR,* I. 35.

[3] *RAS*-1 reads: *haracāpadalanaviṣayatayā* ; *RAS*-2 and MS. 5 read: *haracāpadalanasya niṣiddhayā.*

अथ गर्भसंधिः[1]–

दृष्टादृष्टस्य बीजस्य गर्भस्त्वन्वेषणं मुहुः ॥ ५० ॥

(ग-घ)

[2]अत्राप्त्याशापताकानुरोधादङ्गानि कल्पयेत् ।
अभूताहरणं मार्गो रूपोदाहरणे क्रमः ॥ ५१ ॥
संग्रहश्चानुमानं च तोटकाधिबले तथा ।
उद्वेगः संभ्रमाक्षेपौ द्वादशैषां तु लक्षणम् ॥ ५२ ॥
अभूताहरणं तत् स्याद् वाक्यं यत् कपटाश्रयम् ।

(५३ क-ख)

यथा तत्रैव (बालरामायणे) उन्मत्तदशाननामनि पञ्चमाङ्के, माल्यवान् (हसित्वा)–वृद्धबुद्धिर्हि प्रथमं पश्यति चरमं कार्यम् । यन्मया धूर्जटिधनुरधिक्षेपणतः प्रभृति मतिचक्षुषा दृष्टमेव यदुत दशकन्धरोऽनुसंधास्यति सीताहरणम् । मायामयः–ततस्ततः । माल्यवान्–ततश्च मया मन्दोदरीपितुर्मायागुरोर्मयस्य प्रथमशिष्यो विशारदनामा यन्त्रकारः सबहुमानं नियुक्तः सीताप्रतिकृतिकरणाय । विरचिता च सा रावणोपच्छन्दनार्थम् । अभिहितं च ।

सूत्रधारचलद्दारुगात्रेयं यन्त्रजानकी ।
वक्त्रस्थशारिकालापा लङ्केन्द्रं वञ्चयिष्यति ॥

(५. ५)

इत्युपक्रम्य, रावणः (पुनर्निरूप्य शारिकाधिष्ठितवक्त्रं सीताप्रतिकृतियन्त्रम्)–अहो मतिमान् मायामयः । छलितोऽसि जनकराज-

[1] See the *DR*, I. 36, and the following.

[2] *RAS*-1 reads: *āprāptyāśā*, etc.; *RAS*-2 and MS. 5 read: *atra prāptyāśā*, etc.; MSS. 7, 8, 9 and 10 seem to read: *atrāptyāśā*, etc.

पुत्र्याः प्रतिकृतिसमर्पणेन (५. २० पद्यादनन्तरम्)—इत्यन्तेन माल्यवत्कपटवाक्यसंविधानाद् अभूताहरणम् ।

अथ मार्गः—

मार्गस्तत्त्वार्थकथनम्[1] । (५३ ग)

यथा तत्रैव (बालरामायणे) निर्दोषदशरथनामनि षष्ठाङ्के, मायामयः—आर्य किमपि द्विषतामप्यावर्जकमुदात्तजनचरितम् । पश्य—

क्रूरक्रमा किमपि राक्षसजातिरेका
तत्रापि कार्यपरतेति मयि प्रकर्षः ।
रामेण तु प्रवसता पितुराज्ञयैव
बाष्पाम्भसामहमपीह कृतो रसज्ञः ॥ (६. ६)

इत्युपक्रम्य, मायामयः—ततश्च वामदेवप्रभृतिभिर्मन्त्रिभिर्यथावृत्तमभिधाय सपादोपग्रहं निवारितोऽपि तदिदमभिधाय प्रस्थितः—

मया मूर्ध्नि प्रह्वे पितुरिति धृतं शासनमिदं
स यक्षो रक्षो वा भवतु भगवान् वा रघुपतिः ।
निर्वर्तिष्ये सोऽहं भरतकृतरक्षां रघुपुरीं
समाः सम्यङ्नीत्वा वनभुवि चतस्रश्च दश च ॥
(६. ११)

इत्यन्तेन रामप्रवासविषयस्य मायामयदुःखस्य सत्यस्यैव व्यक्तत्वाद् वा मायामयादेः कपटत्वज्ञानेऽपि रामचन्द्रेण सत्यतयाङ्गीकाराद् वा मार्गः ।

[1] Only *RAS*-1 reads: *vāstavārthakathā mārgaḥ*; all others read: *mārgas tattvārthakathanam.*

अथ रूपम्–

रूपं संदेहकृद् वचः ।। ५३ ।। (घ)

यथा तत्रैव (बालरामायणे) षष्ठाङ्के, कैकेयी (सोद्वेगम्)– पणमामि भअवदिं सरऊं जा पुव्वं दीसमाणा णयणपीऊसगण्डूसकबलं करेंति असि । सा संपदं हालाहलकबडपडिरूबा पडिहाअदि । किं पुण मे अओज्झादंसणे वि अकारणपज्जाउलं हिअअं । (प्रणमामि भगवतीं सरयूं या पूर्वं दृश्यमाना नयनपीयूषगण्डूषकबलं कुर्वती आसीत् सा सांप्रतं हालाहलकबलप्रतिरूपा प्रतिभाति । किं पुनर्मे अयोध्यादर्शनेऽपि अकारणपर्याकुलं हृदयम् ।)

इत्युपक्रम्य, दशरथः (अनाकर्णितकेन)–

एतच्छ्रान्तविचित्रचत्वरपथं विश्रान्तवैतालिक-
श्लाघाश्लोकमगुञ्जिमञ्जुमुरजं विध्वस्तगीतध्वनि ।
व्यावृत्ताध्ययनं निवृत्तसुकविक्रीडासमस्यं नम-
द्विद्वद्वादकथं कथं पुरमिदं मौनव्रते वर्तते ।।

(६. १२)

इत्यन्तेन कैकेयीदशरथयोरयोध्याविषयविषादवितर्कविन्यासाद् रूपम् ।

अथोदाहरणम्–

सोत्कर्षवचनं यत् तु तदुदाहरणं मतम् । (५४ क-ख)

यथा तत्रैव (बालरामायणे) असमपराक्रमनामनि सप्तमाङ्के, विभीषणः–सखे सुग्रीव । अतिशशाङ्कशेखरमिदमाचेष्टितं रामदेवस्य यदनेन–

निर्वाणं जलपानपीडनबलैर्यस्मिन् युगान्तानलै-
र्यस्याभाति कुकूलमुर्मुरमृदुः क्रोडे शिखी बाडबः ।

तस्याप्यस्य कृशानुसंक्रमकृतज्योतिःशिखण्डैः शरै-
र्दत्तश्चण्डदवाग्निडम्बरविधिर्देवस्य वारांनिधेः ॥
(७. ३२)

इत्युपक्रम्य, समुद्रः—तर्हि बालनारायणं राममेवोपसर्पामः । न हि राकामृगाङ्कमन्तरेण चन्द्रमणेरानन्दजलनिष्यन्दः (७. ३६ पद्यात् पूर्वम्) इत्यन्तेन समुद्रक्षोभकरामचन्द्रोत्साहोत्कर्षकथनादुदाहरणम् ।

अथ क्रमः—

भावज्ञानं क्रमो यद्वा चिन्त्यमानार्थसंगतिः ॥ ५४ ॥
(ग-घ)

यथा तत्रैव षष्ठाङ्के (६. ४ पद्यादनन्तरम्), माल्यवान् (स्मृतिनाटितकेन)—न जाने किं हि वृत्तं कैकेयीदशरथयोः । (उपसर्पितकेन) मायामयः—जयत्वार्यः । शूर्पणखा—जेदु जेदु कणिट्ठमादामहो (जयतु जयतु कनिष्ठमातामहः) । माल्यवान्—अथ किं वृत्तं तत्र । मायामयः—यथादिष्टमार्येण । —इत्युपक्रम्य, माल्यवान्—(सहर्षम्) तर्हि विस्तरतः कथ्यताम्—इत्यन्तेन माल्यवच्चिन्तासमकालमेव शूर्पणखामायामययोरुपगमनाद् वा माल्यवतो विलम्बासहाभिप्रायपरिज्ञानवता मायामयेन निष्पन्नस्य कार्यस्य संक्षेपकथनाद् वा क्रमः ।

अथ संग्रहः—

संग्रहः [1]सामदानार्थसंयोगः परिकीर्तितः । (५५ क-ख)

यथा तत्रैव (बालरामायणे) सप्तमाङ्के, समुद्रः (साभ्यर्थनम्)—

इन्दुर्लक्ष्मीरमृतमदिरे कौस्तुभः पारिजातः
स्वर्मातङ्गः सुरयुवतयो देव धन्वन्तरिश्च ।

[1] See the *DR*, I. 40.

मन्थाम्रेडैः स्मरसि तदिदं पूर्वमेव त्वयात्तं
संप्रत्यब्धिः शृणु जलधनस्त्वां प्रपन्नः प्रशाधि ॥
(७. ३६)

रामः(सगौरवम्)– भगवन् रत्नाकर । नमस्ते । –इत्युपक्रम्य, समुद्रः–यथाह सप्तमो वैकुण्ठावतारः (७. ४४ पद्यात् पूर्वम्) इत्यन्तेन समुद्ररामचन्द्रयोः परस्परप्रियवचनसंग्रहणात् संग्रहः ।

अथानुमानम्–

अर्थस्याभ्यूहनं लिङ्गादनुमानं प्रचक्षते ॥ ५५ ॥
(ग-घ)

यथा तत्रैव (७. २१ पद्यात् पूर्वम्), प्रतीहारी (समन्तादवलोक्य)– कथमयमन्यादृश इव लक्ष्यतेऽम्बुराशिः । वन्दी (यथोपलक्षितमार्गेण सचमत्कारं पुरोऽवलोक्य)–पश्य । विलीयमानजलमानुषमिथुनमत्यर्थ-कदर्थ्यमानशङ्खिनीयूथम्–इत्युपक्रम्य, प्रतीहारी–

आं ज्ञातं धाम्नि वारां रघुपति-
विशिखाः प्रज्वलन्तः पतन्ति ॥ (७. ३०)

इत्यन्तेन समुद्रक्षोभलिङ्गानुमितरामोत्साहार्थकथनादनुमानम् ।

अथ तोटकम्—

[1]**ससंरम्भं तु वचनं संगिरन्ते हि तोटकम् ।** (५६ क-ख)

यथा तत्रैव (बालरामायणे) हनूमान्–यथादिशति स्वामी । (सर्वतोऽवलोक्य)

[1] *RAS*-2 reads: *roṣasaṃbhramavākyaṃ tu toṭakaṃ parikīrtitam.* The definition of *toṭaka* is missing in MS. 5; *RAS*-1 and MSS. 7, 8, 9 and 10 read as given in the text.

दृप्यद्विक्रमकेलयः कपिभटाः शृण्वन्तु सुग्रीवजाम्
आज्ञां मौलिनिवेशिताञ्जलिपुटाः सेतोरिह व्यूहने ।
दोर्दण्डद्वयताडनश्लथधराबन्धोद्धृतान् भूधरान्
आनेतुं सकलाः प्रयात ककुभः किं नाम वो दुष्करम् ॥
(७. ४६)

इत्युपक्रम्य [1]आङ्कपरिसमाप्तेः कपिराक्षसादिसंरम्भकथनात् तोटकम् ।

अथाधिबलम्–

बुधैरधिबलं प्रोक्तं कपटेनातिवञ्चनम् ॥ ५६ ॥
(ग-घ)

यथा तत्रैव षष्ठाङ्के (६. ५ पद्यात् पूर्वम्), मायामयः– अथैकदा दयितस्नेहमय्या कैकेय्या सममसुरानीकविजयाय पूरितसुहृन्मनोरथे दशरथे त्रिविष्टपतिलकभूतं पुरुहूतं प्रभाववति समुपस्थितवति तद्रूपधारिणौ कुवलयाभिरामं रामं सपरिच्छदं छलयितुम् अयोध्यां शूर्पणखा अहं च प्राप्तवन्तौ–इत्युपक्रम्य, माल्यवान् –किमसाध्यं वैदग्ध्यस्य–(६. ८ पद्यादनन्तरम्) इत्यन्तेन मायामयशूर्पणखाभ्यां कपटवेषधारणेन रामवामदेववञ्चनादधिवलम् ।

अथोद्वेगः–

[2]शत्रुचोरादिसंभूतं भयमुद्वेग उच्यते । (५७ क-ख)

यथा तत्रैव (बालरामायणे) (६. ५६ पद्यात् पूर्वम्) (ततः प्रविशति [3]गगनार्धावतरणनाटितकेन रत्नशिखण्डः), रत्नशिखण्डः–स्वस्ति

[1] *RAS*-1 reads: *āṅkaprakarīparisamāpteḥ*; *RAS*-2 and MS. 5 read: *āṅkaparisamāpteḥ*.

[2] See the *DR*, I. 42.

[3] *RAS*-1 reads: *gaganāvataraṇa*, etc. *RAS*-2 and MS. 5 read: *gaganārdhāvataraṇa*, etc.

महाराजदशरथाय । दशरथः—अपि कुशलं वयस्यस्य जटायोः । रत्नशिखण्डः— प्रियसुहृदुपयोगेन । न पुनः शरीरेण । दशरथः—भद्र समुपविश्य कथ्यताम् । व्याकुलोऽस्मि—इत्युपक्रम्य, कौसल्या—हा देव्व तुए किदविडंबं समत्थिअं वणगदं राहवकुटुंबं । (हा देव त्वया कृतविडम्बं समर्थितं वनगतं राघवकुटुम्बम्) । सुमित्रा—ण केवलं वणगदं । भुवणगदं वि । (न केवलं वनगतम् । भुवनगतमपि ।) (६. ७० पद्यादनन्तरम्) इत्यन्तेन [1]मातृगतभीतेरुपन्यासादुद्वेगः ।

अथ संभ्रमः—

[2]शत्रुव्याघ्रादिसंभूतौ शङ्कात्रासौ च संभ्रमः ।। ५७ ।।
(ग-घ)

यथा तत्रैव (बालरामायणे), वामदेवः (सास्रं स्वगतम्)—

हे मद्वाणि निजां विमुञ्च वसतिं द्राग् देहि यात्रां बहिः ।

(राजानं प्रति—प्रकाशम्)

देव स्तम्भय चेतनां श्रवणयोरभ्येति शुष्काशनिः ।

(दम्पती शङ्कां नाटयतः) वामदेवः—

त्वद्रूपाद् विपिनाय चीवरधरो धन्वी जटी शासनं
रामः प्राप्य गतः कुतश्चन वनं सौमित्रिसीतासखः ।।
(६. १३)

(उभौ मूर्छतः)। वामदेवः—देव समाश्वसिहि। दशरथः—(समाश्वस्य) केन पुनः कारणेन—इत्युपक्रम्य, दशरथः—वत्स रामभद्र मन्ये ममेव

[1] *RAS*-1 reads: *śatrukṛta*, etc. *RAS*-2 and MS. 5 read: *mātṛgata*, etc.

[2] *RAS*-1 reads: *śatruvyāghrādisaṃbhūtā śaṅkā syāt saiva saṃbhramaḥ*; others read as given in the text. See the *DR*, I.42.

मलयाचलनिवासिनः प्रियवयस्यस्य जटायोरपि [1]शोकशङ्कुरयं सर्वंकषो भविष्यति (६. ५५ पद्यादनन्तरम्) इत्यन्तेन कौसल्यादशरथादीनां रक्षस्तरक्षुहर्यक्षप्रभृतिसंचरणदारुणारण्यादिषु रामप्रवासविषयशङ्का-त्रासानुवृत्तिकथनात् संभ्रमः ।

अथाक्षेपः—

गर्भबीजसमाक्षेपमाक्षेपं परिचक्षते । (५८ क-ख)

यथा तत्रैव पञ्चमाङ्के (५. ७४ पद्यादनन्तरम्) (प्रविश्य अपटी-क्षेपेण छिन्ननासा कृतावगुण्ठना) शूर्पणखा (साक्रन्दं पादयोर्निपत्य)— अज्ज एक्कमादुअ पेक्ख तक्खअचूडामणी उप्पाडिदो । वडवाणलजाला-कलापअं घुंतलिदं । दसकण्ठकणिट्ठवहिणिए अच्चाहिदं । (आर्य एकमातृक प्रेक्षस्व तक्षकचूडामणिरुत्पाटितः । वडवानलज्वालाकलापकं चूर्णितम् । दशकण्ठकनिष्ठभगिन्याः अत्याहितम् । इत्युपक्रम्य, रावणः (प्रकाशम्)—ततः किं तस्याः । शूर्पणखा—सापि लंकेस्सरस्स समुचिदत्ति अवहरंती तेहिं कावालिअव्वदजोग्गा किदंहि । (सापि लङ्केश्वरस्य समुचितेति व्यवहरन्ती ताभ्यां कापालिकव्रतयोग्या कृतास्मि ।) इत्यन्तेन अङ्कान्तगतभागेन—सकलदेवतातेजस्तिरस्करणरावणाति-शयवर्णनागर्भीकृतस्य रामोत्साहस्य शूर्पणखाकर्णनासानिकृन्तनरूपेण समुद्भेदादाक्षेपः ।

अथ विमर्शसंधिः—

[2]यत्र प्रलोभनक्रोधव्यसनाद्यैर्विमृश्यते ॥ ५८ ॥ (ग-घ)

[1] *RAS*-1 does not read beyond '*jaṭāyor api*'; *RAS*-2 and MS. 5 read: *jaṭāyor api śokaśaṅkur ayam*, etc.; this seems to be a better reading; the printed edn. of the *Bālarāmāyaṇa* reads: *jaṭāyor api sarvaṃkaṣo bhaviṣyasi.*

[2] See the *DR*, I. 43, and the *Avaloka* thereon.

बीजार्थो गर्भनिर्भिन्नः सोऽवमर्श इतीर्यते ।
प्रकरीनियताप्त्यानुगुण्यादत्राङ्गकल्पनम् ।। ५६ ।।
[1]अपवादोऽथ संफेटो विद्रवद्रवशक्तयः ।
द्युतिप्रसङ्गौ छलनव्यवसायौ निरोधनम् ।। ६० ।।
प्ररोचना विचलनमादानं स्युस्त्रयोदश ।

तत्रापवादः–

तत्रापवादो दोषाणां प्रख्यापनमितीर्यते ।। ६१ ।।

यथा तत्रैव (बालरामायणे) अष्टमाङ्के वीरविलासनामनि–(आदौ) (ततः प्रविशतो राक्षसौ), एकः–सखे दुर्मुख किमपि महान् सत्त्वभ्रंशो दशकण्ठस्य । यत् कुमारसिंहनादवधमप्याकर्ण्य न शोकः कृतो नाप्यमर्षः–इत्युपक्रम्य, त्रिजटा–कहं देवेण दिण्णो लज्जादेवीए जलांजली । (कथं देवेन दत्तो लज्जादेव्यै जलाञ्जलिः) (८. १० पद्यादनन्तरम्) इत्यन्तेन रावणगतदुर्बुद्धिदोषप्रख्यापनादपवादः ।

अथ संफेटः–

दोषसंग्रथितं वाक्यं संफेटं संप्रचक्षते । (६२ क-ख)

यथा तत्रैव, सुमुखः (जनान्तिकम्)–सखे दुर्मुख किमपि शौर्यातिरेको रामानुजस्य यदमुना निकुम्भिलां प्रस्थितस्य कुमारमेघनादस्य संदिष्टम्, यदुत–

[1] *RAS* follows the enumeration of the members of the *vimarśasamdhi* as found in the *Daśarūpaka*. There is considerable overlapping in the *NŚ* in the enumeration and definitions of the limbs of the *vimarśasamdhi*, which also do not tally with those of the *DR*. See *NŚ*, vol. III, pp. 35 to 52.

यावन्नैव निकुम्भिलायजनतः सिद्धे हविर्लेहिनि
प्राप्तस्यन्दनबाणचापकवचः स्वं मन्यसे दुर्जयम् ।
वैदेहीविरहव्यथाविधुरितेऽप्यार्ये विधाय क्रुधो
वन्ध्यास्तावदयं स शक्रविजयिंस्त्वां लक्ष्मणो जेष्यति ॥
(८. १५)

इत्युपक्रम्य–(नेपथ्ये)

सीताप्रियं च दलितेश्वरकार्मुकं च
वालिद्रुहं च रचिताम्बुधिबन्धनं च ।
रक्षोहणं च विजिगीषुविभीषणं च
रामं निहत्य चरणौ तव वन्दिताहे ॥ (८. ४१)

इत्यन्तेन–लक्ष्मणेन्द्रजित्कुम्भकर्णानां [1]रोषवाक्यग्रथनात् संफेटः । अथ विद्रवः–

विरोधवधदाहादिर्विद्रवः परिकीर्तितः ॥६२॥ (ग-घ)

यथा तत्रैव (बालरामायणे) (८. ४८ पद्यादनन्तरम्), सुमुखः–देव पदातिलवः सुमुखस्तु मन्यते लक्ष्मणदिधक्षया कुमारमेघनादेन पावकीयः शरः संहित इति–इत्युपक्रम्य, (दक्षिणतः) सुमुखः–अयमपरः क्षते क्षारावसेकः–

आकर्णाकृष्टचापोन्मुखविशिखशिखाशेखरः शूलपाणि-
र्बिभ्राणो भैरवत्वं बहुलकलकलारावरौद्राट्टहासः ।
ध्यातः सौमित्रिणाथ प्रसरदुरुतरोत्तालवेतालमाल-
स्तद्वक्त्रादुत्पतद्भिः समजनि शिखिभिर्भस्मसादिन्द्रजिच्च ॥
(८. ८५)

[1] *RAS*-1 reads: *doṣavākyagrahaṇāt* ! *RAS*-2 and MS. 5 read: *roṣavākyagrathanāt*.

(रावणः मूर्च्छति सर्वे यथोचितमुपचरन्ति) । रावणः (मूर्च्छाविच्छेदनाटितकेन)—इत्यन्तेन कपिसेनाविक्षोभसुग्रीवनिरोधकुम्भकर्णवधेन्द्रजिद्भस्मीकरणरावणमूर्छादिसंकथनाद्[1]विद्रवः ।

अथ द्रवः—

गुरुव्यतिक्रमं प्राह द्रवं तु[2] भरतो मुनिः । (६३ क-ख)

यथा तत्रैव करङ्कः—

धिक् शौण्डीर्यमदोद्धतं भुजवनं धिक् चन्द्रहासं च ते
धिग् वक्त्राणि निकृत्तकण्ठवलयप्रीतेन्दुमौलीनि च ।
निद्रालावतिघस्मरे प्रतिदिनं स्वापान्महामेदुरे
प्रत्याशा चिरविस्मृतायुधविधौ यत् कुम्भकर्णे स्थिता ॥
(८. १४)

इत्यत्र स्वामिनोर्दशकण्ठकुम्भकर्णयोरनुजीविना राक्षसेन निन्दाकरणाद् द्रवः ।

[1] In the *NŚ vidrava* belongs to *garbhasaṃdhi*, and is noted in the *uddeśa* of *vimarśa* too, which is confusing. Abhinava explains the significance of the term thus: *vidravati=vilīyate hṛdayaṃ yeneti* (vol. III, page 52). *Vidrava* is a situation causing panic.

[2] The *Nāṭyaśāstra* says thus: *guruvyatikramo yas tu sa dravaḥ parikīrtitaḥ* (vol. III, p. 53; XIX. 90). It is strange that this term *drava*, though defined with other members of the *vimarśasaṃdhi*, is not found in the same edition in the enumeration (*uddeśa*) of the members of this *saṃdhi* at the beginning (see page 35). The available edition of the *NŚ* is of course defective in many places. The *Daśarūpaka*, which is followed by the *RAS*, has the *drava* in the *uddeśa* too, and defines it as: *dravo gurutiraskṛtiḥ*. The significance of the term *drava* is explained by Abhinava thus: *dravaṇam=calanam mārgād iti dravaḥ* (Transgression or deviation from the right course, with regard to superiors, and amounting to despise of superiors).

अथ शक्तिः—

उत्पन्नस्य विरोधस्य शमनं शक्तिरिष्यते ॥ ६३ ॥

(ग-घ)

यथा तत्रैव (बालरामायणे) रावणवधनामनि नवमाङ्के (९. ४९ पद्यात् पूर्वम्), पुरंदरः—यत् कुलाचलसंदोहदहनकर्मणि भगवान् कालाग्निरुद्रः इत्युपक्रम्य (नेपथ्ये)—

बाणैर्लाञ्छितकेतुयष्टिशिखरो मूर्च्छानमत्सारथि-
मांसास्वादनलुब्धगृध्रविहगश्रेणीभिरासेवितः ।
रक्षोनाथमहाकबन्धपतनक्षुण्णाक्षदण्डो हयै-
र्हेषित्वा स्मृतमन्दुरास्थितिहृतैर्लङ्कां रथो नीयत ॥

(९. ५६)

—इत्यन्तेन [1]निरवशेषप्रतिनायकभूतरावणकण्ठोत्सादनकथनेन विरोधशमनात् शक्तिः ।

अथ द्युतिः—

द्युतिर्नाम समुद्दिष्टा [2]तर्जनोद्वेजने बुधैः ।

(६४ क-ख)

यथा तत्रैव अष्टमाङ्के, रावणः (ऊर्ध्वमवलोक्य)— किमयमतिसत्वरः सुरसमाजः । शङ्के कतिपययातुधानवधात् तापसं प्रति प्रीयते । (सक्रोधतर्जनम्)

हर्षोत्कर्षः किमयममराः क्षुद्ररक्षोवधाद् व-
स्तन्मे दोष्णां विजितजगतां विक्रमं विस्मृताः स्थ ।

[1] *RAS*-1 reads: *niravaśeṣapratimāyābhūtarāvaṇakulotsādana*, etc.; *RAS*-2 and MS. 5 read: *niravaśeṣapratināyakabhūtarāvaṇakaṇṭhotsādana*, etc.

[2] *RAS*-1 reads: *tarjanottejane* ; others read: *tarjanodvejane*.

किं चाद्यैव प्रियरणरसो बोध्यते कुम्भकर्ण-
स्तूर्णं जेता स च दिविषदां बोध्यते मेघनादः ।।
(८. १२)

–इत्युपक्रम्य (नेपथ्ये)– विरएह केलिआकड्ढणपाडणिज्जं गोउरदुवारं। वोढेह विविहप्पहरणसण्णाहदहसहस्साइ । (विरचयत केलिकाकर्षणपातनीयं गोपुरद्वारम् । वहत विविधप्रहरणसंनाहदशसहस्राणि ।)–इत्यन्तेन देवतातर्जनलङ्कापुरजनोद्वेजनकथनाद् द्युतिः ।

अथ प्रसङ्गः–

[1]**प्रस्तुतार्थस्य कथनं प्रसङ्गः परिकीर्तितः ।। ६४ ।।** (ग-घ)

प्रसङ्गं कथयन्त्यन्ये[2] गुरूणां परिकीर्तनम् । (६५ क-ख)

यथा तत्रैव नवमाङ्के (आदौ), (प्रविश्य) यमपुरुषः– तत्रभवतो [3]लुलायलक्ष्मणः सकलप्राणिभृतां विहितनाशस्य कीनाशस्य किमपि विश्वातिशायिनी प्रभविष्णुता–इत्युपक्रम्य, दशरथः–भगवन् गीर्वाणनाथ सप्रसादमितो निधीयन्तां दृष्टयः । –(९. १८ पद्यात्पूर्वम्) इत्यन्तेन यमपुरंदरादिपूज्यसंकीर्तनाद् वा प्रस्तुतराक्षसवधरूपस्यार्थस्य प्रसञ्जनाद् वा प्रसङ्गः ।

अथ छलनम्[4]–

अवमानादिकरणं कार्यार्थं छलनं विदुः ।। ६५ ।। (ग-घ)

[1] Only *RAS*-1 reads: *prastutārthapragamanam.*

[2] The *NŚ* says: *prasaṅgaś caiva vijñeyo gurūṇāṃ parikīrtanam* The *Daśarūpaka* has: *gurukīrtanaṃ prasaṅgaḥ* (I. 46).

[3] *lulāya* means *mahiṣa* (buffalo), and *lulāyalakṣman* refers to Yama; *mahiṣavāhana* is one of the names of Yama, noted in the *Vaijayantī.*

[4] The *NŚ* has *chādana,* instead of *chalana,* in the same meaning (vol. III, pp. 35 & 55). The *DR* has *chalana.*

यथा तत्रैव (बालरामायणे), चारणः (कर्णं दत्त्वा आकाशे)—किमाह रामभद्रः । रे रे राक्षसपुत्र

यद् गौरीचरणाब्जयोः प्रथमतस्त्यक्तप्रणामक्रियं
प्रेमार्द्रेण सविभ्रमेण च पुरा येनेक्षिता जानकी ।
लूनं ते तदिदं च राक्षसशिरो जातं च शान्तं मनः
शेषच्छेदविधिस्तु संप्रति परं स्वर्वन्दिमोक्षाय मे ।।
(९. ४०)

किमाह रावणः । रे रे क्षत्रियापुत्र सुलभविभ्रमचर्मचक्षुरसि—इत्युपक्रम्य, रामः—तदित्थमभिधानमपवित्रं ते वक्त्रम् । इतो निर्विशतु वधशुद्धिम् (९. ४६ पद्यादनन्तरम्)—इत्यन्तेन रामरावणाभ्यां परस्परावमाननकरणात् छलनम् ।

अथ व्यवसायः—

व्यवसायः स्वसामर्थ्यप्रख्यापनमितीर्यते । (६६ क-ख)

यथा तत्रैव (बालरामायणे)

भो लङ्केश्वर दीयतां जनकजा रामः स्वयं याचते
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किंचिद् गतम् ।
नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः
पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः ।।
(९. १९)

—इत्युपक्रम्य, किमाह रावणः । रे रे मानुषीपुत्र । अयमसौ अक्षत्रियो रावणः । क्षत्रियो रामः । तदत्र दृश्यताम् । कतरो विनेयः । कतरो विनेता इति—किमाह रामभद्रः । हं हो अमानुषीपुत्र । क्षत्रियो रामः । अयमसौ अक्षत्रियो रावणः । तदत्र दृश्यताम्, कतरो

विनेयः। कतरो विनेता। (६. २६ पद्यादनन्तरम्)– इत्यन्तेन रामरावणाभ्यां स्वसामर्थ्यप्रख्यापनाद् व्यवसायः।

अथ विरोधनम्–

विरोधनं निरोधोक्तिः [1]संरब्धानां परस्परम् ॥ ६६ ॥

(ग-घ)

यथा तत्रैव (बालरामायणे तस्मिन्नेव स्थाने), चारणः– कथममर्षिताभ्यां रामरावणाभ्यां प्रत्युपक्रान्तम् इषुवर्षाद्वैतम् इत्युपक्रम्य, चारणः–नन्वयमोंकारो रावणशिरोमण्डलच्छेदनविद्यायाः (६. ३६ पद्यादनन्तरम्)–इत्यन्तेन संरब्धयो रामरावणयोः दिव्यास्त्रप्रयोगरूपपरस्परसंरोधकरणाद् विरोधनम्।

अथ प्ररोचना[2]–

सिद्धवद्भाविनोऽर्थस्य सूचना स्यात् प्ररोचना।

(६७ क-ख)

[1] See the *DR*, I. 47. *RAS*-1 alone reads the second foot as *śabdānāṃ ca parasparam*; others read: *saṃrabdhānām*, etc.

[2] This *prarocanā* of the *vimarśasaṃdhi* is explained by Abhinava as *nirvāhyamāṇasyārthasya darśikā, prakarṣeṇa rocate=dīpyate iti prarocanā* (i.e. clear anticipation) (vol. III, page 56). In the *Dhātupāṭha*, the root is noted as *ruca=dīptau abhiprītau ca*. The *Nāṭyadarpaṇa* derives it as: *prakarṣeṇa rocyate= dīpyate anayā*, etc. (page 90). There is yet another *prarocanā* (I mean different from the limb of the *vimarśasaṃdhi*), mentioned by Bharata and followed by others, which is a *bhāratīvṛttyaṅga*, and described as part of the *pūrvaraṅga*. Abhinava explains the *pūrvaraṅga-prarocanā* thus: *sāmājikānāṃ yā āmantraṇā=nimantraṇam*, ... *yasmāt khalu ataḥ* (*rūpakāt*) *prītyutpattir bhaviṣyati, tasmād avalokyatām etad* (*rūpakam*) *iti* (*yā āmantraṇā*) *sā prarocanā, prakṛṣṭa-rucihetubhūtatvāt* (vol. I, page 219). *The Nāṭyadarpaṇa* also notes the derivation thus: *prastutaprabandhārthasya prītyādihetutvapraśaṃsanena sāmājikānāṃ*

यथा तत्रैव अष्टमाङ्के (८. १३ पद्यादनन्तरम्), करङ्कः (जनान्तिकम्)—सखे कङ्काल देवः कुम्भकर्णं प्रबोधयति । न पुनरात्मानम् । किं च प्रयत्नेन बोधितोऽप्यसौ रामेण पुनः शायितव्य एव । कङ्कालः—मण्णे विभीसणं वज्जिअ सव्वस्सवि एसा गई (मन्ये विभीषणं वर्जयित्वा सर्वस्याप्येषा गतिः) । करङ्कः—तथैव—इत्यत्र भविष्यतः कुम्भकर्णादिराक्षसनाशस्य कङ्कालकरङ्काभ्यां सिद्धवत् निश्चित्य सूचनात् प्ररोचना ।

अथ विचलनम्—

[1]**आत्मश्लाघा विचलनम्** (६७ ग)

यथा तत्रैव, करङ्कः—किमाह कुम्भकर्णः ।

आस्तां धनुः किमसिना परतो भुसुण्डी-
चक्रैरलं भवतु पट्टिशमुद्गराद्यैः ।
धावत्प्लवङ्गपृतनाकबलक्रमेण
यास्याम्यहं सुहिततां च रिपुक्षयं च ।। (८. ३७)

(पुनः पृच्छति रावणः) साधु वत्स साधु । सत्यं मदनुजोऽसि

śravaṇāvalokanotsāhotpādanaṃ prakṛto 'rthaḥ prakarṣeṇa rocyate upādeyatayā dhriyate anayā iti prarocanā (p. 138). This rendering seems to indicate that we should derive the *bhāratīprarocanā* as: *prakarṣeṇa rocayati* (causative) *sāmājikān iti prarocanā* (or in the passive as was done by the *ND*): That which encourages and makes the audience interested. In this case of the *pūrvaraṅgaprarocanā*, *abhiprīti* (one of the two meanings of the root noted early) seems to be the meaning intended, whereas in the *vimarśāṅgaprarocanā*, *dīpti* (the other meaning)=shining or clear noticeability of the events (to come) seems to be intended. See also the *RAS*, III. 141-142, and the *DR*, I. 47 and III. 6. See fn. 3, p. 305.

[1] Only *RAS*-1 reads: *ātmālāpād vicalanam*; all others read: *ātmaślāghā vicalanam.* The *Daśarūpaka* says: *vikatthanā vicalanam* (I. 48).

इत्युपक्रम्य–

अनेन लङ्का यदकारि मत्पुरी
हनूमतो गात्रगतेन भस्मसात् ।
निजापराधप्रशमाय तद्ध्रुवं
निषेवितुं मामुपयाति पावकः ॥ (८. ४८)

इत्यन्तेन रावणकुम्भकर्णाभ्यामात्मश्लाघा कृतेति विचलनम् ।

अथादानम्–

आदानं कार्यसंग्रहः ॥ ६७ ॥ (घ)

यथा तत्रैव (बालरामायणे) नवमाङ्के पुरंदरः–सखे दशरथ कथमयमनन्यसदृशाकारो रामभद्रपुरुषकारः । अतश्च

निर्दग्धत्रिपुरेन्धनोऽस्तु गिरिशः क्रौञ्चाचलच्छेदने
पाण्डित्यं विदितं गुहस्य किमु तावज्ञातयुद्धोत्सवौ ।
लूत्वा पङ्कजलावमाननवनं वीरस्य लङ्कापते-
र्वीराणां चरिताद्भुतस्य परमे रामः स्थितः सीमनि ॥
(९. ५७)

इत्युपक्रम्य–

रणरसिकसुरस्त्रीमुक्तमन्दारदामा
स्वयमयमवतीर्णो लक्ष्मणन्यस्तहस्तः ।
विरचितजयशब्दो वन्दिभिः स्यन्दनाङ्काद्
दिनकरकुललक्ष्मीवल्लभो रामभद्रः ॥ (९. ५९)

इत्यन्तेन निखिलभुवनबाधाशमनरूपरावणवधसंपादितधर्मादि-लक्षणकार्यविशेषसंग्रहणादादानम्[1] ।

[1] See note 2, p. 314.

अथ निर्वहणसंधिः—

मुखसंध्यादयो यत्र विकीर्णा बीजसंयुताः ।
महाप्रयोजनं यान्ति तन्निर्वहणमुच्यते ।। ६८ ।।
[1]**संधिविरोधौ ग्रथनं निर्णयपरिभाषणे प्रसादश्च ।**
आनन्दसमयकृतयो भाषोपनिगूहने तद्वत् ।।६९ ।।
अथ पूर्वभावसयुजावुपसंहारप्रशस्ती च ।
इति निर्वहणस्याङ्गान्याहुरमीषां तु लक्षणं वक्ष्ये
।। ७० ।।

अथ संधिः—

संधिर्बीजोपगमः (७१ क)

यथा तत्रैव (बालरामायणे) राघवानन्दनामनि दशमाङ्के (आदौ), (ततः प्रविशति सशोका लङ्का) लङ्का—हा दुद्धरतवविसेस परितोसिदारविन्दासण तिहुवणेक्कमल्ल दसकण्ठ हा हेलावन्दीकिद-महिन्द मेहनाद हा समरसंरंभसुप्पसण्ण कुंभकण्ण कहिंसि देहि मे पडिवअणं । (हा दुर्धरतपोविशेष परितोषितारविन्दासन त्रिभुवनैकमल्ल दशकण्ठ । हा हेलाबन्दीकृतमहेन्द्र मेघनाद । हा समरसंरम्भ-सुप्रसन्न कुम्भकर्ण । क्वासि । देहि मे प्रतिवचनम्—इत्युपक्रम्य, (प्रविश्य सत्वरा) अलका—सखि धर्मजेतरि विभीषणेऽपि नेतरि तत्रभवती सशोकशङ्कुरिव । लङ्का—जं तिणेत्तमित्तस्स णअरी भणदी । (यत् त्रिनेत्रमित्रस्य नगरी भणति ।) (१०. २ पद्यात् पूर्वम्) —इत्यन्तेन दुष्टराक्षसशिक्षारूपरामोत्साहबीजोपगमनात् संधिः ।

[1] MSS. 7, 8, 9 and 10 read: *nirodho-*; MS. 10 reads: *visaṃdhi-virodhagrahaṇam*! *RAS*-1, *RAS*-2 and MSS. 4 & 5 read:-*virodhau*, etc.; the *DR* reads: *vibodha* (for *virodha*). See my note 135 to *DRA*.

अथ विरोधः—

कार्यस्यान्वेषणं विरोधः स्यात् । (७१ ख)

यथा तत्रैव (नेपथ्ये)

रुद्राणि लक्ष्मि वरुणानि सरस्वति द्यौः
सावित्रि धात्रि सकलाः कुलदेवताश्च ।
शुद्ध्यर्थिनी विशति शुष्मणि रामकान्ता
तत् संनिधत्त सहसा सह लोकपालैः ।। (१०. २)

—इत्युपक्रम्य, लङ्का—अह्रो देवदाणं वि सीदापक्खवादो। अधवा सव्वो गुणेसु रज्जदि। ण सरीरेसु। (अह्रो देवतानामपि सीतापक्षपातः। अथवा सर्वो गुणेषु रज्यति । न शरीरेषु ।) (१०. ८ पद्यादनन्तरम्) इत्यन्तेन सीताशुद्धिरूपकार्यान्वेषणाद् विरोधः ।

अथ ग्रथनम्—

ग्रथनं तदुपक्षेपः (७१ ग)

यथा तत्रैव

बद्धः सेतुर्लवणजलधौ क्रोधवह्नेः समित्त्वं
नीतं रक्षःकुलमधिगताः शुद्धिमन्तश्च दाराः ।
तेनेदानीं विपिनवसतावेष पूर्णप्रतिज्ञो
दिष्ट्यायोध्यां व्रजति दयिताप्रीतये पुष्पकेण ।।
(१०. १५)

तद् भोः सकलप्लवङ्गयूथपतयः—इत्यारभ्य—

संप्रेषितश्च हनुमान् भरतस्य पार्श्वं
लङ्काङ्गनाचकितनेत्रनिरीक्षितश्रीः ।

यात्येष वारिनिधिलङ्घनदृष्टसारो
राज्याभिषेकसमयोचितकार्यसिद्धेः ।। (१०. १६)

—इत्यन्तेन रामाभिषेकरूपपरमकार्योपक्षेपाद् ग्रथनम् ।

अथ निर्णयः—

स्यादनुभूतस्य निर्णयः कथनम् ।। ७१ ।। (घ)

यथा तत्रैव (बालरामायणे), रामः (अपवार्य)—

अय्यस्मदग्रकरयन्त्रनिपीडितानां
धाराम्भसां स्मरसि मज्जनकेलिकाले ।
सुभ्रु त्वया निजकुचाभरणैकयोग्य-
मत्राब्जवल्लिदलमावरणाय दत्तम् ।। (१०. ७६)

किं च

तदिह कलहकेलौ सैकते नर्मदायाः
स्मरसि सुतनु किंचिन्नौ पराधीनसुप्तम् ।
उषसि जलसमीरप्रेङ्खणाचार्यकार्यं
तदनु मदनमुद्रां तच्च गाढोपगूढम् ।। (१०. ७७)

इत्यत्र रामेण स्वानुभूतार्थकथनान्निर्णयः ।

अथ परिभाषा—

परिभाषा त्वन्योन्यं जल्पनमथवा परीवादः ।
(७२ क-ख)

यथा तत्रैव (१०. ९२ पद्यादनन्तरम्), सीता—अज्जउत्त दसकण्ठणिसूअण वाराणसीसंकित्तणेण सुमराविदम्हि अक्खिआणद्दं जणणीभूदं मिहिलां महाणअरीं । (आर्यपुत्र दशकण्ठनिषूदन वाराणसी-

संकीर्तनेन स्मारितास्मि अक्ष्यानन्दं मिथिलां महानगरीम्)–इत्युपक्रम्य, विभीषणः–इह हि खलु क्षत्रियान्तकरस्य भङ्गो भार्गवमुनेर्दत्तः। सुग्रीवः–

अपां फेनेन तृप्तोऽसौ स्नातश्चन्द्रिकया च सः।
यदप्रसूतकौशल्यं क्षत्रं क्षपितवान् मुनिः॥ (१०. ६४)

–इत्यन्तेन सीतारामविभीषणसुग्रीवाणामन्योन्यसंजल्पनेन वा सुग्रीवेण भार्गवपरीवादसूचनाद् वा परिभाषणम्।

अथ प्रसादः–

शुश्रूषादिप्राप्तं प्रसादमाहुः प्रसन्नत्वम्॥ ७२॥
(ग-घ)

यथा तत्रैव (बालरामायणे), रामः (हस्तमुद्यम्य)–

हं हो पुष्पक वायुवेग मुनिना धूमः पुरः पीयते
छायां मा कुरु कोऽप्ययं दिनमणावेकाग्रदृष्टिः स्थितः।
दूरादत्र भव प्रदक्षिणगतिः स्थाणोरिदं मन्दिरं
किंचित् तिष्ठ तपस्विनस्तव पुरो यावत् प्रयान्त्यध्वनः॥
(१०. ५६)

–इत्युपक्रम्य, अगस्त्यः–

का दीयतां तव रघूद्वह सम्यगाशी-
र्निष्कण्टकानि विहितानि जगन्ति येन।
आशास्महे ननु तथापि सह स्ववीरै-
र्भूकाश्यपोपमसुतद्वितया वधूः स्यात्॥ (१०. ६४)

रामः–परमनुगृहीतं रघुकुलम्–इत्यन्तेन अगस्त्यदत्ताशीर्वाद-रूपप्रसादकथनात् प्रसादः।

अथानन्दः–

अभिलषितार्थसमागममानन्दं प्राहुराचार्याः ।

(७३ क-ख)

यथा तत्रैव, रामः– हं हो विमानराज विमुच्य वसुधासविध-वर्तिनीं गतिं किंचिदुच्चैर्भव। कुतूहलिनी जानकी दिव्यलोक-दर्शनव्यतिकरस्य। (ऊर्ध्वगतिनाटितकेन)

यथा यथारोहति बद्धवेगं
व्योम्नः शिखां पुष्पकमानताङ्गि ।
महाम्बुधीनां वलयैर्विशालै-
स्तथा तथा संकुचितेव पृथ्वी ।। (१०. २२)

सुरचारणकिंनरविद्याधरकुलसंकुलं गगनगर्भमीक्षस्व। (प्रविश्य) विद्याधरः–अतः परमगम्या अस्मादृशां भुवः। स च ब्रह्मलोक इति श्रूयते। –इत्यन्तेन सीतादीनामभिलषितदिव्यलोकदर्शनरूपार्थसिद्धे-रानन्दः ।

अथ समयः–

समयो दुःखापगमः (७३ ग)

यथा तत्रैव (बालरामायणे १०. १०० पद्यात् पूर्वम्), भरतः– आर्य रावणविद्रावण भरतोऽहमभिवादये। इत्युपक्रम्य, (भरत-सुग्रीवविभीषणाः परस्परं परिष्वजन्ते) (१०. १०२ पद्यात् पूर्वम्) इत्यन्तेन बन्धूनामन्योन्यावलोकनपरिष्वङ्गादिभिर्दुःखापगमकथनात् समयः ।

अथ कृतिः–

कृतिरपि लब्धार्थसुस्थिरीकरणम् ।। (७३ घ)

यथा तत्रैव (१०. ९६ पद्यात् पूर्वम्), (प्रविश्य) हनुमान्–देव मत्तः श्रुतवृत्तान्तो वसिष्ठः समं भरतशत्रुघ्नाभ्यामन्याभिश्च प्रकृतिभिर्भवदभिषेकसज्जस्तिष्ठति–इत्युपक्रम्य, वसिष्ठः–(का दीयतां तव रघूद्वह सम्यगाशीरित्यादि पठति ।) रामः– आर्षं हि वचनं विभिन्नवक्तृकमपि न विसंवदति यदगस्त्यवाचा वसिष्ठोऽपि ब्रूते–(१०. ९८ पद्यादनन्तरम्) इत्यन्तेन अगस्त्यलब्धाशीर्वादस्य वसिष्ठवचनसंवादेन स्थिरीकरणात् कृतिः ।

अथ भाषणम्–

[1]मानाद्याप्तिर्भाषणम् (७४ क)

यथा तत्रैव, वसिष्ठः–

रामो दान्तदशाननः किमपरं सीता सतीष्वग्रणीः
सौमित्रिः सदृशोऽस्तु कस्य समरे येनेन्द्रजिन्निर्जितः ।
किं ब्रूमो भरतं च रामविरहे तत्पादुकाराधकं
शत्रुघ्नः कथितोऽग्रजस्य च गुणैर्वन्द्यं कुटुम्बं रघोः ।।
(१०. १०२)

इत्यत्र वसिष्ठेन रघुकुटुम्बस्य रामचन्द्रादिसत्पुरुषोत्पत्तिस्थानतया तल्लक्षणबहुमानप्राप्तिकथनाद् भाषणम् ।

अथोपगूहनम्–

उपगूहनमद्भुतप्राप्तिः । (७४ ख)

यथा तत्रैव (बालरामायणे), अलका–अहो नु खलु भोः पतिव्रतामयं ज्योतिः अनभिभवनीयं ज्योतिरन्तरैः । यतः

[1] *RAS*-1 reads: *bahumānād vyākhyānam bhāṣaṇam*; MS. 4 reads: *bahumānāptir bhāṣaṇam*; *RAS*-2, MSS. 5, 7, 8 & 9 read: *mānādyāptiḥ*, etc.; MS. 10 reads: *bhāgyāptiḥ*, etc.

प्रविशन्त्या चिताचक्रं जानक्या परिशुद्धये ।
न भेदः कोऽपि निर्णीतः पयसः पावकस्य च ॥
(१०. ६)

(विचिन्त्य)–इत्युपक्रम्य–(नेपथ्ये)

योगीन्द्रश्च नरेन्द्रश्च यस्याः स जनकः पिता ।
विशुद्धा रामगृहिणी बभौ दशरथस्नुषा ॥ (१०. १४)

इत्यन्तेन सीतायाः निःशङ्कज्वलनप्रवेशनिरपायनिर्गमनरूपाश्चर्यकथनादुपगूहनम् ।

अथ पूर्वभावः–

[1]**दृष्टक्रमकार्यस्य स्याद् दृष्टिः पूर्वभावस्तु ॥ ७४ ॥**
(ग-घ)

यथा तत्रैव (१०.१०२ पद्यादनन्तरम्) वत्स रामभद्र प्रशस्तो मुहूर्तो वर्तते । तदध्यास्स्व पित्र्यं सिंहासनम्–इत्युपक्रम्य, वसिष्ठः– रामभद्र धन्योऽसि । यस्य ते भगवान् कुबेरोऽर्थी–इत्यन्तेन वसिष्ठेन रामभद्रस्याभिषेकाङ्गीकरणकुबेरविमानप्रत्यर्पणरूपयोरर्थयोर्दर्शनात् पूर्वभावः ।

अथोपसंहारः–

धर्मार्थाद्युपगमनादुपसंहारः कृतार्थताकथनम् ।
(७५ क-ख)

[1] *RAS*-1 reads: *tadupakramakāryasya*, etc.; *RAS*-2 reads: *kāryasya sveṣṭasya syād dṛṣṭiḥ*, etc.; MS. 5 reads clearly: *dṛṣṭakramakāryasya*, etc. The reading in MSS. 7, 8, 9, & 10 is defective in spelling; but if some slight corrections are effected, they seem to agree with the MS. 5. See *NŚ* (GOS) XIX. 103, and the *DR*, I. 53.

यथा तत्रैव (बालरामायणे), वसिष्ठः– वत्स रामभद्र किं ते भूयः प्रियमुपकरोमि । रामः–किमतः परं प्रियमस्ति ।

रुग्णं चाजगवं न चापि कुपितो भर्गः सुरग्रामणीः
सेतुश्च ग्रथितः प्रसन्नमधुरो दृष्टश्च वारांनिधिः ।
पौलस्त्यश्चरमः स्थितश्च भगवान् प्रीतः श्रुतीनां कविः
प्राप्तं यानमिदं च याचितवते दत्तं कुबेराय च ।।
(१०. १०४)

इत्यत्र रुग्णं चाजगवम् इत्यनेन भूतपतिधनुर्दलनेन सीताधिगमरूपकामप्राप्तेः पौलस्त्यश्चरमः स्थितः इत्यनेन शरणागतरक्षणेन धर्मप्राप्तेः प्राप्तं यानमिदं चेत्यत्र विमानरत्नलाभेनार्थप्राप्तेश्च न चापि कुपितो भर्गः सुरग्रामणीरित्यादिभिः पादान्तवाक्यैः रामचन्द्रेण स्वकृतार्थताकथनादुपसंहारः ।

किं च रुग्णं चाजगवं सेतुश्च ग्रथित इत्यादिभ्यां [1]युद्धोत्साहसिद्धेः पौलस्त्यश्चरमः स्थितः इत्यत्र विभीषणस्य पालनेन दयावीरसिद्धेः याचितवते दत्तं कुबेराय चेत्यनेन दानवीरसिद्धेश्च रामभद्रेण स्वकृतार्थताकथनाद् वा उपसंहारः ।

अथ प्रशस्तिः–

भरतैश्चराचराणामाशीराशंसनं प्रशस्तिः स्यात्
।। ७५ ।।
(ग-घ)

[1] *RAS*-1 and MS. 4 read: *yuddhotsāhavidheḥ*, for *yuddhotsāhasiddheḥ*; (thus—*vidheḥ* is found instead of *-siddheḥ* in the later cases too, which follow); *RAS*-2 and MS. 5 read—*siddheḥ* throughout.

यथा तत्रैव, तथाचेदमस्तु भरतवाक्यम्–

सम्यक् संस्कारविद्याविशदमुपनिषद्भूतमर्थाद्भुतानां
ग्रथ्नन्तु ग्रन्थबन्धं वचनमनुपतत्सूक्तिमुद्राः कवीन्द्राः ।
सन्तः संतर्पितान्तःकरणमनुगुणं ब्रह्मणः काव्यमूर्ते-
स्तत्तत्त्वं सात्त्विकैश्च प्रथमपिशुनितं भावयन्तोऽर्चयन्तु ॥
(१०. १०५)

इत्यत्र कवीन्द्राणां निर्दोषसूक्तिग्रथनाशंसनेन भावकानां च तद्ग्रन्थभावनाशंसनेन च सकलव्यवहारप्रवर्तकवाङ्मयरूपजगन्मङ्गल-कथनात् प्रशस्तिरिति सर्वं प्रशस्तम् ।

रसभावानुरोधेन प्रयोजनमपेक्ष्य च ।
साकल्यं कार्यमङ्गानामित्याचार्याः प्रचक्षते ॥ ७६ ॥
केषांचिदेषामङ्गानां [1]विकल्पं केचिदूचिरे ।
मुखादिसंधिष्वङ्गानां क्रमोऽयं न विवक्षितः ॥ ७७ ॥
क्रमस्यानादृतत्वेन भरतादिभिरादिमैः ।
लक्ष्येषु व्युत्क्रमेणापि [2]कथनेन विचक्षणैः ॥ ७८ ॥
चतुःषष्टिकलामर्मवेदिना सिंहभूभुजा ।
लक्षिता च चतुःषष्टिर्बालरामायणे स्फुटम् ॥ ७९ ॥

[1] *RAS*-2 and MS. 5 read: *vikalpam*; *RAS*-1 and MSS. 4, 7, 8, 9 and 10 read: *vaikalyam*; see the *NŚ* (GOS) XIX. 104-106 (Vol. III. p. 61). Śāradātanaya has the following: *netrādivaśato'mīṣām prādhānyaṃ ca kramo'pi ca, yathāsaṃbhavam ādheyo vikalpaś ca samuccayaḥ. teṣāṃ lakṣyeṣu dṛṣṭatvān nānyathā kalpayet sudhīḥ* (page 213).

[2] *RAS*-1 reads: *bharatena*(?); MSS. 4, 7, 8, 9 and 10 read: *kathaneṣu*; *RAS*-2 and MS. 5 read: *kathanena*.

अथ संध्यन्तराणि–

मुखादिसंधिष्वङ्गानामशैथिल्यप्रतीतये[1] ।
[2]संध्यन्तराणि योज्यानि[3] तत्र तत्रैकविंशतिः ।। ८० ।।

[4]आचार्यान्तरसंमत्या चमत्कारोदयादपि ।
वक्ष्ये [5]लक्षणमेतेषामुदाहृतिमपि स्फुटम् ।। ८१ ।।

सामदाने भेददण्डौ प्रत्युत्पन्नमतिर्वधः ।
गोत्रस्खलितमोजश्च[6] धीः क्रोधः साहसं भयम् ।। ८२ ।।

[1] *RAS*-1 and MS. 4 read: *aśaithilyaṃ pratīyate*; *RAS*-2 and MS. 5 read: *aśaithilyaṃ pratīryate*; MSS. 7, 8, 9 and 10 read: *aśaithilyapratītaye*.

[2] Abhinava has the following: *tatra kecid āhuḥ—antaram=chidram saṃdhir iti; tad aṅgamātram; tātsthyācca tātsthānyam; tena saṃdhyaṅgacchidravartitvāt saṃdhyantarāṇi; ata eva cāṅgānāṃ (i.e. saṃdhyaṅgānāṃ) saṃbaddhāni . . . . anye manyante—ya evopakṣepādyā(ḥ) sāmānyā uktāḥ teṣām evaitadviśeṣā avāntarabhedāḥ; upakṣepo hi sāmādiviśeṣabhinnaḥ; tathā hi: lākṣāgṛhānaleti krodhātmā upakṣepaḥ; rāmābhyudaye bhayātmā upakṣepaḥ; pratimāniruddhe svapnarūpaḥ; udāttarāghave hetvavadhāraṇātmā; evam anyad anusaraṇīyam; ete ca vibhāvānubhāvavyabhicārirūpā eva; na tu tadatiriktaṃ jagati kiṃcid asti prayoge; prayogojjvalatvopayogāya tūpalakṣaṇatvena ekaviṃśatir ity uktaṃ kaver mārgaṃ pradarśayitum* (Vol. III, pp. 63-64). See also fn. 1, p. 366. See *NŚ* (GOS) XIX. 107 to 109. See also the *Bhāvaprakāśa*, page 214, lines 7-12.

[3] Only *RAS*-1 reads: *yogyāni*.

[4] Only *RAS*-1 reads: *ācāryāntarasaṃgatyā camatkāro vidhīyate*.

[5] Only *RAS*-1 reads: *lakṣyalakṣaṇam eteṣāmudāhṛtam api*, etc.; others read clearly *vakṣye lakṣaṇam eteṣām*, etc.

[6] The *NŚ* reads: *hrīḥ* (instead of *dhīḥ*) Vol. III, p. 63. Three lines from *gotraskhalita-* to *ekaviṃśatiḥ* are missing in *RAS*-2 & MS. 5.

माया च संवृति[1]र्भ्रान्तिर्दूत्यं हेत्ववधारणम् ।
स्वप्नलेखौ मदश्चित्रमित्येतान्येकविंशतिः ।। ८३ ।।

तत्र साम–

तत्र साम प्रियं वाक्यं स्वानुवृत्तिप्रकाशनम् ।

(८४ क-ख)

यथा मालविकाग्निमित्रे, राजा–अये न भेतव्यम् । मालविका (सावष्टम्भम्)–जो ण भाअदि सो मए भट्टिणीदंसणे दिट्ठसामत्थो भट्टा । (यो न विभेति स मया भट्टिनीदर्शने दृष्टसामर्थ्यो भर्ता ।)

राजा–

दाक्षिण्यं नाम बिम्बोष्ठि नायकानां कुलव्रतम् ।
तन्मे दीर्घाक्षि ये प्राणास्ते त्वदाशानिबन्धनाः ।।

(४. १४)

इत्यत्र राज्ञो वचनं साम ।

अथ दानम्–

दानमात्मप्रतिनिधिर्भूषणादिसमर्पणम् ।। ८४ ।।

(ग-घ)

यथा मालतीमाधवे, मालती–पिअसहि सव्वदा सुमरिदव्वह्मि । एसा वि माहवसहत्थणिम्माणमणोहरा वउलमाला मालदीणिव्विसेसं पिअसहीए दट्ठव्वा । सव्वदा हिअएण अ धारणिज्जा इति । (प्रियसखि सर्वदा स्मर्तव्यास्मि । एषा च माधवस्वहस्तनिर्माणमनोहरा वकुलमाला मालतीनिर्विशेषं प्रियसख्या द्रष्टव्या । सर्वदा हृदयेन च

[1] *RAS*-1 reads: *saṃhṛtiḥ*; MSS. 4, 7, 8, 9 and 10 read: *saṃvṛtiḥ* The *NŚ* has *saṃvaraṇam* in this context.

धारणीया इति ।) (इति स्वकण्ठादुन्मुच्य माधवस्य कण्ठे विन्यस्यन्ती सहसापसृत्य साध्वसोत्कम्पं नाटयति)–(षष्ठाङ्के ११ पद्यादनन्तरम्, ३५८ पुटे)

अत्र मालत्या मर्तुकामायाः प्रतिनिधितया लवङ्गिकायां [1]वकुल-मालासमर्पणं दानम् ।

अथ भेदः–

भेदस्तु कपटालापैः सुहृदां भेदकल्पनम् ।। ८५ ।।
(क-ख)

यथा मालतीमाधवे, कामन्दकी–

राज्ञः प्रियाय सुहृदे सचिवाय कार्याद्
दत्त्वात्मजां भवतु निर्वृतिमानमात्यः ।
दुर्दर्शनेन घटतामियमप्यनेन
धूमग्रहेण विमला शशिनः कलेव ।। (२.८)

मालती (स्वगतम्)–हा ताद तुमं वि णाम मम एव्वं ति सव्वहा जिदं भोअतिह्णाए। (हा तात त्वमपि नाम ममैवमिति सर्वथा जितं भोगतृष्णया)– इत्यत्र कामन्दक्या मालतीतज्जनकयोर्भेदकल्पनं भेदः ।

अथ दण्डः–

दण्डस्त्वविनयादीनां दृष्टया श्रुत्याथ तर्जनम् ।।८५।।
(ग-घ)

[1] *RAS*-1 and MS. 4 read: *kuvalayamālā-*, instead of *vakulamālā* though the reference in this context is to *vakulamālā* (which is mentioned even in *RAS*-1, and MS. 4). *RAS*-2 and MS. 5 read clearly *vakulamālā*.

यथा मालतीमाधवे दृष्ट्या, माधवः—रे रे पाप

प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥

(५. ३१)

अत्राघोरघण्टस्याविनयदर्शनेन माधवकृततर्जनं [1]दण्डः ।

श्रुत्या यथा शाकुन्तले, राजा (सहसोपसृत्य)—

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥

(१. २१)

अत्राविनयश्रुत्या दुष्यन्तेन कृतं तर्जनं [2]दण्डः ।

अथ प्रत्युत्पन्नमतिः—

तात्कालिकी तु प्रतिभा [3]प्रत्युत्पन्नमतिः स्मृता ।

(८६ क-ख)

यथा मालविकाग्निमित्रे, राजा—न खलु मुद्रामधिकृत्य ब्रवीमि । एतयोर्बद्धयोः (मालविका-वकुलावलिकयोः) किंनिमित्तो मोक्षः ।

[1] Pūrṇasarasvatī takes this verse to represent *sampheṭa (vimarśa-saṃdhyaṅga)*. Dhanika cites this portion for the *sampheṭa*, the *ārabhaṭīvṛttyaṅga* (*DR*, II.58).

[2] Rāghavabhaṭṭa quotes the *RAS* with his comments on this verse (*kaḥ paūrave*, etc.) illustrating *śrutyā daṇḍaḥ*.

[3] In the *Śākuntala*, the portion connected with the King's remarks: *idaṃ tat pratyutpannamati straiṇam iti yad ucyate* (after V. 21) is explained by Rāghavabhaṭṭa to be a case of this *pratyutpanna-mati*. He also quotes the definition from the *RAS*.

किं देव्याः परिजनमतिक्रम्य भवान् संदिष्टः इत्येवम् अनया (माधविकया) प्रष्टव्यम्। विदूषकः– णं पुच्छिदो ह्मि। पुणो मन्दस्स वि मे तस्सिं पञ्चुप्पण्णा मदी आसि। (ननु पृष्टोऽस्मि पुनर्मन्दस्यापि मे तस्मिन् प्रत्युत्पन्ना मतिरासीत्)। राजा– कथ्यताम्। विदूषकः– भणिदं मए–देव्वचिंतएहिं विण्णाविदो राआ। सोवसग्गं वो णक्खत्तं ता अवस्सं सव्वबन्धमोक्खो करीअदुत्ति। (भणितं मया–दैवचिन्तकैर्विज्ञापितो राजा सोपसर्गं वो नक्षत्रम्। तदवश्यं सर्वबन्धमोक्षः क्रियताम् इति)। राजा (सहर्षम्)–ततस्ततः। विदूषकः–तं सुणिअ देवीए इरावदीचित्तं रक्खंतीए राआ किल मोएदि त्ति अहं संदिट्ठो त्ति तदो जुज्जदि त्ति ताए इव्वं संपादिदो अत्थो। (तत् श्रुत्वा देव्या इरावतीचित्तं रक्षन्त्या राजा किल मोचयतीत्यहं संदिष्टः इति। ततो युज्यते इति तयैवं संपादितोऽर्थः)। राजा–(विदूषकं परिष्वज्य) सखे प्रियोऽहं खलु तव। (चतुर्थाङ्के- ५ पद्यानन्तरम्)

इत्यत्र विदूषकस्य समुचितोत्तरप्रतिभा प्रत्युत्पन्नमतिः।

अथ वधः—

वधस्तु [1]जीवितद्रोहक्रिया स्यादाततायिनः ॥ ८६ ॥
(ग-घ)

यथा वेणीसंहारे (६.४४ पद्यादनन्तरम्), कृष्णः–अहं पुनश्चार्वाकेण रक्षसा व्याकुलीकृतं भवन्तमुपलभ्यार्जुनेन सह त्वरिततरमायातः। युधिष्ठिरः–किं नाम चार्वाकेण रक्षसा वयमेवं विप्रलब्धाः। भीमः (सरोषम्)–भगवन् क्वासौ धार्तराष्ट्रसखो राक्षसश्चार्वाको येनार्यस्य महान् चित्तविभ्रमः कृतः। कृष्णः–निगृहीतः स दुरात्मा नकुलेन। युधिष्ठिरः –प्रियं नः। प्रियं नः। इत्यत्र चार्वाकनिग्रहो वधः।

[1] Only *RAS*-1 reads: *vadhas tu jñāpitā drohakriyā*. Others read: *jīvitadroha*, etc.

अथ गोत्रस्खलितम्—

तद् गोत्रस्खलितं यत्तु नामव्यत्ययभाषणम् ।

(८७ क-ख)

यथा विक्रमोर्वशीये (तृतीयाङ्के आदौ), (ततः प्रविशतो भरतशिष्यौ) प्रथमः—अये सदोषावकाश इव ते वाक्यशेषः । द्वितीयः—आम् । तहिं उव्वसीए वअणं पमादक्खलिदं आसि । (आम् तत्र उर्वश्याः वचनं प्रमादस्खलितमासीत् ।) प्रथमः—कथमिव ? द्वितीयः—लच्छीभूमिआए वट्टमाणा उव्वसी वारुणीभूमिआए वट्टमाणाए मेणआए पुच्छिदा । सहि समाअदा एदे तेल्लोक्कपुरिसा सकेसवा लोअवाला । कदमस्सिं दे भावाहिणिवेसोत्ति । (लक्ष्मीभूमिकायां वर्तमाना उर्वशी वारुणीभूमिकायां वर्तमानया मेनकया पृष्टा । सखि समागता एते त्रैलोक्यपुरुषाः सकेशवा लोकपालाः । कतमस्मिंस्ते भावाभिनिवेश इति ।) प्रथमः—ततस्ततः । द्वितीयः—तदो ताए पुरिसोत्तमे त्ति भणिदव्वे पुरूरवसि त्ति णिग्गदा वाणी । (ततस्तस्याः पुरुषोत्तम इति भणितव्ये पुरूरवसीति निर्गता वाणी ।) —इत्यत्र नामव्यतिक्रमः स्फुट एव ।

अथौजः—

ओजस्तु वागुपन्यासो निजशक्तिप्रकाशकः ।। ८७ ।।

(ग-घ)

यथा उत्तररामचरिते, कुशः—सखे दाण्डायन ।

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै-
रायोधनं ननु किमात्थ सखे तथेति ।
अद्यास्तमेतु भुवनेषु स राजशब्दः
क्षत्त्रस्य शस्त्रशिखिनः शममद्य यान्तु ।। (६. १६)

इत्यत्र ओजः स्पष्टमेव ।

अथ धीः–

इष्टार्थसिद्धिपर्यन्ता चिन्ता धीरिति कथ्यते ।

(८८ क-ख)

यथा मालविकाग्निमित्रे चतुर्थाङ्के (४. २ पद्यादनन्तरम्), राजा (निश्वस्य सपरामर्शम्)–सखे किमत्र कर्तव्यम् । विदूषकः (विचिन्त्य)–अत्थि एत्थ उवाओ । (अस्त्यत्रोपायः ।) राजा–क इव । विदूषकः (सदृष्टिक्षेपम्)–को वि अदिट्ठो सुणिस्सदि । कण्णे दे कहेमि (इत्युपश्लिष्य कर्णे) एवं विअ । (कोऽप्यदृष्टः श्रोष्यति । कर्णे ते कथयामि । एवमिव ।)– इत्यावेदयति । राजा (सहर्षम्) सुष्ठु प्रयुज्यतां सिद्धये । –इत्यत्र विदूषकेण धारिणीहस्तमणिमुद्रिका-कर्षणहेतुभूतस्य भुजगविषवेगकपटस्य चिन्तनं धीः ।

अथ क्रोधः–

क्रोधस्तु चेतसो दीप्तिरपराधादिदर्शनात् ।। ८८ ।।

(ग-घ)

यथा रत्नावल्यां तृतीयाङ्के (अन्ते ३. १९ पद्यात् पूर्वम्), वासवदत्ता –हञ्जे कंचणमाले एदेण एव्व लदापासेण बन्धिअ गेह्ण एणं बह्मणं । एणं दुट्ठकण्णआं अ अग्गदो करेहि (हञ्जे काञ्चनमाले एतेनैव लतापाशेन बद्ध्वा गृहाणैनं ब्राह्मणम् । इमां दुष्टकन्यकां च अग्रतः कुरु ।) –इत्यत्र वासवदत्तायाः रोषः क्रोधः ।

अथ साहसम्–

स्वजीवितनिराकाङ्क्षो व्यापारः साहसं भवेत् ।

(८९ क-ख)

यथा मालतीमाधवे–

अशस्त्रपातमव्याजपुरुषाङ्गोपकल्पितम् ।
(स्वशस्त्रपूतनिर्व्याजपुरुषाङ्गोपकल्पितम्; इति मुद्रितमालतीमाधवपाठः)
विक्रीयते महामांसं गृह्यतां गृह्यतामिदम् ॥
(५. १२)

अत्र माधवस्य महामांसविक्रयव्यापारः साहसम् ।

अथ भयम्–

भयं त्वाकस्मिकत्रासः (८६ ग)

यथा अभिरामराघवे द्वितीयाङ्के, (प्रविश्यापटीक्षेपेण संभ्रान्तः) वटुः–अय्य परित्ताअहि परित्ताअहि । अच्चहिदे पडिदो ह्मि । (आर्य परित्रायस्व परित्रायस्व । अत्याहिते पतितोऽस्मि ।) (इत्यभिद्रवति) इत्यादौ वटुत्रासो भयम् ।

अथ माया–

माया कैतवकल्पना ॥ ८६ ॥ (घ)

यथा रत्नावल्याम्, राजा (आसनादवतीर्य)–देवि पश्य

एष ब्रह्मा सरोजे रजनिकरकलाशेखरः शंकरोऽयं
दोर्भिर्दैत्यान्तकोऽयं सधनुरसिगदाचक्रचिह्नैश्चतुर्भिः ।
एषोऽप्यैरावतस्थस्त्रिदशपतिरमी देवि देवास्तथान्ये
नृत्यन्ति व्योम्नि चैताश्चलचरणरणन्नूपुरा दिव्यनार्यः॥
(४. ११)

इत्यत्र ऐन्द्रजालिककल्पितं कैतवं माया ।

अथ संवृतिः—

संवृतिः स्वयमुक्तस्य स्वयं प्रच्छादनं भवेत् ।

(६० क-ख)

यथा शाकुन्तले, राजा (स्वगतम्) अतिचपलोऽयं वटुः । कदाचिदिमां कथामन्तःपुरेभ्यः कथयेत् । भवतु । एनमेवं वक्ष्ये

क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः ।
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः ।।

(२. १८)

अत्र दुष्यन्तेन [1]स्वयमुक्तस्य शकुन्तलाप्रसङ्गस्य स्वयं प्रच्छादनं संवृतिः ।

अथ भ्रान्तिः—

भ्रान्तिर्विपर्ययज्ञानं प्रसङ्गस्य ह्यनिश्चयात् ।। ६० ।।

(ग-घ)

यथा वेणीसंहारे द्वितीयाङ्के (२. १० पद्यादनन्तरम्), भानुमती —तदो अहं तस्स अदिसइददिव्वरूविणो णउलस्स दंसणेण उच्छुआ जादा हिदहिअआ अ । तदो उज्झिअ तं आसनट्ठाणं लदामंडपं पविसिदुं आरद्धा । (ततोऽहं तस्यातिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता हृतहृदया च । ततः उज्झित्वा तदासनस्थानं लतामण्डपं प्रवेष्टुमारब्धा ।) राजा—(सवैलक्ष्यम्) किं नामातिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता । हृतहृदया च । तत् कथमनया पापया माद्रीसुतानुरक्तया वयमेवं विप्रलब्धाः । मूर्ख

[1] Rāghavabhaṭṭa quotes the definition of *saṃvṛti* from the *RAS*, and explains the illustration (*kva vayam*, etc.) in the same manner as was done by SBh.

दुर्योधन कुलटाविप्रलभ्यमानमात्मानं वहु मन्यमानोऽधुना किं वक्ष्यसि। (किं कण्ठे शिथिलीकृत इत्यादि पठित्वा दिशोऽवलोक्य) अहो एतदर्थमेवास्याः प्रातरेव विविक्तस्थानाभिलाषः सखीजनसंकथासु च पक्षपातः। दुर्योधनस्तु मोहादविज्ञातवन्धकीहृदयसारः क्वापि परिभ्रान्तः। –इत्यत्र देवीस्वप्नस्य अनिश्चयाद् दुर्योधनस्य विपरीत-ज्ञानं भ्रान्तिः।

अथ दूत्यम्–

दूत्यं तु सहकारित्वं दुर्घटे कार्यवस्तुनि।

(९१ क-ख)

यथा मालविकाग्निमित्रे (तृतीयाङ्के), विदूषकः–अलं भवदो धीरदं उज्झिअ परिदेविदेण। दिट्ठा खु मए तत्तहोदीए मालवि-आए पिअसही वउलावलिआ। सुणाविदाअ मह जं भवदा संदिट्ठं। (अलं भवतो धीरताम् उज्झित्वा परिदेवितेन। दृष्टा खलु मया तत्रभवत्या मालविकायाः प्रियसखी वकुलावलिका। श्राविता च मया यद् भवता संदिष्टम्। (३. १ पद्यादनन्तरम्) राजा–ततः किमुक्तवती। विदूषकः–विज्ञापय भट्टारकम् . . . तथापि घटयिष्यामि इति। अत्र च वकुलावलिकया मालविकाग्निमित्रयोर्घटने सहकारित्व-मङ्गीकृतमिति दूत्यम्।

अथ हेत्ववधारणम्–

निश्चयो हेतुनार्थस्य मतं हेत्ववधारणम्॥ ९१॥

(ग-घ)

यथा शाकुन्तले, राजा–

स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः।

प्रागन्तरिक्षगमनात्स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ।। (५. २२)

अत्र [1]परभृतानिदर्शनोपबृंहितेन स्त्रीत्वहेतुना मृषाभाषणलक्षण-स्यार्थस्य निश्चयो हेत्ववधारणम् ।

अथ स्वप्नः–

स्वप्नो निद्रान्तरे [2]मन्त्रभेदकृद्वचनं मतम् ।

(६२ क-ख)

यथा मालविकाग्निमित्रे (४. १५ पद्यादनन्तरम्), विदूषकः (उत्स्वप्नायते)–भोदि मालविए । (भवति मालविके ।) निपुणिका –सुदं भट्टिणीए । कस्स एसो अत्तणिओअसंपादणे विस्ससणिज्जो हदासो । सव्वकालं इदो एव्व सोत्थिवाअणमोदएहिं कुच्छिं पूरिअ संपदं मालविअं उस्सिविणावेदि । (श्रुतं भट्टिन्या । कस्यैष आत्म-नियोगसंपादने विश्वसनीयो हताशः । सर्वकालमित एव स्वस्ति-वाचनमोदकैः कुक्षिं पूरयित्वा सांप्रतं मालविकाम् उत्स्वप्नायते ।) विदूषकः–इरावदिं अदिक्कमंती होहि । (इरावतीमतिक्रामन्ती भव ।) इत्यत्र विदूषकस्योत्स्वप्नायितं स्वप्नः ।

अथ लेखः–

विवक्षितार्थकलिता पत्रिका लेख ईरितः ।। ६२ ।।

(ग-घ)

यथा विक्रमोर्वशीये (२. ११ पद्यादनन्तरम्), राजा (विभाव्य) –सखे भूर्जपत्रगतोऽयमक्षरविन्यासः ।–इत्यारभ्य, राजा–वयस्य

[1] Rāghavabhaṭṭa quotes the definition of *hetvavadhāraṇa* from the *RAS* and explains this verse (*strīṇām*, etc.), following SBh., to be the illustration of the *hetvavadhāraṇa*.

[2] Only *RAS*-1 reads: *mantu-*; others read: *mantra-*.

अङ्गुलिस्वेदेन दूष्येरन्नक्षराणि । धार्यतामयं प्रियायाः स्वहस्तलेखः ।
—इत्यत्र उर्वशीप्रहितपत्रिकार्थो लेखः ।

अथ मदः—

मदस्तु [1]मद्यजः (९३ क)

यथा मालविकाग्निमित्रे (३. १२ पद्यादनन्तरम्), (ततः प्रविशति युक्तमदा इरावती चेटी च)—इत्यत्रेरावतीमदः ।

अथ चित्रम्—

चित्रं चाकारस्य विलेखनम् । (९३ ख)

यथा शाकुन्तले, (६. १३ पद्यादनन्तरम्) राजा—अकारणपरित्यागानुशयतप्तहृदयस्तावदनुकम्प्यतामयं जनः पुनर्दर्शनेन । —इत्यारभ्य, राजा—

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥
(६. २१)

इत्यन्तेन चित्रं स्फुटम्, इति कल्याणम् ।

[2]भागकल्पनयाङ्गानां मुखप्रमुखसंधिषु ॥ ९३ ॥ (ग-घ)
प्रत्येकं [3]नियतत्वेन योज्या तत्रैव कल्पना ।
संध्यन्तराणां विज्ञेयः प्रयोगस्त्वविभागतः ॥ ९४ ॥

[1] See note 1 on p. 166.

[2] *RAS*-1 and MS. 4 read: *udbhāvakalpanāṅgānām*; *RAS*-2 and MSS. 5, 7, 8, 9 and 10 read: *bhāgakalpanayāṅgānām*; MS. 6 reads: *bhāgakaṃ vinayāṅgānām*!, obviously a mistake of the scribe, for *bhāgakalpanayā*, etc.

[3] See, in the Introduction, the topic on the *saṃdhiniyama*, and *kramaniyama* of the *saṃdhyaṅga-s*, etc.

तथैव दर्शनादेषामनैयत्येन संधिषु ।
तदेषामविचारेण कथितो [1]दशरूपके ।। ६५ ।।

संध्यन्तराणामङ्गेषु नान्तर्भावो मतो मम ।
सामाद्युपायदक्षेण संध्यादिगुणशोभिना ।। ६६ ।।

निर्व्यूढं सिंहभूपेन संध्यन्तरनिरूपणम् । (६७ क-ख)

अथ षट्त्रिंशद् [2]भूषणानि—

एवमङ्गैरुपाङ्गैश्च सुश्लिष्टं रूपकश्रियः ।। ६७ ।।
(ग-घ)

शरीरं वस्त्वलंकुर्यात् षट्त्रिंशद्भूषणैः स्फुटम् ।
भूषणाक्षरसंघातौ हेतुः प्राप्तिरुदाहृतिः ।। ६८ ।।

शोभा संशयदृष्टान्तावभिप्रायो निदर्शनम् ।
सिद्धिप्रसिद्धी दाक्षिण्यमर्थापत्तिर्विशेषणम् ।। ६९ ।।

पदोच्चयस्तुल्यतर्को विचारस्तद्विपर्ययः ।
गुणातिपातोऽतिशयो निरुक्तं गुणकीर्तनम् ।। १०० ।।

गर्हणानुनयो भ्रंशो [3]लेशक्षोभौ मनोरथः ।
अनुक्तसिद्धिः सारूप्यं माला मधुरभाषणम् ।। १०१ ।।

[1] See, in the Introduction, the topic *saṃdhiniyama*, etc. for a discussion on the position of the *saṃdhyantara-s*, etc.

[2] See *History of Lakṣaṇa-s*, in *Some concepts of the Alaṃkāraśāstra* Adyar, 1942. Siṃhabhūpāla follows the *anuṣṭup* list of the *Lakṣaṇa-s*, which are called the *bhūṣaṇa-s* by him. Abhinava comments on *upajāti* list.

[3] *RAS*-1 and MS. 4 read: *lekha*; *RAS*-2 and MSS. 5, 6, 7, 8, 9 and 10 read: *leśa*; see also fn. 2, p. 383.

पृच्छोपदिष्टदृष्टानि षट्त्रिंशद् भूषणानि हि ।
(१०२ क-ख)

तत्र भूषणम्–

गुणालंकारबहुलं भाषणं भूषणं मतम् ।। १०२ ।।
(ग-घ)

यथा [1]रामानन्दे–

खं [2]वस्ते [3]कलविङ्ककण्ठमलिनं कादम्बिनी [4]कम्बल
चर्चां [5]पारयतीव दर्दुरकुलं कोलाहलैरुन्मदम् ।
गन्धं मुञ्चति [6]सिक्तलाजसुरभिर्वर्षेण [7]सिक्ता स्थली
[8]दुर्लक्षोऽपि विभाव्यते [9]कमलिनीहासेन भासां पतिः ।।

[1] See *Some Old lost Rama plays*, by V. Raghavan (Annamalai University, 1961). See also fn. 1, p. 378.

[2] The verse *khaṃ vaste*, etc. is quoted anonymously in Rājaśekhara's *Kāvyamīmāṃsā* (p. 109) and in the *SKĀ* (p. 620). There are some differences in the reading of some expressions.

[3] *RAS*-2 and MS. 5 read:—*kaṇṭhamalinī* . . . ; *RAS*-1 and MS. 4 read: . . .-*kaṇṭhamalinam.*

[4] MS 4 reads: -*kandalam* (for *kambalam*); *RAS*-2 and MS. 5 read: *śambalam*. The reading in *RAS*-1, *KM* and *SKĀ* is: *kambalam.*

[5] *RAS*-1 reads: *varṇayatīva*; MS. 4 is not clear (looks like: *vasyābhaṃ nayatīva*) and a question mark is also noted. *RAS*-2, MS. 5, the *KM* and *SKĀ* read: *pārayatīva.*

[6] Only MS. 5 reads: *surabhim.*

[7] *KM* and *SKĀ* read: *dagdhā* (for *siktā* of the MSS. of the *RAS*).

[8] *KM* and *SKĀ* read: *durlakṣyo'pi*; MSS. of the *RAS* read: *durlakṣo'pi.*

[9] *RAS*-1 and MS. 4 read:-*hāse ca*; *RAS*-2 and MS. 5 (also *KM* & *SKĀ*) read: *hāsena.*

अत्र श्लेषप्रसादसमाधिसमतादीनां गुणानाम् [1]उपमारूपकोत्प्रेक्षा-हेतूनाम् अलंकाराणां च संभवादिदं भूषणम् ।

अथाक्षरसंघातः–

वाक्यमक्षरसंघातो भिन्नार्थं श्लिष्टवर्णकम् ।

(१०३ क-ख)

यथा शाकुन्तले (७. २० पद्यादनन्तरम्), राजा (स्वगतम्)–इयं खलु कथा मामेव लक्ष्यीकरोति । यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि । अथवा अन्याय्यः परदारव्यवहारः । इत्युपक्रम्य–(प्रविश्य मृन्मयूरहस्ता) तापसी–सव्वदमण । सउंदलावण्णं पेक्ख । (सर्वदमन । शकुन्तलावण्यं प्रेक्षस्व ।) बालः (सदृष्टिक्षेपम्)–कहिं वा मे अज्जू । (कुत्र वा मम माता ।) उभे–णामसारिस्सेण वंचिदो माउवच्छलो । (नामसादृश्येन वञ्चितो मातृवत्सलः ।) द्वितीया–वच्छ इमस्स मित्तिआमोरस्स रंमत्तणं देक्ख त्ति भणिदोऽसि । (वत्स अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि ।) राजा (आत्मगतम्) –किं वा शकुन्तलेत्यस्य मातुराख्या–इत्यन्तम् । अत्र शकुन्तलावण्य-मित्यत्र शकुन्तला-नामाक्षराणां प्रतिभानादयमक्षरसंघातः ।

अथ हेतुः–

स हेतुरिति निर्दिष्टो यः साध्यार्थप्रसाधकः ।। १०३ ।।

(ग-घ)

यथा रत्नावल्याम्, राजा (तथा कृत्वा श्रुत्वा च)–

स्पष्टाक्षरमिदं यत्नान्मधुरं स्त्रीस्वभावतः ।
अल्पाङ्गत्वादनिर्ह्रादि मन्ये वदति शारिका ।। (२. ६)

[1] *RAS*-2 and MS. 5 read: *hetūpamānānām*. Bhoja in his *SKĀ* commenting on this says that this verse contains *rūpakopamā*, *hetūpamā*, and *utprekṣopamā—ubhayālaṃkāra-s*.

अत्र शारिकालापसाधनाय यत्नस्पष्टाक्षरत्वादिहेतूनां कथनादयं हेतुः ।

अथ [1]प्राप्तिः–

एकदेशपरिज्ञानात् प्राप्तिः शेषाभियोजनम् ।

(१०४ क-ख)

यथा विक्रमोर्वशीये, राजा (चर्चरिकयापसृत्य अञ्जलिं वद्ध्वा)–

हंस प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता ।
विभावितैकदेशेन देयं यदभियुज्यते ।। (४. ३३)

अत्र हंसे प्रियागमनमात्रविभाव्यप्रियाहरणाभियोगः प्राप्तिः ।

अथोदाहरणम्–

वाक्यं यद् गूढतुल्यार्थं तदुदाहरणं मतम् ।। १०४ ।।

(ग-घ)

यथा शाकुन्तले, राजा (स्वगतम्)–कथमात्मापहारं करोमि । भवतु । एवं तावदेनां वक्ष्ये । (प्रकाशम्) भवति यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः ।–इत्यारभ्य, शकुन्तला–तुम्हे अवेध । किं वि हिअए करिअ मन्तेध । ण वो वअणं सुणिस्सं । (युवामपेतम् । किमपि हृदये कृत्वा मन्त्रयेथे । न युवयोर्वचनं श्रोष्यामि । –इत्यन्तम् (१.२१ पद्यादनन्तरम्) । अत्र साभिप्रायगूढार्थतया [2]तदिदमुदाहरणम् ।

[1] The portion dealing with *prāpti* is missing in *RAS*-2 and MS. 5.

[2] See the *Bhāvaprakāśa*, page 225 (10). Rāghavabhaṭṭa quotes the definition of *udāharaṇa* from the *RAS* and explains this portion (i.e. the one cited here) as the illustration thereof. Siṃhabhūpāla follows the *anuṣṭubh* list of the *Lakṣaṇa-s*, which are called by him the *bhūṣaṇa-s*.

अथ शोभा–

शोभा प्रभावप्राकट्यं यूनोरन्योन्यमुच्यते । (१०५ क-ख)

यथा रत्नावल्याम्, सागरिका (राजानं दृष्ट्वा सहर्षं ससाध्वसं सकम्पं च स्वगतम्)–एणं पेक्खिअ अदिसद्धसेण ण सक्कणोमि पदादो पदं वि गन्तुं । ता किं वा एत्थ करिस्सं । (एनं प्रेक्ष्य अतिसाध्वसेन न शक्नोमि पदात् पदमपि गन्तुम् । तत् किं वा अत्र करिष्यामि ।) विदूषकः (सागरिकां दृष्ट्वा)–अहो [1]अच्चरिअं । ईरिसं कण्णारअणं माणुसलोए ण दीसदि । भो वअस्स तह तक्केमि पआवइणोवि एदं णिम्माविअ पुणो पुणो विह्मओ संवुत्तो त्ति । (अहो आश्चर्यम् । ईदृशं कन्यारत्नं मानुषलोके न दृश्यते । भो वयस्य तस्मात् तर्कयामि प्रजापतेरपि इदं निर्माय पुनः पुनर्विस्मयः संवृत्तः इति ।) राजा–सखे ममाप्येतदेव मनसि वर्तते (२.१५ पद्यात् पूर्वम्) इत्यदिना सागरिका-वत्सराजयोरन्योन्यनिर्वर्णनेन रूपातिशयप्रकटनं शोभा ।

अथ संशयः–

अनिश्चयान्तं यद् वाक्यं संशयः स निगद्यते ।। १०५ ।। (ग-घ)

यथा मालतीमाधवे, मकरन्दः–

याता भवेद् भगवतीभवनं सखी नो
जीवन्त्यथैष्यति न वेत्यभिशङ्कितोऽस्मि ।
प्रायेण बान्धवसुहृत्प्रियसंगमादि
सौदामिनीस्फुरणचञ्चलमेव सौख्यम् ।। (८. १४)

[1] In the printed edn. of the *Ratnāvalī* available to me, the sentence *aho accariam*, etc. is given as the statement of the *vidūṣaka*; *RAS*-1, *RAS*-2 and MSS. 4 & 5 give it as of Sāgarikā, and read as: *īrisā avi māṇusā loe dissaṃti* (*īdṛśā api mānuṣā loke dṛśyante*).

इत्यत्र मालती कामन्दक्याः गृहं गता वा जीवति वा न वेति संशयेन वाक्यसमाप्तेरयं संशयः ।

अथ दृष्टान्तः—

[1]**सपक्षे दर्शनं हेतोर्दृष्टान्तः साध्यसिद्धये ।** (१०६ क-ख)

यथा शाकुन्तले, राजा—

शमप्रधानेषु तपोधनेषु
गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला इव सूर्यकान्ता-
स्तदन्यतेजोऽभिभवाद् वमन्ति ॥ (२. ७)

इत्यत्र तपोधनेषु गूढदाहात्मकतेजःसद्भावे साध्ये तत्साधकस्य अन्यतेजस्तिरस्कारजनिततेजःसमुद्गाररूपस्य हेतोः सूर्यकान्तेषु दर्शितत्वाद् दृष्टान्तः ।

अथाभिप्रायः—

[2]**अभिप्रायस्त्वभूतार्थो हृद्यः साम्येन कल्पितः ॥ १०६ ॥** (ग-घ)

[1] MS. 4 reads: *saṃkṣepadarśanam.* All others read: *sapakṣe darśanam*, etc. The *Bhāvaprakāśa* says: . . . *dṛṣṭāntaḥ sāmyakīrtanam* (p. 224).

[2] This *abhiprāya* is not found in the *Upajāti* list of the *Lakṣaṇa-s* of the *NŚ*, which was commented on by Abhinava. Siṃhabhūpāla follows the other recension, the list given in the *Anuṣṭubh* metre. See *NŚ*, Vol. II, page 353, which reads: *abhūtapūrvo yo hy arthaḥ sāmyena parikalpitaḥ, lokasya hṛdayagrāhī so'bhiprāya iti smṛtaḥ. RAS*-1 reads: *abhiprāyastv abhūtārtho*, etc.; *RAS*-2 and MSS. 4, 5, 6, 7, 8, 9 and 10 read: *abhiprāyaḥ sabhūtārtho*, etc. Regarding the difference in the readings, Abhinava notes thus: *tathā ca*

अभिप्रायं परे प्राहुर्ममतां हृद्यवस्तुनि । (१०७ क-ख)

यथा रत्नावल्याम्, राजा—

किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते
दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे ॥
(३. १३)

इत्यत्र चन्द्रसाम्येन मुखे अमृतकल्पनादयमभिप्रायः । अथवा तत्रैवातिहृद्यबिम्बाधरे राज्ञो ममत्वमभिप्रायः ।

अथ निदर्शनम्—

यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्तनम् ॥ १०७ ॥
(ग-घ)

परापेक्षाव्युदासार्थं[1] तन्निदर्शनमुच्यते । (१०८ क-ख)

यथा शाकुन्तले, राजा—उपपद्यते

मानुषीषु कथं वा स्यादस्य रूपस्य संभवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ (१. २२)

matāntareṇa bharatamunir eva anyathāpy uddeśalakṣaṇena nāmāntarair api ca vyavahāraṃ karoti: tata eva pustakeṣu bhedo dṛśyate, taṃ ca darśayiṣyāmaḥ: paṭhitoddeśakramas tv asmadupādhyāyaparamparāgataḥ (Vol. II, p. 298). Abhinava is also said to have written a commentary on the *Kāvyakautuka* of his teacher, Bhaṭṭa Tauta.

[1] This *nidarśana* is not found in the *Upajāti* list, but found in the *Anuṣṭubh* list (II, page 354). *RAS*-1 and MS. 4 read: *paropekṣā*, etc.; MSS. 8, 9 and 10 read: *parākṣepa*, etc. *RAS*-2 and MSS. 5, 6 & 7 read: *parāpekṣā*, etc. The *NŚ* also seems to have the different readings.

अत्र [1]प्रतिवस्तुन्यायेन सदृशवस्तुकीर्तनं निदर्शनम् ।

अथ सिद्धिः—

अतर्कितोपपन्नः स्यात् सिद्धिरिष्टार्थसंगमः ।। १०८ ।।
(ग-घ)

यथा मालविकाग्निमित्रे, विदूषकः—(दृष्ट्वा) ही ही वअस्स एदं खु सीहुपाणुव्वेजिदस्स मच्छंडिआ उवणदा । (आश्चर्यम् आश्चर्यं वयस्य एतत् खलु सीधुपानोद्वेजितस्य [2]मत्स्यण्डिका उपनता ।) राजा—अये किमेतत् । विदूषकः—एसा णादिपरिक्खिदवेसा उम्सुअवअणा एआइणी मालविआ अदूरे वट्टदि । (एषा नातिपरिष्कृतवेषा उत्सुकवदना एकाकिनी मालविका अदूरे वर्तते ।) राजा (सहर्षम्)—कथं मालविका । विदूषकः—अह इं । (अथ किम्) । राजा—शक्यमिदानीं जीवितम् अवलम्बितुम् । (३. ५-पद्यादनन्तरम्)—इत्यत्र इरावतीसंकेतं गच्छतो राज्ञः मालविकादर्शनसिद्धिरचिन्तिता सिद्धिः ।

अथ प्रसिद्धिः—

[3]**प्रसिद्धिर्लोकविख्यातैर्वाक्यैरर्थप्रसाधनम्** । (१०९ क-ख)

यथा शाकुन्तले, राजा—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।

[1] *RAS*-1 and MS. 4 read: *prativastunyāyena*; *RAS*-2 and MSS. 5 & 6 read: *vastuprativastunyāyena*. Rāghavabhaṭṭa as usual quotes from the *RAS* the definition of *nidarśana*, and includes this verse as the illustration thereof.

[2] Kāṭayavema comments: *matsyaṇḍikā nāma śarkarāviśeṣaḥ.*

[3] This *prasiddhi* is not found in the *Upajāti* list, but found in the *Anuṣṭubh* list. See *NŚ*, II, page 360.

इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।।
(१. १७)

अत्र [1]शैवलाद्यनुवेधेऽपि रमणीयतया प्रसिद्धानां सरसिजादीनां कथनेन शकुन्तलामनोज्ञतासाधनं प्रसिद्धिः ।

अथ दाक्षिण्यम्—

चित्तानुवर्तनं यत्र तद् दाक्षिण्यमितीरितम् ।। १०६ ।।
(ग-घ)

यथा शाकुन्तले, सेनापतिः—जयतु स्वामी । राजा—भद्र सेनापते मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माढव्येन । सेनापतिः—(विदूषकं प्रति—जनान्तिकम्) सखे स्थिरप्रतिबन्धो भव । अहं तावत् स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये । (प्रकाशम्) प्रलपत्वेष वैधेयः । ननु प्रभुरेव निदर्शनम् ।

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ।।
(२. ५)

इत्यत्र सेनापतेः राजचित्तानुवर्तनं दाक्षिण्यम् ।

अथार्थापत्तिः—

उक्तार्थानुपपत्त्यान्यो यस्मिन्नर्थः प्रकल्प्यते ।
वाक्यमाधुर्यसंयुक्ता सार्थापत्तिरुदाहृता ।। ११० ।।

[1] Rāghavabhaṭṭa quotes the *RAS*, and cites the verse *sarasijam*, etc. as the example of *prasiddhi*.

यथा रत्नावल्याम्, विदूषकः–भोः एसा क्खु तुए अपुव्वा सिरी समासादिदा । (भोः एषा खलु त्वया अपूर्वा श्रीः समासादिता ।) राजा–वयस्य सत्यम् ।

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः ।
कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवः ।। (२. १७)

अत्र स्वेदच्छद्मामृतद्रवोत्पत्तेरन्यथानुपपत्त्या पाणेः [1]पारिजातत्व-कल्पनादियमर्थापत्तिः ।

अथ विशेषणम्–

सिद्धान् बहून् प्रधानार्थानुक्त्वा यत्र प्रयुज्यते ।
विशेषयुक्तं वचनं विज्ञेयं तद् विशेषणम्[2] ।। १११ ।।

यथा मालतीमाधवे, माधवः–(अभिलिख्य प्रदर्शयति) । मकरन्दः (सकौतुकम्)–कथमचिरेणैव निर्माय लिखितः श्लोकः । (वाचयति)

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।
मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः ।।
(१. ३९)

इत्यत्र इन्दुकलादीन् मनोमदहेतुतया प्रसिद्धानुक्त्वा तत्समान-माधुर्यायामपि मालत्यां विशेषकथनादिदं विशेषणम् ।

[1] *RAS*-1 and MS. 4 read: *pārijātapallavakathanād*; *RAS*-2 and MSS. 5 & 6 read: *pāṇeḥ pārijātatvakalpanād*.

[2] This *viśeṣaṇa* is not found in the *Upajāti* list but found in the *Anuṣṭubh* list. See *NŚ*, II, page 355.

अथ पदोच्चयः—

बहूनां तु प्रयुक्तानां पदानां बहुभिः पदैः ।
उच्चयः सदृशार्थो यः स विज्ञेयः पदोच्चयः[1] ।। ११२ ।।

यथा कर्पूरमञ्जर्याम्, राजा (वाचयति)–

सह दिवसणिसाहिं दीहरा सासदंडा
सह मणिवलएहिं बाहधारा गलंति ।
तुह सुहअ विओए तीअ उब्बेअणीए[2]
सहअ तणुलदाए दुब्बला जीविदासा ।। (२. ९)

(छाया– सह दिवसनिशाभ्यां दीर्घाः श्वासदण्डाः
सह मणिवलयैर्बाष्पधारा गलन्ति ।
तव सुभग वियोगे तस्या उद्वेगिन्याः
सह च तनुलतया दुर्बला जीविताशा ।।)

इत्यत्र श्वासदण्डादीनां दीर्घभावादिक्रियासु दिवसनिशादिभिः सह समावेशाद् अयं पदोच्चयः ।

अथ तुल्यतर्कः–

रूपकैरुपमाभिर्वा तुल्यार्थाभिः प्रयोजितः ।
[3]अप्रत्यक्षार्थसंस्पर्शस्तुल्यतर्क इतीरितः ।। ११३ ।।

[1] This *padoccaya* is found in both the lists; see II, pages 308 and 356.

[2] *RAS*-1 and MS. 4 read: *utimmiriē* (*uttāmyantyāḥ*); *RAS*-2 reads: *ubbīṇie* (*udveginyāḥ*); MS. 5 is not clear; MS. 6 seems to read: *ediṅdiriē*?

[3] This *tulyatarka* is not found in the *Upajāti* list, but found in the *Anuṣṭubh* list; ibid., page 356.

यथा मालतीमाधवे, माधवः (सहर्षम्)—दिष्ट्या लवङ्गिकाद्वितीया मालत्यपि (परागता)

आश्चर्यमुत्पलदृशो वदनामलेन्दु-
सांनिध्यतो मम मुहुर्जडिमानमेत्य ।
जात्येन चन्द्रमणिनेव महीधरस्य
संधार्यते द्रवमयो मनसा विकारः ।। (३. ५)

इत्यत्र इन्दुचन्द्रकान्ताद्युपमया अप्रत्यक्षस्य स्नेहरूपविकारस्य कथनात् तुल्यतर्कः ।।

अथ विचारः—

विचारस्त्वेकसाध्यस्य बहूपायोपवर्णनम् । (११४ क-ख)

यथा मालतीमाधवे, मकरन्दः—वयस्य माधव सर्वथा समाश्वसिहि—

या कौमुदी नयनयोर्भवतः सुजन्मा
तस्या भवानपि मनोरथलब्धबन्धुः ।
तत् संगमं प्रति सखे न हि संशयोऽस्ति
यस्मिन् विधिश्च मदनश्च कृताभियोगः ।।
(१. ३७)

अत्र संगमरूपसाध्यार्थसिद्धये परस्परानुरागसिद्धिमदनरूपाणामुपायानां सद्भावकथनाद् विचारः ।

अथ तद्विपर्ययः—

विचारस्यान्यथाभावो विज्ञेयस्तद्विपर्ययः ।। ११४ ।।
(ग-घ)

यथा [1]रामानन्दे–

व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं[2] कपीनामपि[3]
प्रज्ञा जाम्बवतोऽपि यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषयस्तत्र[4] प्रिया क्वापि मे ।।

अत्र बहूपायसामर्थ्याभावकथनाद् विचारविपर्ययः स्पष्ट एव ।

अथ [5]गुणातिपातः–

गुणातिपातो[6] व्यत्यस्तगुणाख्यानमुदाहृतम् ।

(११५ क-ख)

[1] See fn. 1, p. 367. See *Some Old lost Rama Plays*, pp. 82-87.

[2] Prof. V. Raghavan quotes this verse from the *Rāmānanda* (*vyartham yatra*, etc.) and says that the reading (in the latter part of the first foot) in the *RAS* is: *vyartham kapīnām api*, which is said again by him (in the footnote on page 83 of *Some Old Rama Plays*) to be an incorrect one. But the *RAS*-1, *RAS*-2, MSS. 4, 5 and 6—all these read: (only) *vīryaṃ kapīnām api*, which is of course correct in the context.

[3] *SKĀ* reads: *kleśaḥ kapīnāṃ vṛthā*: (*vīryaṃ harīṇāṃ vṛthā* is given in the footnote.) Prof. Raghavan seems to prefer (because it is in *SKĀ*) *vṛthā* to *api*. But *RAS*-1, *RAS*-2 and MSS. 4, 5 & 6 read: *api* at the end of the first foot also, and this seems to agree with the style of the writer, as he repeats it 4 times again using it in the reference to every *upāya* noted in the verse. Thus the reading of the *RAS* seems to be better than that of the *SKĀ*.

[4] *RAS*-2 and MSS. 4, 5 & 6 read: *aviṣayaḥ*; *RAS*-1 alone reads: *aviṣaye*.

[5] *vicāra*, *tadviparyaya* and *guṇātipāta* are not found in the *Upajāti* list, but found in the *Anuṣṭubh* list.

[6] *RAS*-1 reads: *guṇābhipātam anyatra*(?); MS. 4 reads: *guṇābhighātam anyatra*. All others read: *guṇātipāto vyatyasta*, etc.

यथा वेणीसंहारे, (ततः प्रविशतो भीमार्जुनौ) भीमः—भो भो अलमलमाशङ्कया ।

कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी
कृष्णाकेशोत्तरीयव्यपनयनमरुत् पाण्डवा यस्य दासाः ।
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं
क्वास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्वः ।।
(५. २६)

अत्र [1]अधिक्षेपवाक्यत्वाद् व्यत्यस्तगुणाख्यानं स्पष्टमेव ।

अथातिशयः—

बहून् गुणान् कीर्तयित्वा सामान्यजनसंश्रयान् ।।११५।।
(ग-घ)

विशेषः कीर्त्यते यत्र ज्ञेयः सोऽतिशयो बुधैः ।
(११६ क-ख)

यथा विक्रमोर्वशीये, राजा (सहर्षमाकर्ण्य)— अनेन प्रियोपलब्धिशंसिना मन्द्रकण्ठगर्जितेन समाश्वासितोऽस्मि । साधर्म्याच्च भूयसी मे त्वयि प्रीतिः ।

मामाहुः पृथिवीभृतामधिपतिं नागाधिराजो भवान्
अव्युच्छिन्नपृथुप्रवृत्ति भवतो दानं ममाप्यर्थिषु ।
स्त्रीरत्नेषु ममोर्वशी प्रियतमा यूथे तवेयं वशा
सर्वं मामनु ते प्रियाविरहजां त्वं तु व्यथां मानुभूः ।।
(४. ४७)

[1] Only *RAS*-1 reads: *yudhi kṣepa*, etc., and *nyastaśastraguṇākhyānam*; *RAS*-2 and MSS. 4, 5 & 6 read as given in the text.

इत्यत्र [1]समानधर्मणि गजाधिराजे पुरूरवसा प्रियाविरहाभाव-कथनादतिशयः ।

अथ निरुक्तम्—

निरुक्तिर्निरवद्योक्ति[2]र्नामन्यर्थप्रसिद्धये[3] ।। ११६ ।।

(ग-घ)

यथा शाकुन्तले, प्रियंवदा—हला सउंदले एत्थ एव्व दाव मुहुत्तअं चिट्ठ । जाव तुए उवगदाए लदासणाहो विअ अअं केसररुक्खओ पडिभादि । (हला शकुन्तले अत्रैव तावन्मुहूर्तं तिष्ठ । यावत् त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति ।) शकुन्तला —अदो खु पिअंवदासि तुमं । (अतः खलु प्रियंवदासि त्वम् ।)—(१. १८ पद्यात् पूर्वम्) । अत्र प्रियंवदायाः प्रियभाषणादिदं नामधेय-मित्युक्तिर्निरुक्तिः ।

अथ गुणकीर्तनम्—

लोके गुणातिरिक्तानां [4]बहूनां यत्र नामभिः ।
एकोऽपि [5]शब्द्यते तत्तु विज्ञेयं गुणकीर्तनम् ।। ११७ ।।

[1] *RAS*-1 and MS. 4 read: *svadharmānudharmaṇi*; *RAS*-2 and MS. 5 read: *samānadharmaṇi*; MS. 6 reads: *samānadharmāṇām.*

[2] *RAS*-2 and MSS. 5 & 6 read: *anavadyoktiḥ*; *RAS*-1 and MS. 4 read: *niravadyoktiḥ.*

[3] *RAS*-1 and MS. 4 read: *nāmātyartha*, etc.; *RAS*-2 and MSS. 5 & 6 read: *nāmādyartha*, etc. MSS. 7, 8, 9 and 10 read: *nāmany atra*, etc. Rāghavabhaṭṭa's quotation from the *RAS* has the reading as: *nāmany arthaprasiddhaye.*

[4] Only *RAS*-2 and MS. 5 read: *vastūnām* (for *bahūnām*). In MS. 6 some syllables are missing here; others read: *bahūnām.*

[5] MS. 7 reads: *eko viśiṣyate*; MSS. 8 & 9 read: *eko'pi śiṣyate*; MS. 10 reads: *eko'pi śakṣyate*; *RAS*-1, *RAS*-2 and MSS. 4, 5 & 6 read: *eko'pi śabdyate.* See *NŚ*, Vol. II, page 363.

यथा उत्तररामचरिते, वासन्ती–

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव–शान्तमथवा किमिहोत्तरेण ।। (३. २६)

इत्यत्र अमृतकौमुदीप्रभृतिनामभिः सीताशंसनं गुणकीर्तनम् ।

अथ गर्हणम्[1]–

यत्र संकीर्तयन् दोषान् गुणमर्थेन दर्शयेत् ।
गुणान् वा कीर्तयन् दोषान् दर्शयेद् गर्हणं तु तत् ।।११८।।

यथा मालतीमाधवे, लवङ्गिका––भअवदि किसणचउद्दसीरअणिमहामसाणसंचारणिब्बडिअविसमव्ववसाओ णिट्ठाविदचण्डपासण्डुद्दण्डभुअदण्डसाहसो साहसिओक्खु एसो । अदो क्खु मे पिअसही उक्कंपिदा । (भगवति कृष्णचतुर्दशीरजनीमहाश्मशानसंचारपृथग्भूतविषमव्यवसायो निष्ठापितचण्डपाषण्डोद्दण्डभुजदण्डसाहसः साहसिकः खल्वेषः । अतः खलु मे प्रियसखी उत्कम्पिता ।) मकरन्दः[2] (स्वगतम्)––साधु लवङ्गिके साधु । स्थाने खल्वनुरागोपकारयोर्गरीयसोरुपन्यासः । (६.१५ पद्यादनन्तरम्)–इत्यत्र महामांसविक्रयसाहसस्य दोषरूपेण कथनेऽपि माधवानुरागोत्पादनगुणतया पर्यवसितमिदं प्रमुखगर्हणत्वाद्[3] गर्हणम् ।

[1] See *NS*, Vol. II, page 359.

[2] Printed edition reads: *kāmandakī (svagatam)* (for *makarandaḥ (svagatam)––*)

[3] *RAS*-1 and MS. 4 read: *guṇagarhaṇatvāt*; *RAS*-2 and MSS. 5 & 6 read: *pramukhagarhaṇatvāt*.

गुणकीर्तने दोषपर्यवसानं यथा मालतीमाधवे, मदयन्तिका (तथा कृत्वा)–दुम्मणाअदि वा इअं वामसीला। (दुर्मनायते वा इयं वामशीला।) लवङ्गिका–कहं णाम णववहूविस्संभणोवा-अजाणअं लडहं विअड्ढमहुरभासणं अरोसणं अकादरं दे भादरं भत्तारं समासादिअ दुम्मणाइस्सदि मे पिअसही। (कथं नाम नव-वधूविस्रम्भणोपायज्ञं लटहं विदग्धमधुरभाषणमरोषणम् अकातरं ते भ्रातरं भर्तारं समासाद्य दुर्मनायिष्यते मे प्रियसखी।) मदयन्तिका–पेक्ख बुद्धरक्खिदे। विप्पदीवं उवालम्भीआमो। (पश्य बुद्धरक्षिते विप्रतीपमुपालभ्यामहे।)–(सप्तमाङ्के उपक्रमे) इत्यत्र मुखतो गुण-कीर्तनमप्यन्ततो दोषायेति गर्हणमिदम्।

अथानुनयः[1]–

अभ्यर्थनापरं वाक्यं विज्ञेयोऽनुनयो बुधैः। (११६ क-ख)

यथा वेणीसंहारे, धृतराष्ट्रः– संजय मद्वचनाद् ब्रूहि भारद्वाज-मश्वत्थामानम्—

स्मरति न भवान् पीतं स्तन्यं विभज्य सहामुना
मम च मृदितं क्षौमं बाल्ये त्वदङ्गविवर्तनैः।
अनुजनिधनस्फीताच्छोकादतिप्रणयाच्च यद्
वचनविकृतिष्वस्य क्रोधो मुधा क्रियते त्वया॥

(५. ४१)

इत्यत्र अश्वत्थामप्रार्थनमनुनयः।

अथ भ्रंशः[1]–

पतनं प्रकृतादर्थादन्यस्मिन् भ्रंश ईरितः॥ ११६॥ (ग-घ)

[1] *anunaya* and *bhraṃśa* are not found in the *Upajāti* list, but are found in the *Anuṣṭubh* list. *NŚ* II, pp. 357-358.

यथा प्रसन्नराघवे, [1]रावणः (संवृतनिजरूपः पुरुषरूपेण प्रविष्टः) –कथय क्व तावत् कर्णान्तिनिवेशनीयगुणं कन्यारत्नं कार्मुकं च । मञ्जीरकः–इदं तावत् कार्मुकम् । कन्या तु चरमं लोचनपथमवतरिष्यति । रावणः[1] (ससंरम्भम्)–धिङ् मूर्ख । कथं रे राशिनक्षत्र–पाठकानां गोष्ठीं न दृष्टवानसि । तेऽपि कन्यामेव प्रथमं प्रकटयन्ति । चरमं धनुः । मञ्जीरकः (स्वगतम्)–कथमयं वाचाटतामेव प्रकटयति । (१.३२ पद्यादनन्तरम् ११ पुटे)–इत्यत्र रावणेन (पुरुषरूपेण प्रविष्टेन) धनुःकन्ययोः प्रकृतमर्थं परित्यज्य राशिलक्षणस्यार्थस्य प्रसञ्जनादयं भ्रंशः ।

अथ लेशः–

लेशः [2]स्यादिङ्गितज्ञानकृद्[3] विशेषणवद् वचः ।

(१२० क-ख)

यथा मालतीमाधवे, कामन्दकी–

असौ विद्याशाभिः शिशुरपि विनिर्गत्य भवनाद्
इहायातः संप्रत्यविकलशरच्चन्द्रमधुरः ।
यदालोकस्थाने भवति पुरमुन्मादतरलैः
कटाक्षैर्नारीणां कुवलयितवातायनमिव ।। (२. ११)

इत्यत्र कामन्दक्या मालत्यनुरागज्ञाननिवेदनस्य उन्मादतरलैरिति विशेषणस्य कथनादयं लेशः ।

[1] The printed edn. (NSP) reads: *puruṣaḥ*, instead of *rāvaṇaḥ*. The MSS. of the *RAS* read *rāvaṇaḥ*.

[2] *leśa* is found in the *Anuṣṭubh* list; *NŚ* Vol. II, p. 362. *RAS*-1 and MS. 4 read: *lekhaḥ syād iṅgitākāravad*, etc.; others read: *leśaḥ syād iṅgitajñānakṛd*, etc.; see also fn. 3, p. 366.

[3] For the significance of the term *iṅgita*, the *RAS* has this: *iṅgitāni tu pakṣmabhrūtārakādṛṣṭivikriyāḥ* (II. 28).

अथ क्षोभः—

[1]क्षोभस्त्वन्यगते हेतावन्यस्मिन् कार्यकल्पनम् ॥१२०॥
(ग-घ)

यथा रत्नावल्याम्, राजा (उपसृत्य उद्बन्धनमपनीय)—देवि किमिदम् अकार्यं क्रियते ।

मम कण्ठगताः प्राणाः पाशे कण्ठगते तव ।
[2]अनर्थार्थप्रयत्नोऽयं त्यज्यतां साहसं प्रिये ॥ (३.१६)

अत्र पाशे वासवदत्ताकण्ठगते तत्कार्यभूतस्य प्राणानां कण्ठगतत्वस्य वत्सराजेन स्वस्मिन् कल्पनात् क्षोभः ।

अथ मनोरथः—

मनोरथस्तु व्याजेन विवक्षितनिवेदनम् । (१२१ क-ख)

यथा शाकुन्तले, शकुन्तला (पदान्तरं गत्वा परिवृत्य प्रकाशम्)— लदावल्लअ संदावहारअ आमंतेमि तुमं भूओवि परिभोअस्स ।) (लतावलय संतापहारक आमन्त्रये त्वां भूयोऽपि परिभोगाय ।) (३. २१ पद्यादनन्तरम्) । अत्र लतामण्डपव्याजेन दुष्यन्तामन्त्रणं मनोरथः[3] ।

अथानुक्तसिद्धिः—

प्रस्तावेनैव शेषोऽर्थो यत्रानुक्तोऽपि गृह्यते ॥ १२१ ॥
(ग-घ)

[1] *kṣobha* is found in the *Anuṣṭubh* list. ibid. Vol. II, page 363.

[2] The printed edn. of the *Ratnāvalī*, available to me, reads: *ataḥ svārthaḥ prayatno'yam*; MSS. of the *RAS* read: *anarthārtha*, etc.

[3] Rāghavabhaṭṭa quotes from the *RAS* the definition of *manoratha*, and explains Śakunatalā's taking leave as the example thereof.

अनुक्तसिद्धिरेषा स्यादित्याह [1]भरतो मुनिः ।

(१२२ क-ख)

यथा शाकुन्तले, अनसूया–सुणादु अज्जो। गोदमीतीरे पुरा किल तस्स राएसिणो उग्गे तपसि वट्टमाणस्स किंवि जादसंकेहिं देवेहिं मेणआ णाम अच्छरा पेसिदा णिअमविग्घकालिणी । (शृणोत्वार्यः । गौतमीतीरे पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य किमपि जातशङ्कैर्देवैर्मेनका नाम अप्सराः प्रेषिता नियमविघ्नकारिणी ।) राजा–अस्त्येतदन्य-समाधिभीरुत्वं देवानाम् । ततस्ततः । अनसूया–तदो वसंतोदार-रमणीए समए से उम्मादइत्थअं रूवं पेक्खिअ–(ततो वसन्तोदार-रमणीये समये तस्याः उन्मादयितृकं रूपं प्रेक्ष्य (इत्यर्धोक्ते लज्जया विरमति) । राजा–भवतु । परस्ताज्ज्ञायत एव । सर्वथा अप्सरः-संभवैषा । (१.२२ पद्यात् पूर्वम्)

इत्यत्र अनुक्तस्यापि मेनकाविश्वामित्रसंगमस्य प्रतीतेरिय-मनुक्तसिद्धिः ।

अथ सारूप्यम्–

दृष्टश्रुतानुभूतार्थकथनादिसमुद्भवम् ।। १२२ ।।

(ग-घ)

सादृश्यं यत्र संक्षोभात् तत् [2]सारूप्यं निरूप्यते ।

(१२३ क-ख)

यथा वेणीसंहारे, (प्रविश्य गदापाणिः) भीमः–तिष्ठ तिष्ठ भीरु । क्वाधुना गम्यते । (इति केशेषु ग्रहीतुमिच्छति) युधिष्ठिरः–(बलाद् भीममालिङ्ग्य) दुरात्मन् भीमार्जुनशत्रो दुर्योधनहतक–

[1] *anuktasiddhi* is found in the *Anuṣṭubh* list; ibid. II, p. 364. Rāghavabhaṭṭa follows Siṃhabhūpāla.

[2] See *NŚ*, Vol. II, page 361.

आशैशवादनुदिनं जनितापराधः
क्षीबो बलेन भुजयोर्हतराजपुत्र ।
आसाद्य मेऽन्तरमिदं भुजपञ्जरस्य
जीवन् प्रयासि न पदात्पदमद्य पाप ।। (६. ३८)

भीमः–अये कथमार्यः सुयोधनशङ्कया निर्दयं मामालिङ्गति । इत्यत्र [1]चार्वाकश्रावितदुर्योधनविजयसंकथासंक्षोभेण युधिष्ठिरादीनां भीमे सुयोधनबुद्धिकथनादिदं सारूप्यम् ।

अथ माला–

ईप्सितार्थप्रसिद्ध्यर्थं कथ्यन्ते यत्र सूरिभिः ।। १२३ ।।
(ग-घ)
प्रयोजनान्यनेकानि सा [2]मालेत्यभिधीयते ।
(१२४ क-ख)

यथा धनंजयविजये–

गोरक्षणं समदशात्रवमानभङ्गः
प्रीतिर्विराटनृपतेरुपकारिणश्च ।
पर्याप्तमेकमपि मे समरोत्सवाय
सर्वं पुनर्मिलितमत्र ममैव भाग्यैः ।। (१६, ३ पुटे)

अथ मधुरभाषणम्–

यत् प्रसन्नेन सारूप्यं यत्र पूजयितुं वचः ।।१२४।। (ग-घ)
स्तुतिप्रकाशनं तत्तु स्मृतं [3]मधुरभाषणम् । (१२५ क-ख)

[1] Only *RAS*-1 reads: *cārvākaśāpita*, etc.!
[2] *mālā* is not found in the *Upajāti* list; see *NŚ*, Vol. II, page 359.
[3] In the *NŚ* this is mentioned as *priyavacana*; see ibid., page 350 & 364.

यथा अनर्घराघवे, दशरथः (सप्रश्रयम्)—भगवन् विश्वामित्र

कच्चित् कान्तारभाजां भवति परिभवः कोऽपि शौवापदो वा
प्रत्यूहेन क्रतूनां न खलु मखभुजो भुञ्जते वा हवींषि ।
कर्तुं वा कच्चिदन्तर्वसति वसुमतीदक्षिणः सप्ततन्तु-
र्यत् संप्राप्तोऽसि किं वा रघुकुलतपसामीदृशोऽयं विवर्तः ।।
(१. २५)

विश्वामित्रः (विहस्य)—

जनयति त्वयि वीर दिशां पती-
नपि गृहाङ्गणमात्रकुटुम्बिनः ।
रिपुरिति श्रुतिरेव न वास्तवी
प्रतिभयोन्नतिरस्तु कुतस्तु नः ।। (१. २६)

इत्यादावन्योन्यं पूजावचनं मधुरभाषणम् ।

अथ पृच्छा—

प्रश्नेनैवोत्तरं यत्र सा पृच्छा [1]परिकीर्तिता ।। १२५ ।।
(ग-घ)

यथा—

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया ।।
(विक्रमोर्वशीये ४. ५१)

इत्यत्र पर्वतानां नाथ मया विरहिता प्रिया त्वया दृष्टेति प्रश्ने राज्ञां नाथ त्वया विरहिता मया दृष्टेत्युत्तरस्य प्रतीयमानत्वादियं पृच्छा ।

[1] See *NS*, Vol. II, pages 312 and 361.

अथोपदिष्टम्–

प्रतिगृह्य तु शास्त्रार्थं यद् वाक्यमभिधीयते ।
विद्वन्मनोहरं [1]स्वन्तमुपदिष्टं तदुच्यते ।। १२६ ।।

यथा शाकुन्तले, शकुन्तला (भयं नाटयन्ती)–पौरव रक्ख अविणअं । मअणसंतत्तावि ण हु अत्तणो पहवामि । (पौरव रक्ष अविनयम्। मदनसन्तप्तापि न खल्वात्मनः प्रभवामि । राजा–भीरु अलं गुरुजनाद् भयेन । न ते विदितधर्मा हि भगवान् दोषमत्र ग्रहीष्यति कुलपतिः । अपि च

गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः ।। (३. २०)

इत्यत्र शास्त्रानुरोधेनैव प्रवृत्तत्वादिदमुपदिष्टम् ।

अथ दृष्टम्–

यथादेशं यथाकालं यथारूपं च वर्ण्यते ।
यत् प्रत्यक्षं परोक्षं वा तद् दृष्टं [2]दृष्टवन् मतम्
।। १२७ ।।

यथा मालविकाग्निमित्रे, राजा–अहो सर्वास्ववस्थासु चारुता शोभान्तरं पुष्यति । तथा हि

वामं संधिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम् ।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्तादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ।।
(२. ६)

[1] *upadiṣṭa* is found in the *Anuṣṭubh* list; ibid., II, p. 357.
[2] *dṛṣṭa* is found in the *Anuṣṭubh* list; ibid., II, p. 356.

इत्यत्र इतरसमक्षं स्थितायाः संस्थानजातिवर्णनादिदं प्रत्यक्षदृष्टम् । अप्रत्यक्षदृष्टं यथा पद्मावत्याम्–

व्यत्यस्तपादकमलं वलितत्रिभङ्गी-
सौभाग्यमंसविरलीकृतकेशपाशम्[1] ।
पिञ्छावतंसमुररीकृतवंशनालं
व्यामोहनं नवमुपैमि कृपाविशेषम् ।।

इत्यत्र अप्रत्यक्षस्यैव गोपालसुन्दरस्य संस्थानविशेषजातिवर्णनादपि दृष्टवदाभासनादिदम् अप्रत्यक्षदृष्टम् ।

श्रीसिंहभूपेन कवीश्वराणां[2] विश्राणितानेकविभूषणेन ।
षट्त्रिंशदुक्तानि हि भूषणानि सलक्ष्मलक्ष्याणि मुनेर्मतेन
।। १२८ ।।

साक्षादेवोपदेशेन [3]प्रायोधर्मसमन्वयात् ।
अङ्गाङ्गिभावसंपन्नसमस्तरससंश्रयात् ।। १२९ ।।
प्रकृत्यवस्थासंध्यादिसंपत्त्युपनिबन्धनात् ।
आहुः प्रकरणादीनां नाटकं प्रकृतिं बुधाः ।। १३० ।।
अतिदेशबलप्राप्तनाटकाङ्गोपजीवनात् ।
अन्यानि रूपकाणि स्युर्विकारा[4] नाटकं प्रति ।।१३१।।

[1] *RAS*-1 and MS. 4 read: *aṅgaviralīkṛta-*; *RAS*-2 and MSS. 5 & 6 read: *aṃsaviralīkṛta*, etc.

[2] *RAS*-2 and MSS. 5 & 6 read: *kavīśvareṇa*; *RAS*-1 and MSS. 4, 7, 9 & 10 read: *kavīśvarāṇām* ; there are some gaps here in MS. 8.

[3] *RAS*-2 and MSS. 5 & 6 read: *prāyodharmasamanvayāt*; *RAS*-1 and MSS. 4, 7, 8, 9 and 10 read: *prāptadharmasamanvayāt*. See the *DR*, III. 1.

[4] *RAS*-1 supplies the syllable & reads: *vi(kā)rā*; MS. 4 has a gap here; *RAS*-2 and MSS. 5, 6, 7, 8, 9 & 10 read clearly: *vikārāḥ*.

अतो हि लक्षणं पूर्वं नाटकस्याभिधीयते ।
दिव्येन वा मानुषेण धीरोदात्तेन संयुतम् ।। १३२ ।।
शृङ्गारवीरान्यतरप्रधानरससंश्रयम् ।
ख्यातेतिवृत्तसंबद्धं संधिपञ्चकसंयुतम् ।। १३३ ।।
प्रकृत्यवस्थासंध्यङ्गसंध्यन्तरविभूषणैः ।
पताकास्थानकैर्वृत्तितदङ्गैश्च प्रवृत्तिभिः ।। १३४ ।।
[1]विष्कम्भकादिभिर्युक्तं नाटकं तत् त्रिवर्गदम् ।
तदेतन्नाटकारम्भप्रकारो [2]वक्ष्यते मया ।। १३५ ।।
[3]विधेर्यथैव संकल्पो मुखतां प्रतिपद्यते ।
प्रधानस्य प्रबन्धस्य तथा प्रस्तावना स्मृता ।। १३६ ।।
अर्थस्य प्रतिपाद्यस्य[4] तीर्थं प्रस्तावनोच्यते ।
प्रस्तावनायास्तु मुखे नान्दी कार्या शुभावहा ।। १३७ ।।

[1] *RAS*-1 and MS. 4 read: *viṣkambhādisaṃyuktaṃ nāṭakaṃ tu trivargadam*; others read: *viṣkambhakādibhir yuktaṃ nāṭakaṃ tat tri*, etc.

[2] *RAS*-2 and MS. 5 read: *tatraivaṃ . . . lakṣyate . . .*; *RAS*-1 and MSS. 4, 6(?), 7, 8, 9 & 10 read: *tadetannāṭakārambhaprakāro vakṣyate mayā.*

[3] *vidhi* here stands for *śruti-smṛti-vihitavidhi*; *saṃkalpa* here means: 'a solemn vow to perform *śrauta-smārtādividhi*' which is compulsory and observed by some even now in Sanskrit (in India) particularly in the context and at the beginning of religious functions. It contains a reference to the intention and other related details of the performer, the place and time (where and when performed), and of the performance (such as *upākarman*, *tadaṅga*, *yajñopavītadhāraṇa*, *gāyatrījapa*, etc.). Amara notes: *saṃkalpaḥ karma mānasam.*

[4] The word *tīrtha* has several meanings. *tīrthaṃ mantrādy-upādhyāyaśāstreṣv ambhasi pāvane*, etc. (*Śabdaratnākara*). According to the *Smṛti* texts, a *dāna* is to be given away or presented together with water (*udaka* or *tīrtha*)—a small quantity of it, at least symbolically and thus the presence of water is essential to make the *dāna*

आशीर्नमस्क्रियावस्तुनिर्देशान्यतमा स्मृता ।
चन्द्रनामाङ्किता प्रायो मङ्गलार्थपदोज्ज्वला ।।१३८।।
अष्टाभिर्दशभिश्चेष्टा[1] सेयं द्वादशभिः पदैः ।
समैर्वा विषमैर्वापि प्रयोज्येत्यपरे जगुः ।। १३९ ।।

तत्राशीरन्विता नान्दी यथाभिरामराघवे–

क्रियासुः कल्याणं भुजगशयनादुत्थितवतः
कटाक्षाः कारुण्यप्रणयरसवेणीलहरयः ।
हरेर्लक्ष्मीलीलाकमलदलसौभाग्यसुहृदः
सुधासारस्मेराः[2] सुचरितविशेषैकसुलभाः ।।

नमस्क्रियावती नान्दी यथा उत्तररामचरिते–

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
वन्देमहि च तां वाणीममृतामात्मनः कलाम् ।। (१. १)

complete and effective. In the same manner, Siṃhabhūpāla observes here metaphorically and with a pun on the expression *arthasya pratipādyasya*, that in presenting a *nāṭaka* and other *rūpaka-s*, a *prastāvanā* in the beginning is equally essential, and implies that without it the presentation would be as incomplete and ineffective as a *dāna* would be without water.

[1] Only *RAS*-2 reads: *daśabhiś ceṣṭā*, etc. Others read: *daśabhiḥ śreṣṭhā*, etc. The *pada* in this context is understood to mean either a *suptiṅanta-pada*, or an *avāntaravākya*. See the *Abhinavabhāratī*: (*padāni*) *suptiṅantāni, avāntaravākyāni vā ity ubhayathā*, etc. (GOS Vol. I, page 25; 1956) Siṃhabhūpāla seems to take it in the former sense.

[2] Only *RAS*-1 reads: *sudhāsārāḥ, smerāḥ*, etc. *RAS*-2 and MSS. 4, 5, & 6 read: *sudhāsārasmerāḥ* as one compounded form, which is correct. Siṃhabhūpāla himself comments subsequently on this verse (*kriyāsuḥ*, etc) as *daśapadānvitā nāndī*: *kriyāsuḥ ityādi*. Therefore the expression should be one compunded word; otherwise it would show eleven *pada-s*. See the text related to fn. 1, p. 392.

वस्तुनिर्देशवती नान्दी यथा प्रबोधचन्द्रोदये—

अन्तर्नाडीनियमितमरुल्लङ्घितब्रह्मरन्ध्रं
स्वान्ते शान्तिप्रणयिनि समुन्मीलदानन्दसान्द्रम् ।
प्रत्यग्ज्योतिर्जयति यमिनः स्पष्टलालाटनेत्र-
व्याजव्यक्तीकृतमिव जगद्व्यापि चन्द्रार्धमौलेः ।।
(१. २)

अष्टपदान्विता यथा महावीरचरिते—

अथ स्वस्थाय देवाय नित्याय हतपाप्मने ।
त्यक्तक्रमविभागाय चैतन्यज्योतिषे नमः ।। (१. १)

दशपदान्विता यथा [1]अभिरामराघवे, क्रियासुः कल्याणम्—इत्यादि । द्वादशपदान्विता यथा अनर्घराघवे—

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः
कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने ।
याभ्यामर्धविबोधमुग्धमधुरश्रीरर्धनिद्रायितो
नाभीपल्वलपुण्डरीकमुकुलः कम्बोः सपत्नीकृतः ।।
(१. १)

अत्रैव मङ्गलार्थपदप्रायत्वं चन्द्रनामाङ्कितत्वं च द्रष्टव्यम् ।

नान्द्यन्ते तु प्रविष्टेन सूत्रधारेण धीमता ।
प्रसाधनाय[2] रङ्गस्य वृत्तिर्योज्या हि भारती ।।१४०।।

[1] See fn. 2, p. 391.

[2] MSS. 4, 6 & 10 read: *prasādanāya*; *RAS*-1, *RAS*-2 and MSS. 5, 7, 8 and 9 read: *prasādhanāya*. See the Introduction for a discussion on *raṅgaprasādana* and *raṅgaprasādhana*.

अङ्गान्यस्याश्च चत्वारि भरतेनाबभाषिरे ।
प्ररोचनामुखे चैव वीथीप्रहसने इति ।। १४१ ।।
वीथी प्रहसनं स्वस्वप्रसङ्गे वक्ष्यते स्फुटम् ।
प्ररोचना[1] तु सा प्रोक्ता प्रकृतार्थप्रशंसया ।। १४२ ।।
सदस्यचित्तवृत्तीनां संमुखीकरणं च यत् ।
प्रशंसा तु द्विधा ज्ञेया चेतनाचेतनाश्रया ।। १४३ ।।
अचेतनौ देशकालौ कालो मधुशरन्मुखः । (१४४ क-ख)

तत्र वसन्तप्रशंसया प्ररोचना यथा पद्मावत्याम्–

राजत्कोरककण्टका मधुकरीझंकारहुंकारिणी-
[2]रालोलस्तबकस्तनीरविरलाधूतप्रवालाधराः ।
आलिङ्गन्ति [3]लतावधूरतितरामासन्नशाखाकरै-
रत्यारूढरसालसालरसिकाः[4] कान्ते वसन्तोदये ।।

[1] See fn. 2, p. 342.

[2] Only MS. 4 reads: *mālūrastabaka*; all others read: *ālolastabaka-*. Generally a *mālūraphala* (i.e. *bilvaphala*) by itself is cited as an *upamāna* for *stana*, and not a *guccha* of *mālūraphala*. See the following: *sa vāranārīkucasaṃcitopamaṃ dadarśa mālūraphalaṃ pacelimam* (*Naiṣadha*, I. 94).

[3] *RAS*-2 and MSS. 4 & 5 read: *ānandaśākhākaraiḥ*; *RAS*-1 reads: *ānamraśākhākaraiḥ*; MS. 6 clearly reads: *āsannaśākhākaraiḥ*; this seems to be the correct reading; the reading *ānanda-* is obviously a scribal error arising from a mistaken reading of the writing of *āsanna*, which is easily possible in Telugu script.

[4] *RAS*-1 and MS. 4 read: *atyārūḍharasānubhūtirasikāḥ*; *RAS*-2 and MS. 5 read: —*rasālasālasarasīkānte vasantodaye*; MS. 6 reads: *rasālasālasarasikā kānte*, etc.; *rasālasāla* is perhaps in the sense of *rasālāḥ sālā iva*. Amara notes: *āmraś cūto rasālo'sau*. Then we are to construe as *rasālasālā eva rasikāḥ*. Although the expression *sarasīkānte* may convey the idea of beautiful lakes (in Spring) with the *rasāla* and *sāla* trees grown on the banks, it leaves out the agent of *āliṅganti*. An expressed agent as *rasikāḥ* in the Nominative in this context is definitely preferable.

शरत्प्रशंसया यथा वेणीसंहारे—

सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥

(१. ६)

(अथ देशः—)

देशस्तु देवताराजतीर्थस्थानादिरुच्यते[1] ॥ १४४ ॥

(ग-घ)

तदद्य [2]कालनाथस्य यात्रेत्यादिषु लक्ष्यताम् ।
चेतनास्तु कथानाथकविसभ्यनटाः स्मृताः ॥ १४५ ॥
कथानाथास्तु धर्मार्थरसमोक्षोपयोगिनः ।
धर्मोपयोगिनस्तत्र[3] युधिष्ठिरनलादयः ॥ १४६ ॥
अर्थोपयोगिनो [4]रुद्रनरसिंहनृपादयः ।
रसोपयोगिनो विद्याधरवत्सेश्वरादयः ॥ १४७ ॥
मोक्षोपयोगिनो रामवासुदेवादयो मताः ।
एके त्वभेदमिच्छन्ति धर्ममोक्षोपयोगिनोः[3] ॥१४८॥

[1] *RAS*-1 and MSS. 4, 5 & 6 read: *-tīrthasnāna-*! *RAS*-2 and MSS. 7, 8, 9 and 10 read: *tīrthasthāna-*; MSS. 7, 8, 9 and 10 also read: *devatāvāsa-*, insead of *devatārāja*, etc. The *sthāna* may be construed as *devatāsthāna*, *rājasthāna* and *tīrthasthāna*.

[2] See the *Mālatīmādhava* after the verse I. 5.

[3] The five lines from *dharmopayogino*, etc. to *dharmamokṣopa-yoginoḥ* are missing in *RAS*-1 and MS. 4. But they are clearly found in *RAS*-2 and MSS. 5, 6, 7, 8, 9 and 10.

[4] *RAS*-2 and MSS. 5 & 6 read: *arthopayogino rudra*, etc.; MSS. 7, 8, 9 and 10 read: *arthopayogino hy atra*.

(चतुर्विधाः कवयः)

कवयस्तु प्रबन्धारस्ते[1] भवेयुश्चतुर्विधाः ।
उदात्त उद्धतः प्रौढो विनीत इति भेदतः ।। १४९ ।।

तत्रोदात्तः–

अन्तर्गूढाभिमानोक्तिरुदात्त इति गीयते । (१५० क-ख)

यथा मालविकाग्निमित्रे—

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ।। (१.२)

अत्र सन्तः परीक्ष्येत्यनेन स्वकृतेः[2] परीक्षणक्षमत्वकल्पितो निजगर्वः कालिदासेन [3]विवक्षित इति तस्योदात्तत्वम् ।

अथोद्धतः–

परापवादात् [4]स्वोत्कर्षवादी तूद्धत उच्यते ।। १५० ।। (ग-घ)

यथा मालतीमाधवे–

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः ।

[1] Only *RAS*-1 reads: *prabandhādyais te*!

[2] *RAS*-2 and MSS. 5 & 6 read: *vastukṛteḥ*; *RAS*-1 and MS. 4 read: *svakṛteḥ*.

[3] *RAS*-1 and MS. 4 read: *kālidāsasyodāttatvam*; *RAS*-2 and MSS. 5 & 6 read: *kālidāsena vivakṣita iti tasyodāttatvam*.

[4] Only *RAS*-2 has a defective line as: *parāpavādāt svotkarṣatvopādhir uddhata ucyate*.

उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ।। (१. ८)

अत्र जानन्ति ते किमपीति परापवादात् मम तु कोऽपि समानधर्मेत्यात्मोत्कर्षकथनाच्च भवभूतेरुद्धतत्वम् ।

अथ प्रौढः—

यथोचितनिजोत्कर्षवादी प्रौढ इतीरितः ।
(१५१ क-ख)

यथा करुणाकन्दले—

कविर्भारद्वाजो जगदवधिजाग्रन्निजयशा
रसश्रेणीमर्मव्यवहरणहेवाकरसिकः ।
यदीयानां वाचां रसिकहृदयोल्लासनविधा-
वमन्दानन्दात्मा[1] परिणमति संदर्भमहिमा ।।

अत्र रसप्रौढिसंदर्भप्रसादयोर्नाटकनिर्माणोचितयोरेव कथनात् निजोत्कर्षं प्रकटयन्नयं कविः प्रौढ इत्युच्यते ।

युक्त्या निजोत्कर्षवादी प्रौढ इत्यपरैः स्मृतः ।। १५१ ।।
(ग-घ)

यथा ममैव—

नेदानींतनदीपिका किमु तमःसंघातमुन्मूलयेत्

[1] This last foot reminds us of Vidyānātha's verse: *guṇālaṃkāra-śrīkṛtaparikaro bhāvavibhavaḥ sphuratprādurbhāvaḥ kramagalitavedyānta-ramatiḥ, sukhaṃ vā duḥkhaṃ vā nibiḍayatu yūnoḥ, sahṛdaye tv amandānan-dātmā pariṇamati pūrṇo rasabharaḥ.* (Balamano- edn. pp. 208-209). See also fn. 1, p. 403.

(इत्यादि) (रसार्णवसुधाकरे १. ५५) ।

अत्र ज्योत्स्नादिदृष्टान्तमुखेन माधुर्यौजःप्रसादाख्यानां गुणानां स्वसाहित्ये रसौचित्येन (सत्तां) प्रतिपादयन्नयं कविः प्रौढ इत्युच्यते ।

अथ विनीतः–

विनीतो विनयोत्कर्षात् स्वापकर्षप्रकाशकः ।

(१५२ क-ख)

यथा रामानन्दे–

गुणो न कश्चिन् मम वाङ्निबन्धे
लभ्येत यत्नेन गवेषितोऽपि ।
तथाप्यमुं रामकथाप्रबन्धं
सन्तोऽनुरागेण समाद्रियन्ते ।।

अत्र [1]विनयोत्कर्षादपकर्षमात्मन्यारोपयन्नयं कविर्विनीत इत्युच्यते ।

(अथ सभ्याः)–

सभ्यास्तु विबुधैर्ज्ञेया ये दिदृक्षान्विता जनाः ।। १५२ ।।

(ग-घ)

तेऽपि द्विधा प्रार्थनीयाः प्रार्थका इति च स्फुटम् ।
इदं प्रयोक्ष्ये युष्माभिरनुज्ञा दीयतामिति ।। १५३ ।।
संप्रार्थ्याः सूत्रधारेण प्रार्थनीया इति स्मृताः ।
त्वया प्रयोगः क्रियतामित्युत्कण्ठितचेतसः ।। १५४ ।।
ये सूत्रिणं प्रार्थयन्ते ते सभ्याः[2] प्रार्थकाः स्मृताः ।

[1] Only *RAS*-1 reads: *vinayotkarṣam ātmany āropayan*; *RAS*-2 and MSS. 4, 5 and 6 read as given in the text.

[2] *RAS*-1 and MS. 4 read: *śaktyā*; all others read: *sabhyāḥ*.

(अथ नटाः)—

[1]रङ्गोपजीविनः प्रोक्ता नटास्तेऽपि त्रिधा स्मृताः
॥ १५५ ॥

वादका गायकाश्चैव नर्तकाश्चेति कोविदैः ।
वीणावेणुमृदङ्गादिवादका वादकाः स्मृताः ॥ १५६ ॥
[2]आलापनध्रुवागीतगायका गायका मताः ।
[3]नानाप्रकाराभिनयकर्तारो नर्तकाः स्मृताः ॥ १५७ ॥

(तदेवम्)—

विस्तरादुत संक्षेपात् प्रयुञ्जीत प्ररोचनाम् ।
(१५८ क-ख)

तत्र संक्षिप्ता प्ररोचना यथा रत्नावल्याम्—

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥
(१. ६)

[1] Five lines from *raṅgopajīvinaḥ* to *nartakāḥ smṛtāḥ* are missing in *RAS*-1 and MS. 4. There was a reference earlier to *naṭa* in the division of *cetana* (III. 144). The present lines define and subdivide *naṭa*. The absence of these lines leaves a gap, and is therefore defective. *RAS*-2 and MSS. 5, 6, 7, 8, 9 and 10 read these clearly.

[2] The line *ālāpana*, etc. is missing in *RAS*-2. Strangely, this line and the following one *nānāprakāra*, etc. are found in MS. 4 before the expression *Veṇīsaṃhāre* preceding the verse *nirvāṇa*, etc. See fn. 4, p. 399. The other three lines *raṅgopajīvinaḥ*, etc. are not found in MS. 4 even in this wrong place.

[3] *RAS*-2 and MSS. 5 & 6 read: *nava* (for *nānā*); all others read: *nānā*, etc.

अत्र कथानायककविसभ्यनटानां चतुर्णां संक्षेपेण वर्णनादियं संक्षिप्तप्ररोचना । विस्तरात्तु बालरामायणादिषु द्रष्टव्या ।

एवं प्ररोचयन् सभ्यान् सूत्री कुर्यादथामुखम् ।।१५८।।
(ग-घ)

[1]सूत्रधारो नटीं ब्रूते स्वकार्यं प्रति युक्तितः ।
[2]प्रस्तुताक्षेपचित्रोक्त्या यत् तदामुखमीरितम् ।।१५९।।
त्रीण्यामुखाङ्गान्युच्यन्ते कथोद्घातः प्रवर्तकः ।
प्रयोगातिशयश्चेति तेषां लक्षणमुच्यते ।। १६० ।।
सूत्रिणो वाक्यमर्थं वा स्वेतिवृत्तसमं यदा ।
स्वीकृत्य प्रविशेत् पात्रं कथोद्घातो द्विधा मतः ।।१६१।।

तत्र वाक्येन कथोद्घातो यथा रत्नावल्याम्—

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ।।
(१.७)

इति [3]सूत्रधारस्य प्रियासमाश्वासनवाक्यं स्वस्यानुकूलतया पठतो यौगन्धरायणस्य प्रवेशात् कथोद्घातः । अर्थेन कथोद्घातो यथा [4]वेणीसंहारे—

निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन ।

[1] See the *DR*, III. 7 & 8.

[2] MS. 4 reads: *prastutākṣepi citroktyā*, etc. MSS. 7, 8, 9 and 10 read: *prastutākṣepayuktyā yat tad āmukham itīritam*; *RAS*-1, *RAS*-2 and MSS. 5 & 6 read as given in the text.

[3] *RAS*-1 and MS. 4 read simply: *atra ca vākyena kathodghātaḥ*; *RAS*-2 and MSS. 5 & 6 read as given in the text.

[4] See fn. 2, p. 398.

रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वःस्था भवन्तु कुरुराजसुताः सभृत्याः ॥ (१.७)

अत्रोत्तरार्धे सूत्रधारेण धार्तराष्ट्राणां स्वर्गस्थितिनिरुपद्रवलक्षणयोरर्थयोर्विवक्षितयोः सतोः भीमेन स्वस्था भवन्तु मयि जीवति धार्तराष्ट्रा इति निरुपद्रवलक्षणस्यैवार्थविशेषस्य ग्रहणेन प्रवेशः कृत इति अयमर्थेन कथोद्घातः ।

अथ प्रवर्तकः—

आक्षिप्तः [1]कालसाम्येन प्रवेशः स्यात् प्रवर्तकः ।
(१६२ क-ख)

यथा [2](बालरामायणे)—

प्रकटितरामाम्भोजः कौशिकवान् सपदि लक्ष्मणानन्दी।
शरचापनमनहेतोरयमवतीर्णः शरत्समयः ॥ (१. १६)

अत्र विश्वामित्ररामलक्ष्मणानां शरत्समयवर्णनसाम्येन प्रवेशः प्रवर्तकः ।

अथ प्रयोगातिशयः—

[3]एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः ॥ १६२ ॥
(ग-घ)

[1] See the *DR*, III. 9 & 10.

[2] *RAS*-1 reads from the *Priyadarśikā* the verse (I. 5): *ghanabandhananirmuktaḥ kanyāgrahaṇāt tulāṃ prāpya, ravir adhigatasvadhāmā pratapati kila vatsarāja iva* and the following comments (MS. 4 has only the comments): *atra śaratkālasāmānyena vatsarājasya ākṣepapraveśāt pravartakaḥ.* *RAS*-2 and MSS. 5 & 6 read the verse (*prakaṭitarāmāmbhojaḥ*, etc.) from the *Bālarāmāyaṇa*, and the comments thereon.

[3] See the *DR*, III. 11.

प्रयोगसूचनं यत्र प्रयोगातिशयो हि सः ।

(१६३ क-ख)

यथा मालविकाग्निमित्रे–

शिरसा प्रथमगृहीतामाज्ञामिच्छामि परिषदः कर्तुम् ।
देव्या इव धारिण्याः सेवादक्षः परिजनोऽयम् ।।

(१. ३)

अत्रायमित्युपक्षेपेणाक्षिप्तः परिजनप्रवेशः प्रयोगातिशयः ।

तथा च शाकुन्तले–

तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ।। (१. ५)

इत्यत्र एष इत्युपक्षिप्तो दुष्यन्तप्रवेशः प्रयोगातिशयः ।

[1]**प्रस्तावना स्थापनेति द्विधा स्यादिदमामुखम् ।। १६३ ।।**

(ग-घ)

विदूषकनटीपारिपार्श्विकैः सह संलपन् ।
[2]**स्तोकवीथ्यङ्गसहितान्यामुखाङ्गानि सूत्रभृत्**

।।१६४।।

[1] This division of *āmukha* into *prastāvanā* and *sthāpanā* is not found in the *Nāṭyaśāstra* and in the *Daśarūpaka*. Abhinava's explanation as *dvividhā prastāvanā bhavati, pūrvaraṅgasyāṅgabhūtā anyasya vā* (Vol. I, page 249) seems to be different from Siṃhabhūpāla's *prastāvanā* and *sthāpanā*. See also *ABh*. Vol. III, p. 93. Siṃhabhūpāla seems to lay emphasis on *sarvāmukhāṅgatva* in one case, and *stokavīthyaṅgatva* in the other, which point Abhinava does not seem to mention. The source of Siṃhabhūpāla's division is not known.

[2] *RAS*-1 and MS. 4 read: *stokavīthyādi* (for *vīthyaṅga*); *RAS*-2 and MSS. 5, 6, 7, 8, 9 and 10 read: *vīthyaṅga-*.

योजयेद् यत्र नाट्यज्ञैरेषा प्रस्तावना स्मृता ।
सर्वामुखाङ्गवीथ्यङ्गसमेतैर्वाक्यविस्तरैः ।। १६५ ।।
सूत्रधारो यत्र नटीविदूषकनटादिभिः ।
संलपन् प्रस्तुतं चार्थमाक्षिपेत् स्थापना हि सा ।।१६६।।
शृङ्गारप्रचुरे नाट्ये योग्यः स्यादामुखक्रम[1]ः ।
रत्नावल्यादिके प्रायो लक्ष्यतां कोविदैरयम् ।।१६७।।
वीराद्भुतादिप्राये तु प्रायः प्रस्तावनोचिता ।
अनर्घराघवाद्येषु प्रायशो वीक्ष्यतामियम्[2] ।। १६८ ।।
हास्यबीभत्सरौद्रादिप्राये तु स्थापना मता ।
वीरभद्रविजृम्भादौ [3]सा प्रायेण समीक्ष्यताम् ।। १६९ ।।
कथितान्यामुखाङ्गानि वीथ्यङ्गानि प्रचक्ष्महे ।
आमुखेऽपि च वीथ्यां च [4]साधारण्येऽपि संमते ।।१७०।।
वीथ्यङ्गसंप्रथा तेषां वीथ्यामावश्यकत्वतः ।
उद्घात्यकावलगित[5] प्रपञ्चत्रिगते छलम् ।। १७१ ।।
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारौ मृदवं च त्रयोदश ।। १७२ ।।
तत्रोद्घात्यकमन्योन्यालापमाला द्विधा हि तत् ।
गूढार्थपदपर्यायक्रमात् प्रश्नोत्तरक्रमात् ।। १७३ ।।

[1] Perhaps by this the author means: *dvividho'pi*.

[2] *RAS*-1 & MS. 4 read: *idam* (for *iyam* of others).

[3] *RAS*-1 reads: *sa*(masculine) *prāyeṇa nirīkṣyatām*; MS. 4 reads: *prayogeṇa nirīkṣyatām*; others read: *sā prāyeṇa samīkṣyatām*.

[4] *RAS*-1 reads: *sādhāraṇyena sammatā*; MS. 4 reads: *sādhāraṇyena sammate*: *RAS*-2 and MSS. 5, 6, 7, 8, 9 and 10 read: *sādhāraṇye'pi sammate*, which makes a better sense.

[5] All the MSS. read only *avalagita* (and not *avagalita*); see also the *DR*, III. 12 and 13.

तत्र गूढार्थपदपर्यायक्रमादुद्घात्यकं यथा वीरभद्रविजृम्भनामनि डिमे–

सखे कोऽयं रौद्रः कथय महितः कोऽपि हि रसो
रसो नामायं कः स्मृतिसुरभिरास्वादमहिमा ।
समास्वादः कोऽयं [1]क्रमगलितवेद्यान्तरमति-
र्मनोऽवस्था ज्ञातं ननु वदसि निद्रान्तरमिति ।।

अत्र रौद्ररसस्वरूपविवेचनाय रसास्वादावस्थालक्षणैर्गूढार्थपदपर्यायैर्नटसूत्रधारयोः संलापादिद (मादिम) मुद्घात्यकम् । प्रश्नोत्तरक्रमाद् यथा तत्रैव डिमे–

[2]सेव्यं किं परमुत्तमस्य चरितं लोकोत्तरः कः पुमान्
श्रीसिंहः स तु कीदृशो वद निधिर्धर्मस्य धर्मस्तु कः ।
सत्योक्तिर्वचनं तु किं कविनुतं को नाम तादृक्कवि-
र्विश्वेशः स तु कीदृशो विजयते विश्वेषु विश्वेशवत् ।।

अत्र गूढार्थपदपर्यायरहितप्रश्नोत्तरक्रमेण नटसूत्रधारयोः संलापात् [3]प्रकृतकविवर्णनोपयुक्तमिदमुद्घात्यकम् ।

अथावलगितम्–

द्विधावलगितं प्रोक्तमर्थावलगनात्मकम् ।
अन्यप्रसङ्गादन्यस्य संसिद्धिः प्रकृतस्य वा ।। १७४ ।।

[1] We are reminded of Vidyānātha's use of *kramagalitavedyāntaramatiḥ*, in his verse on *rasa*. See fn. 1, p. 396, for the full verse.

[2] RAS-1 and MS. 4 read: *sevyam*; RAS-2 and MSS. 5 & 6 read: *śrāvyam*.

[3] The expression *prakṛtakavi* seems to convey clearly that Viśveśvara was the author of this *Ḍima*, the *Vīrabhadravijṛmbhaṇa*.

[1]अन्यप्रसङ्गादन्यस्य सिद्ध्या अवलगितं यथा अभिरामराघवे अनपोतनायकीये[2]—

हन्त सारस्वतं चक्षुः कवीनां क्रान्तदर्शिनाम् ।
अतिशय्य प्रवर्तेत नियतार्थेषु वस्तुषु ।।

अत्र सूत्रधारेण कवीनां सारस्वतं चक्षुरिति कविसामान्यवर्णनेन स्वाभिलषितकविविशेषोत्कर्षसंसाधनरूपात् प्रकृतार्थावलगनादवलगितमिदम् ।

अन्यप्रसङ्गेन प्रकृतस्य सिद्धिर्यथा अनर्घराघवे—

सूत्रधारः—मारिष स्थाने खलु भवतः कुतूहलम् । ईदृशमेवैतत् ।

तत्तादृगुज्ज्वलककुत्स्थकुलप्रशस्ति-
सौरभ्यनिर्भरगभीरमनोहराणि ।
वाल्मीकिवागमृतकूपनिपानलक्ष्मीम्
एतानि बिभ्रति मुरारिकवेर्वचांसि ।। (१. १२)

अत्राप्रकृतवाल्मीकिवर्णनप्रसङ्गेन प्रकृतमारिषकुतूहलोत्कर्षसंसाधनरूपात् प्रकृतनाट्यावलगनादिदं[3] द्वितीयमवलगितम् ।

अथ प्रपञ्चः—

प्रपञ्चस्तु मिथः स्तोत्रमसद्भूतं च हास्यकृत् ।
(१७५ क-ख)

[1] The portion from *anyaprasaṅgāt* to *jaladadhvani-* is missing in MS. 4. See fn. 4, p. 405. See also the *DR*, III. 14 & 15 on *avalagita.*

[2] This seems to indicate that Anapotanāyaka, the father of our author, wrote the drama *Abhirāmarāghava.* See also fn. 2, pp. 301-2.

[3] The explanation by the word *avalagana*, seen in both the cases in all the MSS. of the *RAS*, I used, seems to indicate that the term intended in the context is only *avalagita* (and not *avagalita*). Abhinava too takes it to be *avalagita*. See *ABh.* Vol. II, page 454.

यथा वीरभद्रविजृम्भणे–

नाट्याचार्यस्त्वमसि सुहृदां त्वादृशानां प्रसादात्
कोऽयं गीतश्रमविधिरहो भिन्नकण्ठोऽद्य जातः ।
ज्ञातं ज्ञातं परिहससि मां भाषितैर्भावगर्भै-
र्मैवं वाच्यं त्वमसि हि गुरुस्तत्र [1]चेष्टिः प्रमाणम् ।।

अत्र नटसूत्रधारयोरयथार्थस्यान्योन्यस्तोत्रस्य हास्यायैव प्रवृत्तत्वात् [2]प्रपञ्चः ।

अथ त्रिगतम्–

श्रुतिसाम्यादनेकार्थयोजनं[3] त्रिगतं भवेत् ।। १७५ ।।
(ग-घ)

यथाभिरामराघवे, पारिपार्श्विकः–

वाणीमुरजक्वणितं श्रुतिसुभगं किं सुधामुचः स्तनितम् ।
जलदस्य किम् आ ज्ञातं तव मधुरगभीरवाग्विलासोऽयम् ।।

अत्र सूत्रधारवाग्विलासे [4]मुरजजलदध्वनिवितर्कसंभावनात् त्रिगतम् ।

अथ छलम्[5]–

प्रोक्तं छलं ससोत्प्रासैः प्रियाभासैर्विलोभनम् ।
(१७६ क-ख)

[1] *RAS*-2 and MSS. 5 & 6 seem to read: *paiṣī pramāṇam*; *RAS*-1 reads: *tatra ceṣṭiḥ pramāṇam*; (this reminds us of the *iṣṭi-s* of the *Mahābhāṣya*). The portion is missing in **MS.** 4 (see fn. 1, p. 404).

[2] See the *DR*, III. 15(cd).

[3] See the *DR*, III. 16.

[4] See fn. 1, p. 404.

[5] See the *DR*, III. 17(ab).

यथा अभिरामराघवे–

विद्वानसौ कलावानपि रसिको बहुविधप्रयोगज्ञः ।
इति च भवन्तं विद्मो निर्व्यूढं साधु तत् त्वया सर्वम् ॥

अत्र विपरीतलक्षणया प्रहेलिकार्थमजानतः पारिपार्श्विकस्योपालम्भनात् छलम् ।

अथ वाक्केलिः–

साकाङ्क्षस्यैव वाक्यस्य वाक्केलिः[1] स्यात् समाप्तितः
॥ १७६ ॥ (ग-घ)

यथा महेश्वरानन्दे–

कुलशोकहरं कुमारमेकं कुहनाभैरवपारणोन्मुखाभ्याम् ।
उपहूय कृतादरं पितृभ्यामुपरि प्रस्तुतमों नमः शिवाय ॥

अत्र वाक्ये साकाङ्क्षे विशेषांशमनुक्त्वा नमःशिवायेति समाप्तिकथनाद् वाक्केलिः ।

अथाधिबलम्–

स्पर्धयान्योन्यसामर्थ्यव्यक्तिस्त्वधिबलं[2] भवेत् ।
(१७७ क-ख)

यथा वीरभद्रविजृम्भणे–

मा भूच्चिन्ता तवेयं मयि सति कुशले दुष्करः किं प्रयोगो
मानिन्[3] जानासि किं त्वं किमपि न विदिता चातुरी
मे त्वया किम् ।

[1] See the *DR*, III. 17(ed).
[2] See the *DR*, III. 18.
[3] *RAS*-1 reads: *mālaṃ jānāsi*; MS. 4 reads: *mālajjā nāsi*(?); *RAS*-2 and MSS. 5 & 6 read: *mānin jānāsi*, etc.

आस्तां [1]स्वस्तोत्रकन्था कृतमिह कथितैर्भूतपूर्वैः प्रसङ्गैः
[2]पत्न्याहं वश्यकर्मा सपदि नटविधावेष सज्जीभवामि ॥

अत्र नटसूत्रधारयोः परस्परस्पर्धया स्वस्वप्रयोगसामर्थ्यप्रकाशनादधिबलम् ।

अथ गण्डम्—

गण्डं [3]प्रस्तुतसंबन्धि भिन्नार्थं सहसोदितम् ॥ १७७ ॥
(ग-घ)

यथा वेणीसंहारे—

निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन ।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥
(१. ७)

[1] The word *kanthā* is generally used in the sense of 'a rag, or patched garment'. In the regional language in South India the word *kandal* (Tamil) —perhaps it was derived from Sanskrit *kanthā*—is used in this sense even now. In the expression *svástotra-kanthā*, the word *kanthā* seems to be deliberately used instead of *kathā* to convey the derision of the speaker; the sentence *āstāṃ svastotrakanthā* is intended to express 'Let me not, any more, have to listen to your personal flattery (boasting)', which should be referred to as *stotrakanthā*, and not as *stotrakathā*. *RAS*-2 reads: *āstāṃ svasthaḥ prabandhaḥ*, and in the last foot as *yasyāhaṃ viśvakarmā*, etc.; MSS. 5 & 6 read: *āstāṃ svasthokabandho*(?), etc.

[2] *RAS*-1 and MS. 4 read: *patnyāhaṃ vaśyakarmā*; *RAS*-2 and MSS. 5 & 6 read: *yasyāhaṃ viśvakarmā.*

[3] See the *DR*, III. 18 (cd).

अत्र सूत्रधारेण [1]निरुपद्रवलक्षणेऽर्थे विवक्षितेऽपि स्वर्गस्थिति-लक्षणार्थसूचकस्य रक्तप्रसाधितभुव इत्यादिश्लिष्टवाक्यस्य सहसा प्रस्तुतसंबन्धितया भाषितत्वाद् गण्डम् ।

अथावस्यन्दितम्—

पूर्वोक्तस्यान्यथा[2] व्याख्या यत्रावस्यन्दितं हि तत् ।

(१७८ क-ख)

यथा वेणीसंहारे, सूत्रधारः—

सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥

(१. ६)

पारिपार्श्विकः—

(प्रविश्य संभ्रान्तः) शान्तं पापम् । प्रतिहतममङ्गलम् ।

सूत्रधारः—

मा भैषीः । ननु शरत्समयवर्णनाशंसया हंसान् धार्तराष्ट्रा इति व्यपदिशामि ।

अत्र पूर्वोक्तस्य सुयोधनादिनिपातस्य हंसपातत्वेन व्याख्यानादिदमवस्यन्दितम्[3] ।

अथ नालिका—

प्रहेलिका निगूढार्था हास्यार्थं [4]नालिका स्मृता ॥ १७८ ॥

(ग-घ)

[1] *nirupadravalakṣaṇe* is missing in *RAS*-1 and MS. 4; *RAS*-2 and MSS. 5 & 6 have it.

[2] *RAS*-1 and MS. 4 read: *anyathoktiḥ syāt*, etc.; others read: *anyathā vyākhyā*.

[3] See the *DR*, III. 19 (ab).

[4] See the *DR*, III. 19 (cd).

अन्तर्लापा बहिर्लापेत्येषा द्वेधा समीरिता ।

(१७६ क-ख)

तत्र अन्तर्लापा यथा प्रसन्नराघवे–

प्रत्यङ्कमङ्कुरितसर्वनवावतार-
न्नव्योल्लसत्कुसुमराजिविराजिबन्धम् ।
घर्मेतरांशुमिव वक्रतयातिरम्यं
नाट्यप्रबन्धमतिमञ्जुलसंविधानम् ।। (१. ७)

अत्र प्रसन्नराघवनामेत्युत्तरस्य सप्ताक्षराष्टपङ्क्तिक्रमेण लिखितेऽस्मिन्नेव श्लोके मृग्यत्वादन्तर्लापा नामेयम्

बहिर्लापा यथा बालरामायणे–

कमवड्ढन्तविलासं रसाअले कं करेइ कन्दप्पो ।
(क्रमवर्धमानविलासं रसातले कं करोति कन्दर्पः ।)

सूत्रधारः–

अये प्रश्नोत्तरम् । सेयमस्मत्प्रीतिरिति देवादेशः । तत् स्वयमेव वाचयामि ।

[1]निर्भयगुरुर्व्यधत्त च वाल्मीकिकथां किमनुसृत्य ।।
(१. ५)

इत्यत्र बालरामायणमित्युत्तरस्य बहिरेव मृग्यत्वाद् बहिर्लापा नाम नालिकेयम् ।

[1] *RAS*-1 and MSS. 4, 5 & 6 read: *nirbhara-*; *RAS*-2 reads: *nirbhaya-*; *nirbhayaguru* is explained to mean Rājaśekhara, the teacher of Nirbhayarāja Mahendrapāla (*circa* 890-920 A.D.). Compare: *devo yasya mahendrapālanṛpatiḥ śiṣyo raghugrāmaṇīḥ* (*Bālarāmāyaṇa*, I. 18).

अथासत्प्रलापः–

असंबद्धकथालापोऽसत्प्रलाप इतीरितः ॥ १७९ ॥

(ग-घ)

यथा वीरभद्रविजृम्भणे, नटः–

पत्नी परिलम्बिकुचा तनया मम दन्तुरापि तरुणवयाः ।
[1]क्रीडाकपिरस्ति गृहे तदहं नाटचप्रयोगमर्मज्ञः ॥

अत्र नटेन स्वकीयनाटचप्रयोगमर्मज्ञत्वे हेतुतया कथितानां [222]क्रीडाकपिसद्भावादीनामसंबद्धत्वादयमसत्प्रलापः[2] ।

अथ व्याहारः–

अन्यार्थं वचनं हास्यकरं व्याहार उच्यते ।

(१८० क-ख)

यथा आनन्दकोशनामनि प्रहसने–

(प्रविश्य) नटी–अय्य को णिओओ । (आर्य को नियोगः)

सूत्रधारः–आर्ये गर्गरिके नूनमानन्दकोशसंदर्शनाभिलाषिणी परिषदियम् ।

नटी–ता दंसेदु अय्यो । तदो किं विलंबेण । (तद् दर्शयत्वार्यः । ततः किं विलम्बेन ।)

सूत्रधारः–अयि गायिके गर्गरिके भवत्या मुखव्यापारेण बीजोत्थापनानुसंधायिना भवितव्यम् ।

नटी–(सहर्षम्) कीरिसो सो मुहवावारो । (कीदृशः स मुखव्यापारः ।)

[1] *RAS*-1 and MS. 4 read: *krīḍākavir asti*; *RAS*-2 and MSS. 5 & 6 read: *krīḍākapir asti.*

[2] See the *DR*, III. 20 (ab).

सुत्रधारः—नन्वमुमेव शिशिरमधिकृत्य ध्रुवागानरूपः—

इत्यत्र आनन्दकोशबीजोत्थापनमुखव्यापाराणां[1] रूपकबीजोत्थापनध्रुवागानार्थानामपि अन्यार्थप्रतीत्या हास्यकरत्वादयं [2]व्याहारः।

अथ मृदवम्—

दोषा गुणा[3] गुणा दोषा यत्र स्युर्मृदवं हि तत् ॥ १८० ॥

(ग-घ)

यथा—

[4]नार्हाः केवलवेदपाठविधिना कीरा इव छान्दसाः
[5]शास्त्रीयाभ्यसनाच्छुनामिव नृणामन्योन्यकोलाहलः ।
व्यर्थं काव्यमसत्यवस्तुघटनात् स्वप्नेन्द्रजालादिवद्
व्याकीर्णव्यवहारनिर्णयकृते त्वेकैव [6]कार्या स्मृतिः ॥

अत्र [7]काव्यादिषु गुणभूतेष्वपि दोषत्वकथनाद् मृदवमिदम् ।

एवमामुखमायोज्य सूत्रधारे सहानुगे ।
निष्क्रान्तेऽथ तदाक्षिप्तैः पात्रैर्वस्तु प्रपञ्चयेत् ॥ १८१ ॥

[1] *RAS*-1 and MS. 4 read simply: *ānandakośabījotthāpadhruvāgānārthānām api anyārtha*, etc.; *RAS*-2 and MSS. 5 & 6 read as given in the text.

[2] See the *DR*, III. 20 (cd).

[3] See the *DR*, III. 21 (ab).

[4] *RAS*-2 reads: *kāmaṃ kevala*, etc.; *RAS*-1 and MSS. 4, 5 & 6 read: *nārhāḥ kevala*, etc.

[5] *RAS*-2 reads: *śāstrābhyāsavaśāt*; MS. 4 reads: *śāstrīyādhyayanāt*; *RAS*-1 and MSS. 5 & 6 read: *śāstrīyābhyasanāt*.

[6] *RAS*-2 reads: *ekavyavasthā smṛtiḥ*; *RAS*-1 and MSS. 4, 5 & 6 read: *ekaiva kāryā smṛtiḥ*.

[7] *RAS*-2 reads: *kāryādiṣu guṇarūpeṣv api*; *RAS*-1 and MSS. 4, 5 & 6 read: *kāvyādiṣu guṇabhūteṣu*, etc.

वस्तु सर्वं द्विधा [1]सूच्यमसूच्यमिति भेदतः ।
रसहीनं भवेद् यत्तु वस्तु तत् सूच्यमुच्यते ।। १८२ ।।
यद् वस्तु नीरसं तत्तु सूचयेत् सूचकास्त्वमी ।
विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकाः ।। १८३ ।।
तत्र विष्कम्भको [2]भूतभाविवस्त्वंशसूचकः ।
अमुख्यपात्ररचितः [3]संक्षेपैकप्रयोजनः ।। १८४ ।।
स शुद्धो मिश्र इत्युक्तो [4]मिश्रः स्यान्नीचमध्यमैः ।
सोऽयं चेटीनटाचार्यसंलापपरिकल्पितः[5] ।। १८५ ।।
मालविकाग्निमित्रस्य प्रथमाङ्के निरूप्यताम् ।
शुद्धः केवलमध्योऽयमेकानेककृतो द्विधा ।। १८६ ।।
रत्नावल्यामेकशुद्धः प्राप्तयौगन्धरायणः ।
अनेकशुद्धो विष्कम्भः षष्ठाङ्केऽनर्घराघवे ।। १८७ ।।
निरूप्यतां संप्रयुक्तो माल्यवच्छुकसारणैः ।

अथ चूलिका—

वन्दिमागधसूताद्यैः [6]प्रतिसीरान्तरस्थितैः ।। १८८ ।।

[1] See the *DR*, I. 56, 57, 58 and the *Laghuṭīkā* thereon. See the Introduction for a discussion on *arthopakṣepaka-s.*

[2] See the *DR*, I. 59.

[3] *RAS*-1 reads: *saṃkṣepapratiyojitaḥ*; MS. 4 reads: *saṃkṣepaḥ prītiyojitaḥ.*

[4] See the *DR*, I. 60 (ab) and the *LṬ* thereon. *RAS*-1, *RAS*-2 and MSS. 4, 5 & 6 read: . . . *nīcamadhyamaiḥ*; MSS. 7, 8, 9 and 10 read: *nīcamadhyayoḥ.*

[5] *RAS*-2 and MSS. 4, 5 & 6 read: *saṃlāpaḥ parikīrtitaḥ*; *RAS*-1 and MSS. 7, 8, 9 and 10 read: *saṃlāpaparikalpitaḥ.*

[6] *RAS*-1 and MS. 4 read: *pratyāśīrantara-* ! Others read clearly: *pratisīrā-*. Amara notes: *pratisīrā javanikā syāt tiraskariṇī ca sā.* The *DR*, I. 61(cd) says: *antarjavanikāsaṃsthaiś cūlikārthasya*

अर्थोपक्षेपणं यत्तु क्रियते सा हि चूलिका ।
सा द्विधा[1] चूलिका खण्डचूलिका चेति भेदतः
॥ १८९ ॥

पात्रैर्यवनिकान्तःस्थैः केवलं या तु निर्मिता ।
आदावङ्कस्य मध्ये वा चूलिका नाम सा स्मृता
॥ १९० ॥

प्रवेशनिर्गमाभावादियमङ्काद् बहिर्गता ।
(१९१ क-ख)

अङ्कादौ चूलिका यथा अनर्घराघवे सप्तमाङ्के–(नेपथ्ये)

तमिस्रामूर्च्छालत्रिजगदगदंकारकिरणे
रघूणां गोत्रस्य प्रसवितरि देवे सवितरि ।
पुरःस्थे दिक्पालैः सह परगृहावासवचनात्
प्रविष्टा वैदेही दहनमथ शुद्धा च निरगात् ॥
(७. १)

इत्यादौ नेपथ्यगतैरेव पात्रैः सीताज्वलनप्रवेशनिर्गमादीनामर्थानां प्रयोगानुचितानां सूचनादियं चूलिका ।

अङ्कमध्ये यथा रत्नावल्यां द्वितीयाङ्के–(नेपथ्ये कलकलः)

कण्ठे कृत्तावशेषं कनकमयमधः शृङ्खलादाम कर्षन्
क्रान्त्वा द्वाराणि हेलाचलचरणरणत्किङ्किणीचक्रवालः ।

sūcanā. This is what is intended by Siṃhabhūpāla also. Abhinava's interpretation of *Cūlikā* seems to be different from that of Dhanaṃjaya and Dhanika. See *ABh.*, GOS, Vol. II, page 417.

[1] This division of *cūlikā* and *khaṇḍacūlikā* is not found in the *NŚ* or in the *DR*.

दत्तातङ्को[1] जनानामनुसृतसरणिः संभ्रमादश्वपालैः
प्रभ्रष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः ॥
(२. २)

अत्र नेपथ्यगतैः पात्रैः प्रयोगानुचितस्य वानरविप्लवाद्यर्थस्य सूचनादियं मध्यचूलिका ।

अथ खण्डचूलिका—

[2]रङ्गनेपथ्यसंस्थायिपात्रसंलापविस्तरैः ॥ १९१ ॥
(ग-घ)

आदौ केवलमङ्कस्य[3] कल्पिता खण्डचूलिका ।
प्रवेशनिर्गमाप्राप्तेरियमङ्काद् बहिर्गता ॥ १९२ ॥

यथा बालरामायणे सप्तमाङ्कस्यादौ, (ततः प्रविशति वैतालिकः कर्पूरचण्डः) वैतालिकः—भद्र चन्दनचण्ड परित्यज निद्रामुद्राम् । विमुञ्च निजोटजाभ्यन्तरम् ।

(नेपथ्ये) अय्य कप्पूरचंड एसा मिट्ठा पभादणिद्दा । सुविस्सं दाव । (आर्य कर्पूरचण्ड एषा मिष्टा प्रभातनिद्रा । स्वप्स्यामि तावत् ।)

[1] MS. 4 reads: *dattātaṅko janānām*; *RAS*-1, *RAS*-2 and MSS. 5 & 6 read: *dattātaṅko'ṅganānām*. Printed edn. of the *Ratnāvalī* reads: *gaṇānām*, for *janānām*. Some MSS. of the *Avaloka* on the *DR* read: *gajānām*.

[2] *RAS*-2 reads: *yatra nepathya-*, etc; *RAS*-1 and MSS. 4, 5, 6, 7 and 8 read: *raṅganepathya*, etc.; MSS. 9 and 10 read: *raṅganepathya-pārśvasthaiḥ pātraiḥ syāt khaṇḍacūlikā*. Excepting the difference in the first part, MSS. other than 9 & 10 read as given in the text.

[3] The five lines beginning with *ādau kevalam*, *praveśanirgama-*, *enām*, *apraviṣṭasya*, *tadviṣkambha-* respectively, are not found in MSS. 9 & 10. All others have them. Of these again, MSS. 7 & 10 read: *ādau kevalamadhye vā*. Others read: *ādau kevalam aṅkasya*.

कर्पूरचण्डः—अहो उत्साहशक्तिर्भवतः । अमन्त्रशीलो महीपतिः अपरप्रबन्धदर्शी कविः अपाठरुचिश्च वन्दी न चिरं नन्दति ।

(नेपथ्ये) ता एत्थ संत्थरत्थिदो णिमीलिदणअणो जेव्व सुप्पभादं पठिस्सं ।

(तदत्र संस्तरस्थितो निमीलितनयन एव सुप्रभातं पठिष्यामि ।)

कर्पूरचण्डः—एतदपि भवतो भूरि । तदुपश्लोकयावो रामभद्रम् । (किंचिदुच्चैः)

मार्तण्डैककुलप्रकाण्डतिलकस्त्रैलोक्यरक्षामणि-
विश्वामित्रमहामुनेर्निरुपधिः शिष्यो रघुग्रामणीः ।
रामस्ताडितताटकः किमपरं प्रत्यक्षनारायणः
कौसल्यानयनोत्सवो विजयतां भूकाश्यपस्यात्मजः ।।
(७. ३)

(नेपथ्ये)

कन्दप्पुद्दामदप्पप्पसमणगुरुणो बह्मणो कालदण्डे
पाणिं देंतस्स गंगातरलिदससिणो पव्वईवल्लहस्स ।
चावं चंडाहिसिंजारवहरिदणहं कर्षणारुद्धमज्झं
जं भग्गं तस्स सद्दो णिसुणिति हुअणे वित्थरंतो णमाइ ।
(७. ४)

(छाया—

कन्दर्पोद्दामदर्पप्रशमनगुरोर्ब्रह्मणः कालदण्डे
पाणिं दातुर्गङ्गातरलितशशिनः पार्वतीवल्लभस्य ।
चापं चण्डाभिशिञ्जारवभरितनभः कर्षणारुद्धमध्यं
यद् भग्नं तस्य शब्दो निःश्रूयते भुवने विस्तरन् न माति ।।

अत्र प्रविष्टेन कर्पूरचण्डेन यवनिकान्तर्गतेन चन्दनचण्डेन च पर्याय-प्रवृत्तवाग्विलासैस्ताटकावधादिविभीषणाभयप्रदानान्तस्य रामभद्र-चरितस्य बाहुल्यात् प्रयोगानुचितस्य सूचनादियं खण्डचूलिका ।

एनां विष्कम्भमेवान्ये[1] प्राहुर्नैतन्मतं मम ।
अप्रविष्टस्य संलापो विष्कम्भे न हि युज्यते ।। १६३ ।।
[2]तद्विष्कम्भशिरस्कत्वान्मतेयं खण्डचूलिका ।

अथाङ्कास्यम्–

पूर्वाङ्कान्ते संप्रविष्टैः पात्रैर्भाव्यङ्कवस्तुनः ।। १६४ ।।
सूचनं तदविच्छित्त्यै यत् तदङ्कास्यमीरितम् ।

[1] It is not clear to whom *anye prāhuḥ* refer and from whom Siṃhabhūpāla is noting his difference.

[2] The expression *viṣkambhaka* is noted in the printed edn. of the *Bālarāmāyaṇa* after the verse VII. 30. The portion from the entrance of *pratīhāra* mentioned as *praviśya apaṭīkṣepeṇa pratīhāraḥ*, after the verse VII. 15, is perhaps taken by Siṃhabhūpāla as *viṣkambhaka,* and the portion from the beginning of Act VII upto verse VII. 15 as the case of *Khaṇḍacūlikā,* as it involves a conversation between Karpūracaṇḍa, who appears on the stage, and Candanacaṇḍa, who does not appear on the stage at all. The printed edn., however, does not give the expression *Khaṇḍacūlikā,* which was of course not noted by other writers. The expression *viṣkambhaśiraska* is a *bahuvrīhi,* like *rephaśiraska* used by the grammarians referring to '*ar*' and '*ār*', (*guṇa* and *vṛddhi* in the place of ṛ). The expression seems to refer thus to *Khaṇḍacūlikā,* as it comes first, and then the *viṣkambhaka*. The significance of the ablative case in *viṣkambha-śiraskatvāt* is, however, not clear to me. This does not supply any reason for accepting the *Khaṇḍacūlikā* separately, which was given in the previous line. I therefore think that *tadviṣkambhaśiraskā ca* would be a better reading describing the *Khaṇḍacūlikā*. But the MSS. I collated read the ablative case clearly. See also the Introduction for a discussion on this and other *arthopakṣepaka-s*.

यथा हि वीरचरिते द्वितीयाङ्कावसानके ।। १९५ ।।
प्रविष्टेन सुमन्त्रेण सूचितं रामविग्रहे ।
वसिष्ठविश्वामित्रादिसमाभाषणलक्षणम् ।। १९६ ।।
वस्तूत्तराङ्के पूर्वार्थाविच्छेदेनैव कल्पितम् ।

अथाङ्कावतारः—

[1]अङ्कावतारः पात्राणां पूर्वकार्यानुवर्तिनाम् ।। १९७ ।।
अविभागेन सर्वेषां भाविन्यङ्के प्रवेशनम्[2] ।
द्वितीयाङ्के मालविकाग्निमित्रे स निरूप्यताम् ।।१९८।।
पात्रेणाङ्कप्रविष्टेन केवलं सूचितत्वतः ।
[3]भवेदङ्कादबाह्यत्वमङ्कास्याङ्कावतारयोः ।। १९९ ।।

अथ प्रवेशकः—

यन्नीचैः केवलं पात्रैर्भाविभूतार्थसूचनम् ।
अङ्कयोरुभयोर्मध्ये स[4] विज्ञेयः प्रवेशकः ।। २०० ।।
सोऽयं चेटिद्वयालापसंविधानोपकल्पितः ।
मालतीमाधवे प्राज्ञैर्द्वितीयाङ्के निरूप्यताम् ।। २०१ ।।
[5]असूच्यं तु शुभोदात्तरसभावनिरन्तरम् ।
प्रारम्भे यद्यसूच्यं स्यादङ्कमेवात्र कल्पयेत् ।। २०२ ।।

[1] MSS. 9 & 10 alone are seen to reproduce here from the *DR* the lines I. 62 and I. 60, defining *aṅkāvatāra* and *praveśaka*. Others read as given in the text.

[2] *RAS*-2 and MS. 5 read: *pradarśanam*; *RAS*-1 and MSS. 4, 6, 7, 8, 9 and 10 read: *praveśanam*.

[3] See the Introduction for a discussion on the question of *aṅkāntarbhāva* and *aṅkabahirbhāva*.

[4] See the *DR*, I. 60, and the *Avaloka* & *LṬ* thereon.

[5] See the *DR*, III. 28(cd), 29 and 30 (*yadā tu sarasaṃ vastu*, etc.).

रसालंकारवस्तूनामुपलालनकाङ्क्षिणाम् ।
[1]जनन्यङ्कवदाधारभूतत्वादङ्क उच्यते ॥ २०३ ॥
अङ्कस्तु पञ्चषैर्द्वित्रैरङ्गिनोऽङ्गस्य[2] वस्तुनः ।
रसस्य वा [3]समालम्बभूतैः पात्रैर्मनोहरः ॥ २०४ ॥
संविधानविशेषः स्यात् तत्रासूच्यं प्रपञ्चयेत् ।

(अथासूच्यविभागः)–

असूच्यं तद् द्विधा[4] दृश्यं श्राव्यं चाद्यं तु दर्शयेत् ॥ २०५ ॥
द्वेधा द्वितीयं स्वगतं प्रकाशं चेति भेदतः ।
स्वगतं स्वैकविज्ञेयं प्रकाशं तु द्विधा भवेत् ॥ २०६ ॥
सर्वप्रकाशं नियतप्रकाशं चेति भेदतः ।
सर्वप्रकाशं सर्वेषां स्थितानां श्रवणोचितम् ॥ २०७ ॥
[5]द्वितीयं तु स्थितेष्वप्येष्वेकस्य श्रवणोचितम् ।
द्विधा विभाव्यतेऽन्यच्च[6] जनान्तमपवारितम् ॥ २०८ ॥
त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम् ।

[1] *RAS*-2 and MS. 5 read *jananyaṅkavat*, etc.; *RAS*-1 and MSS. 4, 6, 7, 8, 9 and 10 read *janakāṅkavat*, etc. The *DR* has: *aṅko nānāprakārārthasaṃvidhānarasāśrayaḥ* (III. 31(ab)). Dhanika comments on this: ... *utsaṅga ivāṅkaḥ*. See also *LṬ* thereon.

[2] *RAS*-1 reads: *aṅkato'ṅgasya vastunaḥ*; others read: *aṅgino 'ṅgasya vastunaḥ*.

[3] Only *RAS*-1 reads: *rasasya vāsanālambabhūtaiḥ*! All others read clearly: *rasasya vā samālambabhūtaiḥ*.

[4] See the *DR*, I. 56, 63(cd) & 64, and *Avaloka & LṬ* thereon.

[5] The line *dvitīyaṃ tu*, etc. is missing in *RAS*-1.

[6] See the *DR*, I. 65, 66 and *Avaloka* and the *LṬ* thereon.

अन्येनामन्त्रणं यत् स्यात् तज्जनान्तिकमुच्यते ।।२०९।।
रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम् ।
[1]इत्थं श्राव्यं च दृश्यं च प्रयुज्य सुसमाहितैः ।। २१० ।।
पात्रैर्निष्क्रमणं कार्यमङ्कान्ते सममेव हि ।
[2]अङ्कच्छेदश्च कर्तव्यः कालावस्थानुरोधतः ।। २११ ।।
दिनार्धदिनयोर्योग्यमङ्के वस्तु प्रवर्तयेत् ।

(अथ गर्भाङ्कलक्षणम्)

अङ्कप्रसङ्गाद् गर्भाङ्कलक्षणं वक्ष्यते मया ।। २१२ ।।
रसनायकवस्तूनां महोत्कर्षाय कोविदैः ।
अङ्कस्य मध्ये योऽङ्कः स्यादयं गर्भाङ्क ईरितः ।।२१३।।
वस्तुसूचकनान्दीको दिङ्मात्रामुखसङ्गतः ।
अर्थोपक्षेपकैर्हीनश्चूलिकापरिवर्जितैः ।। २१४ ।।
[3]अनेष्यद्वस्तुविषयः पात्रैस्त्रिचतुरैर्युतः ।
[4]नातिप्रपञ्चेतिवृत्तः [5]स्वाधाराङ्काङ्गशोभितः
।। २१५ ।।

[1] Only *RAS*-1 reads: *idaṃ śrāvyaṃ ca dṛśyaṃ ca praviśya*, etc.; others read: *itthaṃ śrāvyam ca dṛśyaṃ ca prayujya*, etc.

[2] See *NŚ*, Vol. II, page 420 (verse 24, etc.) & p. 421.

[3] *RAS*-1 reads: *anveṣyavastuviṣayaḥ*; *RAS*-2 and MSS. 5 & 6 read: *anyeṣu vastuviṣaya* . . . and *vṛtaḥ*; MS. 4 reads: *anyaṣyadvastu-viṣayaḥ*, etc. MS. 10 reads: *aneṣyardhas tu viṣayaḥ*; MS. 9 reads: *aneṣyadvastuviṣayaḥ*, and I think that this is the correct reading.

[4] This line (*nātiprapañca*, etc.) is missing in *RAS*-2 and MSS. 7 & 8. Others have it.

[5] *RAS*-1 reads: *svādhārāṅkāntaśobhitaḥ*; others read: *svādhā-rāṅkāṅgaśobhitaḥ*.

प्रस्तुतार्थानुबन्धी च पात्रनिष्क्रमणावधिः ।
प्रथमाङ्के न कर्तव्यः सोऽयं काव्यविशारदैः ।। २१६ ।।
सोऽयमुत्तररामे[1] तु रसोत्कर्षाय कथ्यताम् ।
नेतुरुत्कर्षको ज्ञेयो बालरामायणे त्वयम् ।। २१७ ।।
अमोघराघवे सोऽयं वस्तूत्कर्षैककारणम् ।

(नाटके अङ्कनियमः)

नाटकेऽङ्का न कर्तव्याः [2]पञ्चन्यूना दशाधिकाः
।। २१८ ।।
तदीदृशगुणोपेतं नाटकं भुक्तिमुक्तिदम् ।
(२१९ क-ख)

तथा च भरतः–

धर्मार्थसाधनं[3] नाट्यं सर्वदुःखापनोदकृत् ।
आसेवध्वं तद् ऋषयस्तस्योत्थानं तु नाटकम् ।। इति ।

[1] This is the reference to the *Garbhanāṭaka* in the *Uttararāma-carita* in the seventh Act, which begins with *sūtradhāraḥ* and ends with (*iti niṣkrānte devyau sītā ca*) —Bālamanoramā Press edn. 1962, pp. 184-194.

[2] See *NŚ* Vol. II, page 421: *prakaraṇanāṭakaviṣaye pañcādyā daśaparā bhavanty aṅkāḥ*. Also see the *DR*, III. 38.

[3] The expression *tathā ca bharataḥ* is found in *RAS*-1 and MSS. 4 & 6 only. The portion from *dharmārthasādhanam* to *udāsmahe* (in III. 220) is missing in MSS. 7, 8, 9 & 10. The *Bhāvaprakāśa* says that these words are Pitāmaha's (not Bharata's). Compare: *nāṭyavedaṃ vidhāyādāv ṛṣīn āha pitāmahaḥ, dharmādisādhanaṃ nāṭyaṃ sarvaduḥkhāpanodanam. āsevadhvaṃ tad ṛṣayas tasyotthānaṃ tu nāṭakam* (page 238). Bahurūpamiśra (p. 132) and Sāgaranandin also quote these lines as Pitāmaha's. Sāgaranandin reads *anusevadhvam* instead of *āsevadhvam.* Also see *NŚ* Vol. I, page 28 (*dharmo dharmapravṛttānām*).

(पूर्णादिनाटकभेदानङ्गीकारः)

नाटकस्य तु पूर्णादिभेदाः[1] केचन कल्पिताः ।। २१९ ।।
(ग-घ)

तेषां [2]नातीव रम्यत्वादपरीक्षाक्षमत्वतः ।
मुनिनानादृतत्वाच्च तानुद्देष्टुमुदास्महे ।। २२० ।।

अथ प्रकरणम्—

यत्रेतिवृत्तमुत्पाद्यं धीरशान्तश्च नायकः ।
रसः प्रधानं शृङ्गारः शेषं नाटकवद् भवेत् ।। २२१ ।।
तद्धि [3]प्रकरणं शुद्धं धूर्तं मिश्रं च तत् त्रिधा ।
कुलस्त्रीनायिकं शुद्धं मालतीमाधवादिकम् ।। २२२ ।।
[4]गणिकानायिकं धूर्तं कामदत्ताह्वयादिकम् ।
कितवद्यूतकारादिव्यापारं त्वत्र कल्पयेत् ।। २२३ ।।
मिश्रं तत् कुलजावेश्ये कल्पिते यत्र नायिके ।
धूर्तशुद्धक्रमोपेतं तन्मृच्छकटिकादिकम् ।। २२४ ।।

[1] This seems to be the reference to what is attributed to Subandhu. See the following: *subandhur nāṭakasyāpi lakṣaṇaṃ prāha pañcadhā, pūrṇaṃ caiva praśāntaṃ ca bhāsvaraṃ lalitaṃ tathā, samagram iti vijñeyā nāṭake pañca jātayaḥ* (*Bh. Pra.* page 238). This is also referred to by Bahurūpamiśra (p. 133).

[2] *RAS*-2 reads: *teṣām anatiramyatvāt*; MSS. 5 & 6 read: *naiṣām atīvaramyatvāt*; *RAS*-1 and MS. 4 read: *teṣām nātīvaramyatvāt.*

[3] See the *DR*, III. 39, 40, 41 & 42.

[4] Regarding the *Prakaraṇa* types, *śuddha*, etc. there seem to be some differences in the details between the accounts of Dhanaṃjaya and Dhanika on the one hand, and of Siṃhabhūpāla on the other.

(नाटिकायाः न पृथग्रूपकत्वम्)

नाटिका त्वनयोर्भेदो न [1]पृथग् रूपकं भवेत् ।
प्रख्यातं नृपतेर्वृत्तं नाटकादाहृतं यतः ।। २२५ ।।
बुद्धिकल्पितवस्तुत्वं तथा प्रकरणादपि ।
विमर्शसंधिराहित्यं[2] भेदकं चेन्न तन्मतम् ।। २२६ ।।
रत्नावल्यादिके लक्ष्ये तत्संधेरपि दर्शनात् ।
स्त्रीप्रायचतुरङ्कादिभेदकं चेन्न तन्मतम् ।। २२७ ।।
एकद्वित्र्यङ्कपात्रादिभेदेनानन्तता यतः ।
देवीवशात् संगमेन भेदश्चेत् तन्न युज्यते ।
मालविकाग्निमित्रादौ नाटिकात्वप्रसङ्गतः ।। २२८ ।।
[3]प्रकरणिका-नाटिकयोरनुसरणीया हि नाटिकासरणिः ।
अत एव भरतमुनिना नाट्यं दशधा निरूपितं पूर्वम्
।। २२९ ।।

(अथोत्सृष्टिकाङ्कः)

[4]ख्यातेन वा कल्पितेन[5] वस्तुना प्राकृतैर्नरैः ।

[1] See the *DR*, III. 43, and the *Avaloka* and *LṬ* thereon. See also my Introduction to the *DR*, p. XLIX. The portion after *na pṛthag rūpakaṃ bhavet* upto *khyātena vā* (in III. 230 ab) is missing in MSS. 7, 8, 9 and 10.

[2] See the *DR*, III. 44(cd) and 45 and the *Avaloka* and *LṬ* thereon.

[3] *RAS*-1 and MS. 4 read: *prakaraṇikānāṭikayoḥ*; *RAS*-2 and MSS. 5 & 6 read: *prakaraṇikāsadṛśayoḥ*. (The meaning intended seems to be this. In both the instances—the so-called (by some)—*prakaraṇikā* and *nāṭikā*, the same method of *nāṭikā* must be followed; hence the method of not treating the instance as a separate type).

[4] See fn. 1 above.

[5] The *DR* and *Pratāparudrīya* mention only *prakhyātavastu* in the case of *Utsṛṣṭikāṅka*. Siṃhabhūpāla mentions *kalpitavastu* also. The *NŚ* says *prakhyātavastuviṣayastv aprakhyātaḥ kadācid eva syāt*; (Vol. II, p. 445).

अन्वितः कैशिकीहीनः [1]सात्त्वत्यारभटीमृदुः ।। २३० ।।
स्त्रीणां विलापव्यापारैरुपेतः करुणाश्रयः ।
नानासंग्रामसंनाहप्रहारमरणोत्कटः ।। २३१ ।।
मुखनिर्वाहवान् यः स्यादेकद्वित्र्यङ्क[2] इच्छया ।
उत्सृष्टिकाङ्कः स ज्ञेयः सविष्कम्भप्रवेशकः ।। २३२ ।।
अस्मिन्नमङ्गलप्राये कुर्यान्मङ्गलमन्ततः ।
प्रयोज्यस्य वधः कार्यः पुनरुज्जीवनावधिः ।। २३३ ।।
उज्जीवनादप्यधिकं मनोरथफलोऽपि वा ।
विज्ञेयमस्य लक्ष्यं तु करुणाकन्दलादिकम् ।। २३४ ।।

अथ व्यायोगः—

ख्यातेतिवृत्तसंपन्नो निःसहायकनायकः[3] ।
युक्तो [4]दशावरैः ख्यातैरुद्धतैः प्रतिनायकैः ।। २३५ ।।
विमर्शगर्भरहितो भारत्यारभटीस्फुटः ।
हास्यशृङ्गाररहित एकाङ्को रौद्रसंश्रयः ।। २३६ ।।
[5]एकवासरवृत्तान्तः प्राप्तविष्कम्भचूलिकः ।

[1] The *NŚ* has: *sāttvatyārabhaṭīkaiśikīhīnaḥ*, which is the reading commented on by Abhinava too.

[2] *RAS*-2 and MS. 5 read: *mukhanirvahaṇe yatra caiko'ṅko bhāṇavan mataḥ*; *RAS*-1 and MSS. 4, 6, 7, 8, 9 and 10 read: *ekadvitryaṅka icchayā*. The *DR* mentions: *bhāṇavat saṃdhivṛttyaṅkair yuktaḥ* (III. 71); and in Bhāṇa: *ekāṅkaṃ vastu*; this would mean *ekāṅkatā*. But Siṃhabhūpāla mentions :*ekadvitryaṅka icchayā*.

[3] See the *DR*, III. 60-61 and *NŚ* Vol. II, p. 444. Only *RAS*-2 reads: *tathā soddhatanāyakaḥ*. Others read: *niḥsahāyakanāyakaḥ*.

[4] *daśāvaraiḥ* is in the sense of 'with at least ten persons'.

[5] *RAS*-2 and MSS. 5 & 6 read: *evaṃsarasavṛttāntaḥ*; others read: *ekavāsaravṛttāntaḥ*; *NŚ* (II, p. 444) has: *ekāhakṛtaḥ*; the *DR*, III. 62(ab) reads: *ekāhacaritaikāṅkaḥ*.

अस्त्रीनिमित्तसमरो व्यायोगः कथितो बुधैः ।। २३७ ।।
विज्ञेयमस्य लक्ष्यं तु [1]धनंजयजयादिकम् ।

अथ भाणः–

[2]स्वस्य वान्यस्य वा वृत्तं विटेन निपुणोक्तिना ।। २३८ ।।
शौर्यसौभाग्यसंस्तुत्या वीरशृङ्गारसूचकम् ।
बुद्धिकल्पितमेकाङ्कं मुखनिर्वहणान्वितम् ।। २३९ ।।
वर्ण्यते भारतीवृत्त्या यत्र तं भाणमीरते ।
एकपात्रप्रयोज्येऽस्मिन् कुर्यादाकाशभाषितम् ।।२४०।।
[3]अन्येनानुक्तमप्यन्यो वचः श्रुत्वेव यद् वदेत् ।
इति किं भणसीत्येतद् भवेदाकाशभाषितम् ।। २४१ ।।
लास्याङ्गानि दशैतस्मिन् संयोज्यान्यत्र तानि तु ।
गेयपदं स्थितपाठ्यमासीनं [4]पुष्पगन्धिका ।। २४२ ।।
प्रच्छेदकस्त्रिमूढं[5] च सैन्धवाख्यं द्विमूढकम् ।
उत्तमोत्तमकं चान्यदुक्तप्रत्युक्तमेव च ।। २४३ ।।

अथ गेयपदम्–

वीणादिवादनेनैव सहितं यत्र भाव्यते ।
ललितं नायिकागीतं तद् गेयपदमुच्यते[6] ।। २४४ ।।

[1] Kāñcanācārya's *Dhanaṃjayavijaya* is the one mentioned here. Siṃhabhūpāla also quotes verses from this work (*gorakṣaṇam*, etc.) This work was published by NSP, 1939.

[2] See *NŚ* Vol. II, p. 449 and the *DR*, III. 49-53.

[3] This verse (*anyenānukta*, etc.) is missing in MS. 4.

[4] See *NŚ* Vol. III, p. 66 for *lāsyāṅga-s*, and Prof. A. K. Warder's *Indian Kāvya Literature*, Vol. I, item 363, and *ŚP* Vol. II, page 489. The *DR* reads: *puṣpagaṇḍikā* (also *NŚ*); MSS. of the *RAS* read: *puṣpagandhikā*.

[5] Some MSS. of the *DR* read: *trigūḍhaka & dvigūḍhaka*; all the MSS. of *RAS*-I used, read: *trimūḍha* and *dvimūḍha*.

[6] See *NŚ* Vol. III, page 67-68; XIX. 121 and the following.

[1]चञ्चत्पुटादिना वाक्याभिनयो नायिकाकृतः ।
भूमिचारीप्रचारेण स्थितपाठ्यं तदुच्यते ।। २४५ ।।
भ्रूनेत्रपाणिचरणविलासाभिनयान्वितम् ।
योज्यमासीनया पाठ्यमासीनं तदुदाहृतम् ।। २४६ ।।
नानाविधेन वाद्येन नानाताललयान्वितम् ।
लास्यं प्रयुज्यते यत्र सा[2] ज्ञेया पुष्पगन्धिका
।। २४७ ।।
अन्यासंगमशङ्किन्या नायकस्यातिरोषया ।
प्रेमच्छेदप्रकटनं लास्यं प्रच्छेदकं विदुः ।। २४८ ।।
अनिष्ठुरश्लक्ष्णपदं समवृत्तैरलंकृतम् ।
नाट्यं पुरुषभावाढ्यं त्रिमूढकमुदाहृतम् ।। २४९ ।।
देशभाषाविशेषेण चलद्वलयशृङ्खलम् ।
लास्यं प्रयुज्यते यत्र तत् सैन्धवमिति [3]स्मृतम्
।। २५० ।।
चारीभिर्ललिताभिश्च चित्रार्थाभिनयान्वितम् ।
स्पष्टभावरसोपेतं लास्यं यत् तद् द्विमूढकम् ।।
।। २५१ ।।
अपरिज्ञातपार्श्वस्थं गेयभावविभूषितम् ।
लास्यं सोत्कण्ठवाक्यं तदुत्तमोत्तमकं भवेत् ।।
।। २५२ ।।

[1] *RAS*-2 and MS. 5 read: *catuṣpadādinā vākyābhinayena pragīyate*. Others read as given in the text.

[2] The portion from *sā jñeyā puṣpagandhikā* to *saindhavam iti smṛtam* is missing in *RAS*-2 and MSS. 5 & 6.

[3] See the previous note.

कोपप्रसादजनितं साधिक्षेपपदाश्रयम् ।
वाक्यं तदुक्तप्रत्युक्तं यूनोः प्रश्नोत्तरात्मकम् ।। २५३ ।।
शृङ्गारमञ्जरीमुख्यमस्योदाहरणं[1] मतम् ।
लास्याङ्गदशकं तत्र लक्ष्यं लक्ष्यविचक्षणैः ।। २५४ ।।

अथ [2]समवकारः—

प्रख्यातेनेतिवृत्तेन नायकैरपि तद्विधैः ।
पृथक्प्रयोजनासक्तैर्मिलितैर्देवदानवैः ।। २५५ ।।
युक्तं द्वादशभिर्वीरप्रधानं [3]कैशिकीमृदु ।
त्र्यङ्कं विमर्शहीनं च कपटत्रयसंयुतम् ।। २५६ ।।
त्रिविद्रवं त्रिशृङ्गारं विद्यात् समवकारकम् ।
मोहात्मको भ्रमः प्रोक्तः कपटस्त्रिविधस्त्वयम् ।।
।। २५७ ।।
सत्त्वजः शत्रुजो दैवजनितश्चेति सत्त्वजः ।
क्रूरप्राणिसमुत्पन्नः शत्रुजस्तु रणादिजः ।। २५८ ।।
वात्यावर्षादिसंभूतो दैवजः कपटः स्मृतः ।

[1] *asya* means *bhāṇasya*.

[2] See *NŚ* Vol. II, page 436 and the following, and the *DR*, III. 62-68 (ab), and the *Avaloka* and the *LṬ* thereon.

[3] Only *RAS*-2 and MS. 5 read: *kaiśikīṃ ṛte* which is wrong. All others read: *kaiśikīmṛdu*; the *DR* notes: *vṛttayo mandakaiśikyaḥ*, etc. In this context Abhinava also explains the expression *kaiśikīhīnatā* as *kaiśikyāṃ vṛttau hīnatā=nyūnatā* (Vol. II, p. 440); Bhaṭṭanṛsiṃha in his *Laghuṭīkā* explains the expression *mandakaiśikī* of the *DR* as: *vṛttiṣu catasṛṣv api madhye kaiśikī svalpā abhidhātavyā* (page 163); *BPr.* says: *mṛdvī syāt kaiśikī*. See also Prof. V. Raghavan's paper on *Vṛtti-s* in JOR, Vol. VI, particularly page 356.

उदाहरणमेतेषामावेगे [1]लक्ष्यतां बुधैः ॥ २५९ ॥
[2]जीवग्राहोऽथ मोहो वा कपटाद् विद्रवस्ततः[3] ।
कपटत्रयसंभूतेरयं च त्रिविधो मतः ॥ २६० ॥
धर्मार्थकामसंबद्धस्त्रिधा शृङ्गार ईरितः ।

(धर्मशृङ्गारः)–

[4]व्रतादिजनितः कामो धर्मशृङ्गार ईरितः ॥ २६१ ॥
पार्वतीशिवसंभोगस्तदुदाहरणं मतम् ।

(अर्थशृङ्गारः)–

यत्र कामेन संबद्धैरर्थैरर्थानुबन्धिभिः ॥ २६२ ॥
भुज्यमानैः सुखप्राप्तिरर्थशृङ्गार ईरितः ।
[5]सार्वभौमफलप्राप्तिहेतुना वत्सभूपतेः ॥ २६३ ॥
रत्नावल्या समं भोगो विज्ञेया तदुदाहृतिः ।

[1] See *RAS*, II. 34, etc.

[2] The meaning of this cryptic line may become clear, if we see the following for the difference between *vidrava* and *kapaṭa*: *vastusvabhāvadaivārikṛtāḥ syuḥ kapaṭās trayaḥ, kapaṭasya svarūpaṃ tu bhramo mohātmakaḥ smṛtaḥ. vastusvabhāvakapaṭaḥ krūrasattvādisaṃbhavaḥ, daivikaḥ kapaṭo vahnivarṣavātādisambhavaḥ. śatrujaḥ kapaṭas tatra saṃgrāmādisamudbhavaḥ, vidravaḥ prāyaśas tadvat tayor bhedo'tra kathyate. jīvagrāho'tha moho vā kapaṭena prakāśyate, vidravas tu phalaṃ tattaddhetos tasmāt palāyanam* (*Bhāvaprakāśa*, p. 249). Abhinava explains *vidrava* and *kapaṭa* in his own way. See *ABh.*, Vol. II, page 439.

[3] MSS. seem to read: *smṛtaḥ*; I think *tataḥ* would make the meaning slightly better.

[4] *RAS*-1 reads: *vṛṣādijanitaḥ*, etc. ! *RAS*-2 and MSS. 5 & 6 read clearly: *vratādijanitaḥ*. The line is missing in MSS. 4, 7, 8, 9 and 10. Abhinava says: *dharmo yatra hetur vā sādhyo vā nāyikālābhe sa dharmaśṛṅgāraḥ* (Vol. II, p. 439). See also *BPr.* page 249.

[5] See *Abhinavabhāratī* on XVIII. 74 (Vol. II, p. 440). Commenting on *arthasyāptir yāsminn anekadhā bhavati so'rthaśṛṅgāraḥ*, Abhinava says: *anekadheti, rājyabhūmigosuvarṇādilābhena ity arthaḥ*, etc. See also *BPr.*, page 249.

(कामशृङ्गारः)–

दुरोदरसुरापानपरदारादिकेलिजः ।। २६४ ।।
तत्तदास्वादललितः[1] कामशृङ्गार ईरितः ।
तदुदाहरणं प्रायो दृश्यं [2]प्रहसनादिषु ।। २६५ ।।
शृङ्गारत्रितयं तत्र नात्र बिन्दुप्रवेशकौ ।
मुखप्रतिमुखे संधी वस्तु द्वादशनाडिकम् ।। २६६ ।।
प्रथमे कल्पयेदङ्के नाडिका घटिकाद्वयम् ।
[3]मुखादिसंधित्रयवांश्चतुर्नाडिकवस्तुकः ।। २६७ ।।
द्वितीयाङकस्तृतीयस्तु द्विनाडिककथाश्रयः ।
[4]निर्विमर्शचतुःसंधिरेवमङकास्त्रयः स्मृताः ।। २६८ ।।
[5]वीथीप्रहसनाङ्गानि कुर्यादत्र समासतः ।
प्रस्तावनायाः प्रस्तावे[6] प्रोक्तो वीथ्यङ्गविस्तरः ।।
।। २६९ ।।
दश प्रहसनाङ्गानि तत्प्रसङ्गे प्रचक्ष्महे ।
उदाहरणमेतस्य पयोधिमथनादिकम्[7] ।। २७० ।।

[1] See the *Bhāvaprakāśa* on page 250, *paradāradyūtasurā*, etc. In this context Abhinava refers to *yathā śakrasya ahalyā*. Sāgaranadin mentions one *Śakrānanda* as an example of *samavakāra* (2822), and Bahurūpamiśra also does so (p. 144). Abhinava's *yathā śakrasya ahalyā* is perhaps a reference to this *Śakrānanda-samavakāra*.

[2] Siṃhabhūpāla says that the *kāmaśṛṅgāra* is to be found in the *prahasana-s*.

[3] See *Bhāvaprakāśa*, page 249 and the *DR*, III. 65.

[4] There appears to be some difference in the accounts here between the *DR* and *BPr.* which Siṃhabhūpāla seems to follow.

[5] Siṃhabhūpāla is soon giving in detail the *aṅga-s* of *prahasana*.

[6] See *RAS* III. 170.

[7] *Ambhodhimathana*, *Payodhimathana*, *Amṛtamathana* are names mentioned by the writers of the example of *samavakāra*. *Śakrānanda*

अथ वीथी—

सूच्यप्रधानशृङ्गारा मुखनिर्वहणान्विता ।
[1]एकयोज्या द्वियोज्या वा कैशिकीवृत्तिनिर्मिता ॥
॥ २७१ ॥
वीथ्यङ्गसहितैकाङ्का वीथीति कथिता बुधैः ।
अस्यां प्रायेण लास्याङ्गदशकं योजयेन्न[2] वा ॥ २७२ ॥
सामान्या परकीया वा नायिकात्रानुरागिणी ।
वीथ्यङ्गप्रायवृत्तित्वान्नोचिता कुलपालिका ॥ २७३ ॥
लक्ष्यमस्यास्तु विज्ञेयं [3]माधवीवीथिकादिकम् ।

अथ प्रहसनम् —

वस्तुसंध्यङ्कलास्याङ्गवृत्तयो यत्र भाणवत् ॥ २७४ ॥
रसो हास्यः प्रधानं स्यादेतत् प्रहसनं मतम् ।
विशेषेण [4]दशाङ्गानि कल्पयेदत्र तानि तु ॥ २७५ ॥
[5]अवगलितावस्कन्दौ व्यवहारो विप्रलम्भ उपपत्तिः ।

was mentioned by Sāgaranandin and Bahurūpa, which was probably referred to by Abhinava too. See fn. 2, p. 428.

[1] The *NŚ* notes in this context: *ekahāryā dvihāryā vā*, on which Abhinava comments: *uktipratyukti-vaicitryeṇety arthaḥ* (Vol. II, p. 453). *RAS*-1 and MSS. 4, 7, 8, 9 and 10 read: *kaiśikīvṛttinirbharā*; *RAS*-2 and MSS. 5 & 6 read: *kaiśikīvṛttinirmitā*. The *Nāṭyadarpaṇa* says in this context: *śṛṅgārahāsyayoḥ sūcanāmātratvāt kaiśikīvṛttihīnatvam* (p. 117).

[2] See *BPr.*, page 251.

[3] The reading *Mādhavīvīthikādikam* is clear in all the MSS.

[4] Ten *aṅga-s* of *prahasana* are noted only by Siṃhabhūpāla. No other writer seems to mention these.

[5] *RAS*-1 and MSS. 4, 7, 9 & 10 read: *avalagita*; MS. 8 reads: *apavītam avaskando*, etc. *RAS*-2 and MSS. 5 & 6 read: *avagalitāvakandau*.

भयमनृतं विभ्रान्तिर्गद्गदवाक् च प्रलापश्च ।। २७६ ।।

तत्रावगलितम् –

पूर्वमात्मगृहीतस्य समाचारस्य मोहतः ।
दूषणं त्यजनं चात्र [1]द्विधावगलितं मतम् ।। २७७ ।।

यथा आनन्दकोशनामनि प्रहसने, [2]मिथ्यातीर्थः–

यानि [3]द्यन्ति गलादधः सुकृतिनो लोम्नां च तेषां स्थितिं
यान्यूर्ध्वं परिपोषयन्ति पुरुषास्तेषां मुहुः खण्डनम् ।
कृत्वा सर्वजगद्विरुद्धविधिना संचारिणां मादृशां
श्रीगीता च हरीतकी च हरतो हन्तोपभोग्यं वयः ।।

अत्र केनापि यतिभ्रष्टेन स्वगृहीतस्य यत्याश्रमस्य दूषणादिदमवगलितम् ।

त्यजनाद् यथा प्रबोधचन्द्रोदये, क्षपणकः–

अयि पीणघणत्थणसोहणि पलितत्थकुलंगविलोअणि ।
जइ लमसि कावालिणीभावेहिं सावका किं कलिस्संदि।
(३. १८)

अहो कावालिणीअदंसणं जेव्व एक्कं सौक्खमोक्खसाहणम् । (प्रकाशम्) भो कावालिअ हग्गे तुहके संपदं दासो संवुत्तो। मं पि महाभैरवानुसासणे दिक्खय ।)

[1] Here also *RAS-2* and MSS. 5 & 6 read: *avagalita*; others: *avalagita*.

[2] The name Mithyātīrthaḥ is found in *RAS*-2 and MSS. 5 & 6; it is missing in *RAS*-1 and MS. 4.

[3] *dyanti* is from the root *do=avakhaṇḍane* (*divādi*). The idea conveyed in this verse seems to indicate the custom prevailing in those days of growing beard and growing hair on the head, and the contrary custom in the case of mendicants.

(छाया–

अयि पीनघनस्तनशोभने परित्रस्तकुरङ्गविलोचने ।
यदि रमसे कापालिनीभावैः श्रावकाः किं करिष्यन्ति ।।

अहो कापालिनीदर्शनमेव एकं सौख्यमोक्षसाधनम् । (प्रकाशम्) भोः कापालिक अहं तव सांप्रतं दासः संवृत्तः । मामपि महाभैरवानुशासने दीक्षय ।)–इत्यादौ क्षपणकस्य स्वमार्गपरिभ्रंशः अवगलितम् ।

अथावस्कन्दः–

अवस्कन्दस्त्वनेकेषामयोग्यस्यैकवस्तुनः ।
संबन्धाभासकथनात् स्वस्वयोग्यत्वयोजना ।। २७८ ।।

यथा प्रहसने (आनन्दकोशनामनि)–

यतिः– साक्षाद्भूतं वदति [1]कुचयोरन्तरं द्वैतवादं

(मिथ्यातीर्थः)

बौद्धः– [2]दृष्ट्योर्भेदः क्षणिकमहिमा सौगते [3]दत्तपादः ।
जैनः– बाह्वोर्मूले[4] नयति शुचितामार्हती कापि [5]दीक्षा
सर्वे– नाभेर्मूलं प्रथयति फलं सर्वसिद्धान्तसारम् ।।

[1] *RAS*-2 and MSS. 5 & 6 read: *sākṣādbhūtā vadati kucayor vṛddhir advaitavādam*; *RAS*-1 and MS. 4 read: *sākṣādbhūtaṃ vadati kucayor antaraṃ dvaitavādam*. The copyists of these MSS. perhaps belonged to one or the other of the two schools: *advaita* and *dvaita*!

[2] *RAS*-1 and MS. 4 read: *bhāvo bodhakṣaṇikamahimā*; *RAS*-2 and MSS. 5 & 6 read: *dṛṣṭyor bhedah*, etc.

[3] *dattapādaḥ* is not in the sense of 'step over' or 'to kick with foot'. But it seems to be in the sense of 'to set foot' or 'to accept the system'. A Sanskritized regional idiom (in vogue even now).

[4] *mūle* seems to be accusative dual (neuter); only MS. 4 seems to read: *bāhvonnīlam.*

[5] Only *RAS*-1 reads: *kācid īkṣā*; *RAS*-2 and MSS. 4, 5 & 6 read *kāpi dīkṣā.*

अत्र यतिबौद्धजैनानां गणिकायां स्वस्वसिद्धान्तधर्मसंबन्धकथनेन स्वस्वपक्षपरिग्रहयोग्यत्वयोजनादवस्कन्दः ।

अथ व्यवहारः–

व्यवहारस्तु संवादो द्वित्राणां हास्यकारणम् ।

(२७९ क-ख)

यथा तत्रैव प्रहसने (आनन्दकोशनामनि)–बौद्धः (यतिं विलोक्य)–
कुतो मुण्डः एकदण्डी ।

मिथ्यातीर्थः–(विलोक्य दृष्टिमपकर्षन् आत्मगतम्)–
क्षणिकवादी [1]न संभाषणीय एव। तथापि दण्डमन्तर्धाय निरुत्तरं करोमि। (प्रकाशम्) अये [2]शून्यवादिन् अदण्डः अमुण्डोऽहमागलादस्मि।
जैनः–(आत्मगतम्) नूनमसौ मायावादी। भवतु। अहमपि किमप्य-न्तर्धाय प्रस्तुतं पृच्छामि। (प्रकाशम्) अये [3]महापरिमाणवादिन् बृहद्बीज लोम्नां समानजातीयत्वेऽपि केषांचित् संकर्तनम् अन्येषां संरक्षणमिति व्यवस्थितौ किं [4]प्रमाणम् ।

[1] *RAS*-1 (also MS. 4 seems so) reads: *na saṃbhāṣaṇīya eva*; *RAS*-2 and MS. 5 do not have *na*; MS. 6 reads: *saṃbhāṣaṇīya eva na*.

[2] From *śūnyavādin* to next *aye mahāparimāṇa*, etc. is missing in *RAS*-2 and MSS. 5 & 6. Also *RAS*-2 reads: *adaṇḍo muṇḍo'ham āgalād*; MS. 4 reads: *veṇudaṇḍaḥ muṇḍo'hamaṅgalād asmi*. Perhaps it should be *amuṇḍaḥ āgalād asmi*. See the verse *yāni dyanti*, etc. (fn. 3, p. 430).

[3] *RAS*-1 reads: *mahāpariṇāmavādin*; MS. 4 reads: *mahāparimāṇa-vādin*; *RAS*-2 and MS. 5 read: *mahāparimāṇavān*; MS. 6 reads: *mahāparimāṇamān*.

[4] *RAS*-1 and MS. 4 read: *vyavasthiteḥ kiṃ kāraṇam*; *RAS*-2 and MS. 5 read: *vyavasthitau kiṃ pramāṇam*; MS. 6 reads: *vyavasthitau kiṃ kāraṇam*.

मिथ्यातीर्थः– जीवदमेध्यं [1]जङ्गमनरको नरपिशाचोऽयम् अन्तर्धयापि न संभाषणीयः ।

निष्कच्छकीर्तिः (सादरम्)–सखे आर्हतमुने वादे त्वया अयमप्रतिपत्तिं नाम निग्रहस्थानमारोपितो [2]मायावादी ।

मिथ्यातीर्थः (आत्मगतम्)–नूनमिमावपि मादृशावेव लिङ्गधारणमात्रेण कुक्षिभरी स्याताम् । (इति पिप्पलमूलवेदिकायां निषीदति)–

इत्यत्र यतिबौद्धजैनानां संवादो व्यवहारः ।

अथ विप्रलम्भः–

विप्रलम्भो वञ्चना स्याद् भूतावेशादिकैतवात्

।। २७६ ।।

(ग-घ)

यथा प्रहसने (आनन्दकोशनामनि तत्रैव)–

प्रियामहं [3]पूर्वभृतां नाम्ना [4]स्वच्छन्दभक्षिणी ।
[5]गृह्णाम्येनां यदि त्रातुं कृपा वः श्रूयतामिदम् ।।

[1] *RAS*-1 reads: *jīvadamedhyam aṅgaṃ dhārako*; MS. 4 is defective here; *RAS*-2 and MSS. 5 & 6 read *jīvadamedhyaṃ jaṅgamanarakaḥ*, etc.

[2] *RAS*-2 reads merely *vādī*; *RAS*-1 and MS. 4 read: *māyāvādī*; MSS. 5 & 6 read: *maghavādī*, which is perhaps a scribal error for *māyāvādī*.

[3] *RAS*-1 and MS. 4 read: *priyāhaṃ sarvabhūtānām*. This half verse is missinig in *RAS*-2; MS. 5 reads: *priyaṃ pūrvabhṛtaṃ nāmnā svacchandabhakṣiṇī*; MS. 6 reads: *priyāṃ pūrvabhṛtāṃ nāmbā*, etc. Perhaps it should be: *priyām ahaṃ pūrvabhṛtām*, etc. (in the sense, *mama priyām=iṣṭām, pūrvam eva bhṛtām=dhṛtām*, etc.)

[4] MS. 4 alone reads: *svacchandabhāṣiṇī*.

[5] *RAS*-1 and MS. 4 read: *enam*; *RAS*-2 and MSS. 5 & 6 read: *enām* (feminine form).

सुराघटानां सप्तत्या[1] विंशत्या दृप्तगड्डुरैः ।
छागैश्च दशभिः कार्या चिरण्टीतर्पणक्रिया ।।
अद्य कर्तुमशक्यं चेत् तत्पर्याप्ततमं धनम् ।
आस्थाप्यमस्याः साक्षिण्याः[2] जरठायाः [3]पटाञ्चले ।।

(इति पुनरपि व्यात्तवदनं नृत्यति ।)

निष्कच्छकीर्तिः[4]–(हे) व्रतिनौ किमत्र विधेयम् ।

मिथ्यातीर्थः– प्रत्याम्नायपक्ष [5]एव युज्यते ।

अरूपाम्बरः– किं करोमि । न किमपि हस्ते पणादिकं (विद्यते) (प्रकाशम्)– भोः जीवहिंसाकृते प्रत्याम्नायकरणमपि न मे संमतम् ।

मिथ्यातीर्थः–भोः अहिंसावादिन् . . . म्रियमाणः[6] प्राणी न रक्षणीय इति किं युष्मद्धर्मः ।

अरूपाम्बरः (साक्षेपम्)– एकेन सुखमुपादेयम् । अन्येन धनं प्रदेयमिति किं युष्मद्धर्मः ।

[1] *RAS*-1 reads: *sahasrasaptatyā drptagaḍḍuraiḥ*; MS. 4 reads: *sahasrasya saptatyā saptagaḍḍuraiḥ*; *RAS*-2 and MSS. 5 & 6 read: *surāghaṭānāṃ saptatyā viṃśatyā raktagaḍḍuraiḥ*; *drpta* also may be correct, which means=*puṣṭa*.

[2] *RAS*-1 and MS. 4 read *yakṣiṇyā*; *RAS*-2 and MSS. 5 & 6 read *sākṣiṇyāḥ*.

[3] *RAS*-1 and MS. 4 read *padāñcale*—; *RAS*-2 and MSS. 5 & 6 read *paṭāñcale*.

[4] *RAS*-1 reads: *niṣkacchakīrtivratinau—kimuta vidheyam*, etc. I think it is the question put by Niṣkacchakīrti to the two ascetics, namely Mithyātīrtha and Arūpāmbara (Jaina).

[5] *pratyāmnāya* seems to be in the sense of 'the second command' or injunction, that is 'paying the required money', instead of sacrificing the sheep and the goats, and of offering the *surāghaṭc-s*.

[6] *RAS*-1 reads: *dhriyamāṇaḥ*; *RAS*-2 and MSS. 5 & 6 (MS. 4 also seems so) read: *mriyamāṇaḥ*.

(निष्कच्छकीर्तिः सान्तर्हासं स्वधनं यतिधनं च जरठायाः पटाञ्चले बद्ध्वा सबलात्कारं जैनस्य कटकं[1] तस्याः पादमूलेऽर्पयति ।)

मधुमल्लिका (साङ्गभङ्गं सस्मरणभयमिव)– अम्मो देवदा विलंबेण[2] कुप्पिस्सदि । ता चिरंटिआतप्पणं कादुं गच्छेमि । (छाया– अम्हो देवता विलम्बेन कोपिष्यति । तत् चिरण्टिकातर्पणं कर्तुं गच्छामि ।)

(इति [3]कटकमादाय निष्क्रान्ता ।)

इत्यादौ भूतावेशकैतवेन जैनबौद्धसंन्यासिनो विलोभ्य धनं कयापि गणिकया गृहीतमित्ययं विप्रलम्भः ।

अथोपपत्तिः–

उपपत्तिस्तु सा प्रोक्ता यत् प्रसिद्धस्य वस्तुनः ।
लोकप्रसिद्धया युक्त्या साधनं हास्यहेतुना ॥ २८०॥

यथा तत्रैव प्रहसने (आनन्दकोशनामनि), मिथ्यातीर्थः–

(पुरोऽवलोक्य) अये उपसरित्तीरं पिप्पलनामा वनस्पतिः यश्च गीतासु[4] भगवता निजविभूतितया निर्दिष्टः । (विचिन्त्य)

[1] *RAS*-1 reads: *kaṭakam*; MS. 4 reads: *kaṭam*; *RAS*-2 reads: *jainasya tat paṭam*; MSS. 5 & 6 read: *jainasya nikaṭam.*

[2] *RAS*-1 reads: *vipralambheṇa*; others are corrupt; perhaps it is *vilambena.*

[3] *RAS*-2 reads: *paṭam ādāya*; MSS. 5 & 6 read: *kopaṭam ādāya*; *RAS*-1 and MS. 4 read: *kaṭakam ādāya.*

[4] In the tenth chapter of the *Gītā* Arjuna requests Kṛṣṇa thus: *vaktum arhasy aśeṣeṇa divyā hy ātmavibhūtayaḥ, yābhir vibhūtibhir lokān imāṃs tvaṃ vyāpya tiṣṭhasi* (X. 16). In compliance with this request Kṛṣṇa narrates a number of divine manifestations (*ātmavibhūti-s*). The narration begins thus: *hanta te kathayiṣyāmi divyā hy ātmavibhūtayaḥ, ... aham ātmā guḍākeśa sarvabhūtāśayasthitaḥ,* etc. (X. 19-20). In the course of this narration of *nijavibhūti,* the

कथमस्य तरोरियती[1] महिमसंभावना। (विमृश्य) उपपद्यत एव

तत् पदं तनुमध्याया येनाश्वत्थदलोपमम् ।
तदश्वत्थोऽस्मि[2] वृक्षाणामित्यूचे भगवान् हरिः ॥

इति ।

अत्र लोकप्रसिद्धेन अश्वत्थदलोरुमूलयोः साम्येन हेतुना लोकप्रसिद्धस्यैव भगवदश्वत्थयोरैक्यस्य साधनं हास्यकारणमुपपत्तिः ।

अथ भयम्—

स्मृतं भयं तु नगरशोधकादिकृतो दरः ।

(२८१ क-ख)

यथा तत्रैव प्रहसने (आनन्दकोशनामनि),

जैनः— अहो [3]अराजकोऽयं विषयः यत् नगरपरिसराश्रिततपस्विनां धनं चोर्यते (इत्युद्बाहुराक्रोशति)। नगररक्षकाः—अये किमपहृतं धनम्। कियत् (इति तं परितः प्रविश्य परिसर्पन्ति)

verse 26 of the chapter reads thus: *aśvatthaḥ sarvavṛkṣāṇām* (*aham asmi*). This is the statement to which reference is made by Mithyātīrtha here (by the line *tad aśvattho'smi vṛkṣāṇām ity ūce bhagavān hariḥ*).

[1] *RAS*-1 and MS. 4 read: *iyam atimahimasaṃbhāvanā*; *RAS*-2 and MSS. 5 & 6 read: *iyatī mahimasaṃbhāvanā.*

[2] See fn. 4, p. 435, and the *Gītā* X. 26. In the course of the description of different limbs of Damayantī, Śrīharṣa has the following: *aṅgena kenāpi vijetum asyā gaveṣyate kiṃ calapatrapatram* (*Naiṣadha*, VII. 91). Amara notes: *bodhidrumaś caladalaḥ pippalaḥ kuñjarāśanaḥ, aśvatthe. . . . . .*

[3] *RAS*-1 and MS. 4 read: *sarājakaḥ*; *RAS*-2 and MSS. 5 & 6 read: *arājakaḥ*.

अरूपाम्बरः—धिक् कष्टम्। नगरशोधकाः समायान्ति। (इत्यूर्ध्वबाहुरोष्ठस्पन्दनं[1] करोति। मिथ्यातीर्थो गणिकामाक्षिप्य समाधिं नाटयति। निष्कच्छकीर्तिरेकपादेनावतिष्ठमानः [2]कराङ्गुलीर्गणयति)—इत्यादौ जैनादीनां भयकथनाद् भयम्।

अथानृतम्—

अनृतं तु भवेद् [3]वाक्यमसभ्यस्तुतिगुम्फितम् ॥२८१॥

(ग-घ)

तदेवानृतमित्याहुरपरे[4] स्वमतस्तुतेः[5]।

(२८२ क-ख)

यथा तत्रैव प्रहसने (आनन्दकोशनामनि)—

बालातपेन परिमृष्टमिवारविन्दं
माञ्जिष्ठचेलमिव मान्मथमातपत्रम्।
सालक्तलेखमिव सौख्यकरण्डमद्य
यूनां मुदे तरुणि तत् पदमार्तवं ते ॥

अत्र आर्तवारुणस्योरुमूलस्य (असभ्यस्य) वर्णनादिदमनृतम्।
अपरं यथा कर्पूरमञ्जर्याम्, भैरवानन्दः—

[1] This *oṣṭhaspandana* (movement of lips) is the pretence of doing some *japa* (silent meditation with chanting of some *mantra* mentally).

[2] Counting of fingers is counting thereby of the number of times of the repetition of some *mantra* like *Gāyatrī*.

[3] *RAS*-1 and MSS. 4, 7, 8, 9 and 10 read: *asatyastuti*, etc. *RAS*-2 and MSS. 5 & 6 read: *asabhyastuti*, which is suitable in the context.

[4] The expression *apare* seems to indicate that these *prahasanāṅga-s* were discussed by others also, though not traceable.

[5] *RAS*-2 and MSS. 5, 6, 7 and 8 read: *svamatasthiteḥ*; *RAS*-1 and MSS. 4, 9 and 10 read: *svamatastuteḥ*.

रंडा चंडा [1]दिक्खिदा धम्मदारा
मज्जं मंसं पिज्जए खज्जए अ ।
भिक्खा भोज्जं चम्मखण्डं च सेज्जा
कोलो धम्मो कस्स णो भादि रम्मो ।। (१. २३)

(छाया–
रण्डा चण्डा दीक्षिता धर्मदारा
मद्यं मांसं पीयते खाद्यते च ।
भिक्षा भोज्यं चर्मखण्डं च शय्या
कौलो धर्मः कस्य नो भाति रम्यः ।।

अथ विभ्रान्तिः–

वस्तुसाम्यकृतो मोहो विभ्रान्तिरिति गीयते ।। २८२।।
(ग-घ)

यथा तत्रैव प्रहसने (आनन्दकोशनामनि), बौद्धः (पुरोऽवलोक्य)–
हेमकुम्भवती रम्यतोरणा चारुदर्पणा ।
कापि गन्धर्वनगरी दृश्यते भूमिचारिणी ।।

जैनः–अये क्षणभङ्गवादिन् एतदुत्पातफलं प्रथमदर्शिनो भवत एव परिणमेत् ।

(इति लोचने निमीलयति)

बौद्धः (पुनर्निर्वर्ण्य)–हन्त किमपदे भ्रान्तोऽस्मि ।
न पुरीयं विशालाक्षी न तोरणमिमे भ्रुवौ ।
न दर्पणमिमौ गण्डौ न च कुम्भाविमौ स्तनौ ।।

[1] This verse (*raṇḍā caṇḍā*, etc.) is cited by Dhanika as an illustration of *prapañca*, one of the *vīthyaṅga-s*. See the *DR*, III. 15 (cd). See also *RAS* III. 175 (cd).

इत्यत्र बौद्धस्य मोहो विश्रान्तिः ।

अथ गद्गदवाक्—

असत्यरुदितोन्मिश्रं वाक्यं गद्गदवाग् भवेत् ।

(२८३ क-ख)

यथा तत्रैव प्रहसने (आनन्दकोशनामनि), (भगिन्यौ परस्परमाश्लिष्य रुदित इव)

गुह्यग्राही—(आत्मगतम्)

[1]अनुपात्तबाष्पकणिकं गद्गदनिःश्वासकलितमव्यक्तम् ।
अनयोरसत्यरुदितं सुरतान्तदशां व्यनक्तीव ।।

अत्र गद्गदवाक्त्वं स्पष्टमेव ।

अथ प्रलापः—

प्रलापः स्यादयोग्यस्य योग्यत्वेनानुमोदनम् ।। २८३ ।।

(ग-घ)

यथा तत्रैव प्रहसने (आनन्दकोशनामनि)

राजा (सौदार्योद्रेकम्)—अये बिडालाक्ष अस्मदीये नगरे विषये च

पतिहीना च या नारी जायाहीनश्च यः पुमान् ।
तौ दम्पती यथाकामं भवेतामिति घुष्यताम् ।।

बिडालाक्षः—देवः प्रमाणम् । (इति सानुचरो निष्क्रान्तः)

गुह्यग्राही (सश्लाघागौरवम्)—

[1] *RAS*-2 reads: *anupāti bāṣpakaṇṭhī gadgadaniḥśvāsakalikayā yuktam.* MSS. 5 & 6 seem to read: *anupātabāṣpakaṇikam. . . . kalikam ayuktam*; *RAS*-1 and MS. 4 read as given in the text.

[1]नष्टाश्वभग्नशकटन्यायेन प्रतिपादितम् ।
उचिता ते महाराज सेयं कारुण्यघोषणा ।।

अपि च

मन्वादयो महीपालाः शतशो गामपालयन् ।
न केनापि कृतो मार्ग एवमाश्चर्यसौख्यदः ।।

अत्र अयोग्यस्यापि राजादेशस्य धर्माधिकारिणा गुह्यग्राहिणा न्यायपरिकल्पनया योग्यत्वेनानुमोदनादयं प्रलापः ।

(प्रहसनस्य शुद्धादिभेदाः)

शुद्धं कीर्णं वैकृतं च तच्च प्रहसनं त्रिधा ।
शुद्धं [2]श्रोत्रियशाखादेर्वेषभाषादिसंयुतम् ।। २८४ ।।
चेटचेटीजनव्याप्तं [3]तल्लक्ष्यं तु निरूप्यताम् ।
आनन्दकोशप्रमुखं तथा [4]भगवदज्जुकम् ।। २८५ ।।

[1] For the *naṣṭāśvadagdharathanyāya*, see the *Mahābhāṣya*: *naṣṭ-āśvadagdharathavat samprayogo bhavati; tad yathā—tavāśvo naṣṭo, mamāpi ratho dagdhaḥ; ubhau samprayujyāvahai iti.* (*MBh.*, NSP edn. Vol. I, p. 424; I. 1. 50)

[2] *RAS*-1 and MSS. 4. 9 and 10 read: *śrotriyavākyādeḥ*; *RAS*-2 and MSS. 5, 6, 7 & 8 read: *śrotriyaśākhādeḥ*.

[3] In *RAS*-1 and MSS. 4, 9 and 10, the portions are missing. Consequently they only read: *kīrṇaṃ lakṣyaṃ nirūpyatām*; *RAS*-2 and MSS. 5, 6, 7 and 8, and Adyar Palm-leaf MS. no. 1820 (Telugu script) clearly read these portions (only in Adyar MS. there are some syllables lost).

[4] As a result of the missing of the portions, *RAS*-1 and MSS. 4, 9 and 10 do not mention the *Bhagavadajjuka*. But *RAS*-2 and MSS. 5, 6, 7 and 8 clearly mention the play *Bhagavadakjjuka* as an example of the *śuddhaprahasana*. MSS. 11&12 (of Madras Govt. Oriental MSS. Library) and 14 (of Adyar Library) read: *bhagavarjunau*, which is a mistake of the scribe, who probably did not know about the *Bhagavadajjuka*. See also the Introduction for a discussion on the type to which the *Bhagavadajjuka* belongs.

कीर्णं तु सर्वैर्वीथ्यङ्गैः संकीर्णं धूर्तसंकुलम् ।
तस्योदाहरणं ज्ञेयं बृहत्सौभद्रकादिकम्[1] ।। २८६ ।।
यच्चेदं कामुकादीनां वेषभाषादिसंगतैः ।
षण्डतापसवृद्धाद्यैर्युतं तद् वैकृतं भवेत् ।। २८७ ।।
कलिकेलिप्रहसनप्रमुखं[2] तदुदाहृतम् ।

अथ डिमः[3]—

ख्यातेतिवृत्तं निर्हास्यशृङ्गारं रौद्रमुद्रितम् ।। २८८ ।।
[4]सात्त्वतीवृत्तिविरलं भारत्यारभटीस्फुटम् ।
नायकैरुद्धतैर्देवयक्षराक्षसपन्नगैः ।। २८९ ।।
गन्धर्वभूतवेतालसिद्धविद्याधरादिभिः ।
समन्वितं षोडशभिर्न्यायमार्गणनायकम्[5] ।। २९० ।।
चतुर्भिरङ्कैरन्वीतं निर्विमर्शकसंधिभिः ।
निर्घातोल्कोपरागादिघोरक्रूराजिसंभ्रमम् ।। २९१ ।।

[1] This seems to have been referred to by the *Bhāvaprakāśa*. See footnote 2 on page 247 of the *BPra*. See also the Introduction to the *RAS* (as mentioned in the previous note).

[2] This *kalikeliprahasana* is also mentioned by Śāradātanaya. See *BPra.*, p. 247. He also mentions one *Sāgarakaumudī* as an example of *śuddhaprahasana*. It is strange that he does not mention the *Bhagavadajjuka* for any type.

[3] See *NŚ* Vol. II, pp. 443-444, and the *DR*, III. 57, 58, 59 and 60 (ab).

[4] *RAS*-1 and MS. 4 read: *kaiśikīvṛttiviralam*; *RAS*-2 and MSS. 5 and 6 read: *sāttvatīvṛttiviralam*; MS. 8 reads: *sāttvatīvṛttivikalam*; MSS. 7, 9 and 10 seem to reproduce *kārikā-s* on *ḍima* and *īhāmṛga* from the *Daśarūpaka*. The *Bhāvaprakāśa* has *kaiśikīvṛttirahitam* (p. 247).

[5] The *Bhāvaprakāśa* has *prakhyātavastuviṣayo nyāyamārgaṇanāyakaḥ* (p. 247).

सप्रवेशकविष्कम्भचूलिकं हि डिमं विदुः ।
अस्योदाहरणं ज्ञेयं वीरभद्रविजृम्भणम् ।। २६२ ।।

अथ ईहामृगः–

यत्रेतिवृत्तं मिश्रं स्यात् सविष्कम्भप्रवेशकम् ।
चत्वारोऽङ्का निर्विमर्शगर्भाः स्युः संधयस्त्रयः ।।
।।२६३।।
धीरोद्धतश्च प्रख्यातो दिव्यो मर्त्योऽपि नायकः ।
[1]दिव्यस्त्रियमनिच्छन्तीं कन्यां वाहर्तुमुद्यतः ।। २६४ ।।
स्त्रीनिमित्ताजिसंरम्भः पञ्चषाः प्रतिनायकाः ।
रसा निर्भयबीभत्सा [2]वृत्तयः कैशिकीं विना ।।२६५।।
स्वल्पस्तस्याः प्रवेशो वा सोऽयमीहामृगो मतः ।
व्याजान्निवारयेदत्र संग्रामं भीषणक्रमम् ।। २६६ ।।
तस्योदाहरणं ज्ञेयं प्राज्ञैर्मायाकुरङ्गिका ।[3]
इत्थं श्रीसिंहभूपेन सर्वलक्षणशालिना ।। २६७ ।।
सर्वलक्षणसंपूर्णो लक्षितो रूपकक्रमः ।

अथ नाटकपरिभाषा

अथ रूपकनिर्माणपरिज्ञानोपयोगिनी ।। २६८ ।।

[1] See the *DR*, III. 74 and *NŚ* Vol. II, p. 442.

[2] *RAS*-1 and MS. 4 read: *nirbhara*, etc.; *RAS*-2 and MSS. 5, 6 and 8 read: *nirbhaya*, etc.

[3] Sāgaranandin mentions one *Kundaśekharavijaya* as the example for the *īhāmṛga*, where *Bhāvaprakāśa* mentions one *Kusumaśekhara* (p. 253).

श्रीसिंहधरणीशेन परिभाषा [1]निरूप्यते ।
परिभाषात्र मर्यादा पूर्वाचार्योपकल्पिता ॥ २९९ ॥
सा हि नौरतिगम्भीरं विविक्षोर्नाट्यसागरम् ।
एषा च भाषानिर्देशनामभिस्त्रिविधा मता ॥ ३०० ॥
तत्र भाषा द्विधा भाषा विभाषा चेति भेदतः ।
चतुर्दश विभाषाः स्युः प्राच्याद्या[2] वाक्यवृत्तयः ॥
॥ ३०१ ॥
आसां संस्कारराहित्याद् विनियोगो न कथ्यते ।
उत्तमादिषु तद्देशव्यवहारात् प्रतीयताम् ॥ ३०२ ॥
भाषा द्विधा संस्कृता च प्राकृती चेति भेदतः ।
कौमारपाणिनीयादिसंस्कृता संस्कृता मता ॥ ३०३ ॥
इयं तु देवतादीनां मुनीनां नायकस्य च ।
विप्रक्षत्रवणिक्शूद्रमन्त्रिकञ्चुकिनामपि ॥ ३०४ ॥
लिङ्गिनां च विटादीनामनीचानां[3] प्रयुज्यते ।

अथ प्राकृती—

प्रकृतेः संस्कृतायास्तु[4] विकृतिः प्राकृती मता
॥ ३०५॥

[1] The contents of this portion on *nāṭakaparibhāṣā*, which is not a separate work, but forms the last part of the *RAS*, are for the most part taken from the 17th Chapter (GOS) of the *NŚ*= *Vāgaṅgābhinayādhyāya*, though there are slight variations sometimes.

[2] The account in the *NŚ* seems to be different. *Prācyā* is included in the *bhāṣā-s*, which are counted as seven. See *NŚ* Vol. II, page 376. See also the *BPra.*, page 311.

[3] *RAS*-1 and MS. 4 read: *yoginīnām prayujyate*; *RAS*-2 and MSS. 5, 6, 7, 8, 11 and 13 read: *anīcānāṃ prayujyate*. In MSS. 9 & 12 the portion is missing; MS. 10 reads: *kiṃ vā nātra prayujyate*.

[4] See also *Abhinavabhāratī* on XVII. 2 (II. p. 366).

षड्विधा सा [1]प्राकृतं च शौरसेनी च मागधी ।
पैशाची चूलिका पैशाच्यपभ्रंश इति क्रमात् ।। ३०६ ।।

(प्राकृतम्)

अत्र तु [2]प्राकृतं स्त्रीणां सर्वासां नियतं भवेत् ।
क्वचिच्च देवी गणिका मन्त्रिजा [3]चेति योषिताम्
।। ३०७ ।।
योगिन्यप्सरसोः शिल्पकारिण्या अपि संस्कृतम् ।
ये नीचाः कर्मणा जात्या तेषां प्राकृतमुच्यते ।।३०८।।
[4]छद्मलिङ्गवतां तद्वज्जैनानामिति केचन ।

(शौरसेनी)

अधमे मध्यमे चापि शौरसेनी प्रयुज्यते ।। ३०९ ।।

(मागधी)

धीवराद्यतिनीचेषु मागधी च नियुज्यते ।

1 See *NŚ* XVII. 49, Vol. II, page 376, which says: *sapta bhāṣāḥ prakīrtitāḥ*, etc. Abhinava commenting on this says: *bhāṣā saṃskṛtāpabhraṃśaḥ; bhāṣāpabhraṃśas tu vibhāṣā.*

2 The *Bhāvaprakāśa* says: *strīṇāṃ tu prākṛtaṃ prāyaḥ* (page 270).

3 *RAS*-1 reads: *mantrijādhītiyoṣitām* (*adhītiyoṣitām* may mean learned ladies). *RAS*-2 and MSS. 5, 6 & 13 read: *mantrijāditiyoṣitām*; MSS. 7 & 8 read: *mantrajñātithiyoṣitām*; MSS. 4, 9 and 10 read: *mantrijārājayoṣitām*; MS. 11 reads: *mantrī cātithiyoṣitām*; MS. 12 reads: *kvacic ca ceṭī gaṇikā mantrijā ceti yoṣitām*. I think the reading may be: *kvacic ca devī gaṇikā mantrijā ceti yoṣitām*. The *Bhāvaprakāśa* has: *pāṭhyaṃ tu saṃskṛtaṃ strīṇām anīcānāṃ kṛtātmanām, liṅginīnāṃ mahādevyā mantrijāveśyayoḥ kvacit* (page 270). The *NŚ* has this: *rājñyāś ca gaṇikāyāś ca śilpakāryās tathaiva ca, kāryāvasthāntarakṛtaṃ yojyaṃ pāṭhyaṃ tu saṃskṛtam* (Vol. II. p. 374).

4 The *BPra.* has this: *chadmaliṅgapraviṣṭānāṃ nirgranthānāṃ jaṭāvatām, śākyacakracarāṇāṃ ca saṃskṛtaṃ na prayojayet* (p. 270).

(पैशाचीचूलिकापैशाच्यौ)

रक्षःपिशाचनीचेषु [1]पैशाचीद्वितयं भवेत् ॥ ३१० ॥

(अपभ्रंशः)

अपभ्रंशस्तु चण्डालयवनादिषु युज्यते ।
नाटकादावपभ्रंशविन्यासस्यासहिष्णवः ॥ ३११ ॥
अन्ये चण्डालकादीनां मागध्यादीन् प्रयुञ्जते ।
सर्वेषां [2]कारणवशात् कार्यो भाषाव्यतिक्रमः
॥ ३१२ ॥
माहात्म्यस्य परिभ्रंशं मदस्यातिशयं[3] तथा ।
प्रच्छादनं च विभ्रान्तिं यथालिखितवाचनम् ॥३१३॥
कदाचिदनुवादं च कारणानि प्रचक्षते ।

अथ निर्देशपरिभाषा–

साक्षादनामग्राह्याणां जनानां प्रतिसंज्ञया ॥ ३१४ ॥
आह्वानभङ्गी नाट्यज्ञैर्निर्देश इति गीयते ।
स त्रिधा पूज्यसदृशकनिष्ठविषयत्वतः ॥ ३१५ ॥
पूज्यास्तु देवा मुनयो लिङ्गिनस्तत्समास्त्रियः ।
बहुश्रुताश्च भगवच्छब्दवाच्या भवन्ति हि ॥ ३१६ ॥
आर्येति ब्राह्मणो वाच्यो [4]वृद्धस्तातेति भाष्यते ।

[1] This means *paiśācī* and *cūlikāpaiśācī*.

[2] The *Bhāvaprakāśa* says: *kāryataś cottamādīnāṃ kāryo bhāṣāvyatikramaḥ* (p. 270).

[3] MSS. 9 & 10 read: *śāpaṃ śokaprakāśanam*; others read: *madasyātiśayaṃ tathā*.

[4] *upādhyāyeti cācāryaṃ vṛddhaṃ tāteti caiva hi*, says the *Nāṭyaśāstra* (Vol. II, p. 379).

उपाध्यायेति चाचार्यो गणिका त्वज्जुकाख्यया
॥ ३१७ ॥

महाराजेति भूपालो विद्वान् भाव इतीर्यते ।
छन्दतो नामभिर्वाच्या ब्राह्मणैस्तु नराधिपाः ॥३१८॥
देवेति नृपति[1]र्वाच्यो भृत्यैः प्रकृतिभिस्तथा ।
सार्वभौमः परिजनैर्भट्टभट्टारकेति च ॥ ३१९ ॥
वाच्यो राजेति मुनिभिरपत्यप्रत्ययेन[2] वा ।
विदूषकेण तु प्रायः सखे राजन्नितीच्छया ॥ ३२० ॥
ब्राह्मणैः सचिवो वाच्यो ह्यमात्य सचिवेति च ।
शेषैरार्येत्यथायुष्मन्निति[3] सारथिना रथी ॥ ३२१ ॥
तपस्विसाधुशब्दाभ्यां प्रशान्तः परिभाष्यते ।
स्वामीति [4]युवराजस्तु कुमारो भर्तृदारकः
॥ ३२२ ॥

आवुत्तेति स्वसुर्भर्ता स्यालेति पृतनापतिः ।
भट्टिनी स्वामिनी देवी तथा भट्टारिकेति च ॥ ३२३ ॥
परिचारजनैर्वाच्या योषितो राजवल्लभाः ।
राज्ञा तु महिषी वाच्या देवीत्यन्याः प्रिया इति
॥ ३२४ ॥

[1] This is the same line in the *NŚ* (II, p. 381, XVII. 80).

[2] The *NŚ* says: *rājann ityṛṣibhir vācyo hy apatyapratyayena vā. apatyapratyayena* is illustrated by Abhinava with *kauravetyādinā* (ibid., p. 381).

[3] See *NŚ*, ibid., p. 380. *kārikā-s* 320 (ed) to 346 are missing in MS. 4.

[4] See *NŚ* Vol II, page 380, verse 76, which reads: *yuvarājas tu kumāro bhartṛdārakaḥ.*

सर्वेण [1]पत्नी त्वार्येति पितुर्नाम्ना सुतस्य वा ।
तातपादा इति पिता माताम्बेति सुतेन तु ।। ३२५ ।।
ज्येष्ठास्त्वार्या इति भ्रात्रा तथा स्युर्मातुलादयः ।

अथ सदृशनिर्देशः—

सदृशः सदृशा वाच्यो वयस्येत्याह्वयेन वा ।। ३२६ ।।
हलेति सख्या तु सखी कथनीया सखीति वा ।

अथ कनिष्ठनिर्देशः—

सुतशिष्यकनीयांसो वाच्या गुरुजनेन हि ।। ३२७ ।।
[2]वत्सपुत्रकदीर्घायुस्तातजातेतिसंज्ञया ।
अन्यः कनीयानार्येण जनेन परिभाष्यते ।। ३२८ ।।
[3]शिल्पाधिकारनामभ्यां भद्र भद्रमुखेति वा ।
वाच्ये नीचातिनीचे तु हण्डे हञ्जे इति क्रमात् ।।३२९।।
भर्त्रा [4]वाच्याः स्वस्वनाम्ना भृत्याः शिल्पोचितेन वा ।
एवमादिप्रकारेण योज्या निर्देशयोजना ।। ३३० ।।
लोकशास्त्राविरोधेन विज्ञेया काव्यकोविदैः ।

अथ नामपरिभाषा—

अनुक्तनाम्नः प्रख्याते कञ्चुकिप्रभृतेरपि ।। ३३१ ।।

[1] The *NŚ* says: *patnī cāryeti saṃbhāṣyā pitṛnāmnā sutasya vā* (ibid., p. 383). Abhinava illustrates with *māṭharaputrī*, and *somaśarmajananī* respectively. Only *RAS*-1 reads: *suto'sya vā* !

[2] The *NŚ* has this: *vatsa putraka tāteti nāmnā gotreṇa vā punaḥ, vācyaḥ śiṣyaḥ suto vāpi pitrā vā guruṇāpi vā* (ibid., p. 381).

[3] See *NŚ* Vol. II, pp 380-381 (*somya bhadramukha*, etc.).

[4] See *niyogādhikṛtāḥ*, etc. in *NŚ*, (ibid., p. 380).

इतिवृत्ते कल्पिते तु नायकादेरपि स्फुटम् ।
रसवस्तूपयोगीनि कविर्नामानि कल्पयेत् ।। ३३२ ।।
विनयंधरबाभ्रव्यजयंधरजयादिकम् ।
कार्यं कञ्चुकिनां नाम प्रायो विश्वाससूचकम् ।। ३३३
लतालंकारपुष्पादिवस्तूनां ललितात्मनाम् ।
नामभिर्गुणसिद्धैर्वा चेटीनां नाम कल्पयेत् ।। ३३४ ।।
करभः कलहंसश्चेत्यादि नामानुजीविनाम् ।
कर्पूरचण्डकाम्पिल्येत्यादिकं[1] नाम वन्दिनाम्
।। ३३५ ।।
सुबुद्धिवसुभूत्यादि मन्त्रिणां नाम कल्पयेत् ।
देवरातः सोमरात इति नाम पुरोधसः ।। ३३६ ।।
श्रीवत्सो गौतमः कौत्सो[2] गार्ग्यो मौद्गल्य इत्यपि ।
[3]वसन्तकः कापिलेय इत्याख्येयो विदूषकः ।। ३३७ ।।
[4]प्रतापवीरविजयमानविक्रमसाहसैः ।
वसन्तभूषणोत्तंसशेखराङ्कपदोत्तरैः[5] ।। ३३८ ।।
धीरोत्तराणां नेतॄणां नाम कुर्वीत कोविदः ।
चन्द्रापीडः कामपाल इत्याद्यं ललितात्मनाम् ।।३३९।।

[1] Kāmpilya is the name of a *vaitālika* in the *Pratāparudrīya* of Vidyānātha. See p. 103, Bālamano. edn. Karpūracaṇḍa is in the *Bālarāmāyaṇa* (Act VII).

[2] *RAS*-2 and MSS. 5 & 6 read: *kātyo* (for *kautso* of others).

[3] MSS. 9 & 10 read: *māḍhavyabrāhmaṇākhyābhir abhidheyo vidūṣakaḥ*; others read as given in the text.

[4] MSS. 9 & 10 read: *pratāpavīravijayavikramāṅkapadottaraiḥ*; others read as given in the text.

[5] *RAS*-1 reads: *śekharopapadottaraiḥ*; others as given.

[1]उग्रवर्मा चण्डसेन इत्याद्युद्धतचेतसाम् ।
दत्तसेनान्तनामानि वैश्यानां कल्पयेत् सुधीः ।।३४०।।
कर्पूरमञ्जरी चन्द्रलेखा [2]रागतरङ्गिका ।
पद्मावतीति प्रायेण नाम्ना वाच्या हि नायिका ।। ३४१
देव्यस्तु धारिणीलक्ष्मीवसुमत्यादिनामभिः ।
[3]भोगवती कान्तिमती कमला कामवल्लरी ।। ३४२ ।।
[4]इरावती हंसपदीत्यादिनाम्ना तु भोगिनी ।
विप्रक्षत्रविशः शर्मवर्मदत्तान्तनामभिः ।। ३४३ ।।
शिखण्डाङ्गदचूडान्तनाम्ना विद्याधराधिपाः ।
कुण्डलानन्दघण्टान्तनाम्ना कापालिका जनाः ।।३४४।।
योगसुन्दरिका वंशप्रभा विकटमुद्रिका ।
शङ्खकेयूरिकेत्यादिनाम्ना कापालिकस्त्रियः ।। ३४५ ।।
आनन्दिनी सिद्धिमती श्रीमती सर्वमङ्गला ।
यशोवती पुत्रवतीत्यादिनाम्ना सुवासिनी[5] ।। ३४६ ।।
इत्यादि सर्वमालोच्य लक्षणं कृतबुद्धिना ।
कविना[6] कल्पितं काव्यमाचन्द्रार्कं प्रकाशते ।। ३४७ ।।

[1] *RAS*-2 and MSS. 5&6 read: *ugrakarmā*; others *ugravarmā*. See also *NŚ* II, p. 383.

[2] *RAS*-2 and MSS. 5&6 read: *lolataraṅgikā*; others read: *rāgataraṅgikā*.

[3] *RAS*-1 and MSS. 5, 6, 11 and 12 read: *bhogāvatī*; others read: *bhogavatī*.

[4] See fn. 4, p. 50.

[5] Amara notes: *cirantī tu suvāsinī*, that is one whose husband is alive.

[6] The *CC* has at the end this: *evaṃ nidarśitaṃ saṃpradāyād ālocya lakṣaṇam, kavinā kalpitaṃ kāvyam ācandrārkaṃ prakāśate.*

[1]लक्ष्यलक्षणनिर्माणविज्ञानकृतबुद्धिभिः ।
परीक्ष्यतामयं[2] ग्रन्थो [3]विमत्सरमनीषया ।। ३४८ ।।
भरतागमपारीणः श्रीमान् सिंहमहीपतिः[4] ।
रसिकः कृतवानेवं रसार्णवसुधाकरम् ।। ३४९ ।।
[5]संरम्भादनपोतसिंहनृपतेर्धाटीसमाटीकने
निःसाणेषु धणं धणं धणमिति ध्वानानुसंधायिषु ।
मोदन्ते हि रणं रणं रणमिति प्रौढास्तदीया भटा
भ्राम्यन्ति यान्ति तृणं तृणं तृणमिति प्रत्यर्थिपृथ्वीभुजः
।। ३५० ।।
मत्वा धात्रा तुलायां लघुरिति धरणीं सिंहभूपालचन्द्रे
सृष्टे तत्रातिगुर्व्यां तदुपनिधितया स्थाप्यमानैः क्रमेण ।
चिन्तारत्नौघकल्पद्रुमततिसुरभीमण्डलैः पूरितान्ता-
प्यूर्ध्वं[6] नीता लघिम्ना तदरिकुलशतैः पूर्यतेऽद्यापि सा द्यौः
।। ३५१ ।।

[1] The verse *lakṣyalakṣaṇa*, etc. is missing in MSS. 7, 8, 9, 10 & 12. *RAS*-1, *RAS*-2 and MSS. 4, 5, 6, 11 & 13 have it. The *CC* also has this.

[2] *RAS*-1 and MS. 4 read: *vivakṣyatām*; *RAS*-2 and MSS. 5, 6, 11 & 13 read: *parīkṣyatām* which is the reading in the *CC* too.

[3] MSS. 11 & 13 read: *nirmatsaramanīṣayā*; others read: *vimatsaramanīṣayā*.

[4] The verse *bharatāgamapārīṇaḥ*, etc. is found only in MSS. 9 and 10.

[5] The verse *saṃrambhād*, etc. is found also in the *Camatkāra-candrikā*.

[6] Only *RAS*-2 and MS. 6 read:. . . . *pūritāntām ūrdhvaṃ nītāṃ vilokya dhruvam uḍunikaraiḥ pūryate'dyāpi sā dyauḥ*. *RAS*-1 and MSS. 4 & 5 read as given in the text.

इति श्रीमदान्ध्रमण्डलाधीश्वरप्रतिगण्डभैरवश्रीमदनपोतनरेन्द्रनन्दन-
भुजबलभीमश्रीसिंहभूपालविरचिते रसार्णवसुधाकरनाम्नि
नाट्यालंकारशास्त्रे **भावकोल्लासो** नाम

तृतीयो विलासः ।

समाप्तश्चायं रसार्णवसुधाकरः ।

श्रीतोयशैलवसतिः[1] स तमालनीलो
जीयाद्धरिर्मुनिचकोरसुशारदेन्दुः ।
लक्ष्मीस्तनस्तबककुङ्कुमकर्दमश्री-
संलिप्तनिर्मलविशालभुजान्तरालः ॥
मलयगिरिनिवासी मारुतो यच्छताङ्ग-
स्तरुणशिशिररश्मिर्यत्सुहृत्पुण्यकीर्तिः ।
चरति चिरमनङ्गः क्वापि कैरप्यदृश्यः
स जयतु रसिकौघैर्वन्दितः पञ्चबाणः ॥
अशेषाणां द्विजनुषामाशीर्वादपरंपरा ।
तरङ्गयतु कल्याणं कवीनां चायुरायतम् ॥

---

[1] The two verses: *śrītoya*, etc. and *malayagiri*, etc. are found only in *RAS*-2 and MSS. 5 & 6. *RAS*-1 and MS. 4 (and others) do not have them. *RAS*-2 and MS. 5 also read a similar verse (invocatory) in the beginning of the 3rd chapter, which is not found in others. See fn. 2, p. 301.

The following are the lines of the new *kārikā-s* of the *Rasārṇavasudhākara*, found in the new manuscripts collated for this edition.

		Chap. & Verse	Page
1.	आलम्बनगता चेष्टा	I. 190	79
2.	तत्तद्देशोचिता वेषाः	I. 298	134
3.	शीतज्वरे तु चेष्टाः स्युः	II. 53	173
4.	धर्मोपयोगिनः	III. 146	394
5.	अर्थोपयोगिनः	III. 147	,,
6.	रसोपयोगिनः	,,	,,
7.	मोक्षोपयोगिनः	III. 148	,,
8.	एके त्वभेदमिच्छन्ति	,,	,,
9.	रङ्गोपजीविनः	III. 155	398
10.	वादका गायकाश्चैव	III. 156	,,
11.	वीणावेणु°	,,	,,
12.	आलापनध्रुवा	III. 157	,,
13.	नानाप्रकाराभिनय°	,,	,,
14.	द्वितीयं तु स्थितेष्वप्येष्वेकस्य	III. 208	418

*INDEX OF HALF-VERSES OF THE KĀRIKĀ-S

* Under this Index lines of Introductory and concluding verses also are included, though stricly speaking they are not *kārikā-s*.

* *Kārikā-s* shown within brackets are found in the new manuscripts collated for this edition.

ध

INDEX OF ILLUSTRATIVE AND OTHER VERSES

* Verses with asterisk are found in the new manuscripts now collated for this edition.

LIST OF BOOKS CONSULTED

Anargharāghava of Murāri: NSP edn. 1937.

Abhijñānaśākuntala, with Rāghavabhaṭṭa's Commentary: NSP edn. 1958.

Amaruśataka (or Amaruka) NSP edn. 1954.

A Monograph on Yeleśwaram excavations, A.P.A. Series, Govt. of Andhra Pradesh, Hyderabad, 1963.

Alaṃkārasarvasva of Ruyyaka: edn. by S. S. Janaki; 1965.

Indian Epigraphical Glossary: by D. C. Sircar, 1966.

Indian Kāvya Literature: by A. K. Warder, Delhi, Vol. I, 1972.

Introduction to Indian Textual Criticism: by S. M. Katre, Poona, 1954.

Uttararāmacarita of Bhavabhūti: Balamanorama Press, 1962.

Ekāvali of Vidyādhara (with Mallinātha's Commentary): Bombay Sanskrit Series, 1903.

Karṇasundarī of Bilhaṇa: NSP edn. 1932.

Karpūramañjarī of Rājaśekhara (with Vāsudeva's Commentary): NSP edn. 1949.

Kādambarīkathāsāra of Abhinanda: NSP edn. 1925.

Kādambarī-ṭīkā by Arjunapaṇḍita (Transcript from Govt. O.MSS.L., Madras).

Kāvyaprakāśa of Mammaṭa: with *Pradīpa* and *Uddyota*: several editions.

Kāvyamīmāṃsā of Rājaśekhara, GOS 1934.

Kāvyalakṣaṇa (or *Kāvyādarśa*) of Daṇḍin: published by Mithila Institute, Darbhanga, Bihar, 1957.

Kāvyānuśāsana of Hemacandra: edn. by R. C. Parikh, and V. M. Kulkarni, Mahāvīr Jain Vidyālaya, Bombay, 1964.

Kāvyālaṃkāra of Bhāmaha: edn. by D. T. Tātācārya, Tiruvadi, 1934.

Kāvyālaṃkāra of Rudraṭa (with the Commentary of Namisādhu): NSP edn. 1928.

Kirātārjunīya of Bhāravi: NSP ed. 1954.

Kumārasaṃbhava with Mallinātha's Commentary: Delhi, 1967.

Kuvalayānanda of Appayadīkṣita: NSP edn. 1955.

Kuvalayāvali (or *Ratnapāñcālikā*) of Siṅgabhūpāla: TSS edn. 1941.

Kṛṣṇakarṇāmṛta of Līlāśuka: VRS & Sons, Madras, 1958.

Gāthāsaptaśatī: NSP edn. Kāvyamālā 21.

(*CC*) *Camatkāracandrikā* of Viśveśvara: edn. by P. Sriramamurty, Andhra University Publication, 1969.

(*CC*) *Camatkāracandrikā* of Viśveśvara: published by Meharchand Lachmandas, Delhi, 1972.

(*DR*; *DRA*; & *LṬ*) *Daśarūpaka* of Dhanaṃjaya, with *Daśarūpāvaloka* of Dhanika, and *Laghuṭīkā* of Bhaṭṭanṛsiṃha: edn. by the present editor; Adyar Library Series Vol. 97; 1968.

Dhanaṃjayavijaya of Kāñcanācārya: NSP edn. 1939.

Dhvanyāloka: edn. by Paṭṭābhirāma Śāstri; CSS, 1940.

Nāgānanda of Harṣa: Balamanorama Press, 1967.

Nāṭaka-lakṣaṇa-ratna-kośa (*NLRK*) of Sāgaranandin: edn. by Myles Dillon; Oxford University Press; 1937.

Nāṭyadarpaṇa of Rāmacandra and Guṇacandra: GOS 1959.

Nāṭyaśāstra of Bharata: all volumes; GOS edn.

Naiṣadha of Śrīharṣa: NSP edn. 1952.

Pratāparudrīya of Vidyānātha: (With *Ratnāpaṇa* of Kumārasvāmin): Balamanorama Press edn., Madras, 1950.

Prabodhacandrodaya of Kṛṣṇamiśra: NSP edn 1935.

Prasannarāghava of Jayadeva: NSP edn 1914.

Priyadarśikā of Harṣa: VRS & Sons, Madras, 1948.

(B. M.) Bahurūpamiśra's *Daśarūpaka-dīpikā*: Transcript of the manuscript from the Oriental Research Institute of the University of Kerala, Trivandrum (in my possession).

(B. M.) Bahurūpamiśra's *Daśarūpaka-dīpikā*: Transcript of the manuscript from the Govt. Oriental MSS. Library, Madras (in my possession).

Bālarāmāyaṇa of Rājaśekhara: edn. by Pandit Govindadeva śāstri; Benares, 1869.

Bhagavadgītā: NSP edn. 1936.

Bhāvaprakāśana (or *Bhāvaprakāśa* or *Bhāvaprakāśikā*) of Śāradātanaya: GOS edn., Baroda (Reprint) 1968.

Bhojacaritra of Ballāla (also known as *Bhojaprabandha*): VRS & Sons, Madras, 1959.

Bhoja's Śṛṅgāraprakāśa: by V. Raghavan, Madras, 1963.

Mahābhārata: Critical edn. Poona.

Mahāvīracarita of Bhavabhūti: NSP edn. 1926.

Mālatīmādhava of Bhavabhūti: (with Pūrṇasarasvati's Commentary), TSS edn. 1953.

Mālavikāgnimitra: NSP edn. 1950.

Mudrārākṣasa: Poona Oriental Book Agency, 1930.

Mṛcchakaṭika: NSP edn. 1950.

Meghasaṃdeśa: (with *Vidyullatā*): Vani Vilasa Press, Srirangam, 1926.

Raghuvaṃśa: NSP edn. (with Mallinātha's Commentary): 1948.

Ratnapāñcālikā (See *Kuvalayāvali*).

Ratnāvali of Harṣa: VRS & Sons, Madras, 1936.

(*RK*) *Rasa-kalikā* of Rudrabhaṭṭa: Transcript of the manuscript from Govt. Oriental MSS. Library, Madras (in my possession). (R. 3274).

(*RK*) *Rasa-kalikā* of Rudrabhaṭṭa: Transcript of the manuscript from the Oriental Institute of Mysore University, Mysore (in my possession) (S.B. 1050).

Rasagaṅgādhara of Jagannātha: NSP edn. 1894.

Rāmacarita of Abhinanda: GOS edn. Baroda, 1930.

Vālmīkirāmāyaṇa: Critical edition (available parts), Baroda.

Vikramorvaśīya: (with Raṅganātha's Commentary): Bombay Sanskrit Series, Bombay, 1901.

Viddhasālabhañjikā: edn. Calcutta.

(*VVC*) *Velugoṭivāri-vaṃśa-caritra*: published by the Venkatagiri Samsthanam (1910).

(*VVĀ*) *Velugoṭivāri-vaṃśāvali*: edn. by Dr. N. Venkata Ramanaiah: Madras University, Madras, 1939.

Veṇīsaṃhāra of Bhaṭṭanārāyaṇa: NSP edn. 1940.

Vaijayantīkośa: VRS & Sons, Madras, 1958.

Śārṅgadhara-Paddhati of Śārṅgadhara: edn. by Peterson, Bombay, 1888.

Śiśupālavadha of Māgha: NSP edn. 1957.

Śṛṅgāratilaka of Rudrabhaṭṭa: edn. by Pischel, 1886.

Śṛṅgāraprakāśa of Bhoja: (Text) Mysore edn, volume I 1955; volume II 1963; volume III 1969.

Śṛṅgāraśrīnāthamu: by V. Prabhakara Sastri; Bezwada, 1923.

Saṃgītaratnākara of Śārṅgadeva: Adyar Library publication.

(*SKĀ*) *Sarasvatīkaṇṭhābharaṇa* of Bhoja: NSP edn. 1925.

Sāhityaratnākara of Dharmasūri (or Dharmasudhī), Madras, 1871.

Subhāṣitaratnakośa of Vidyākara: Harvard Oriental Series 1957.

Subhāṣitatriśatī of Bhartṛhari: NSP edn. 1957.


Subhāṣitāvali of Vallabhadeva: Bombay Sanskrit and Prakrit Series, Poona, 1961.

Sūktimuktāvali of Jalhaṇa: GOS 82; 1938.

Hanumannāṭaka: Gujarati Printing Press, Bombay, 1912?

History of Reddi Kingdoms: by M. S. Sarma (Andhra University Series 38), 1948.

History of Sanskrit Poetics: P. V. Kane; Motilal Banarsidass, Delhi, 1961.



ADDITIONS AND CORRECTIONS

Page	Line	Read
cxxvii	item 7	p. 219 (for 184)
1	(fn.) 10	See note 4 on p. 19
6	(fn.) 9	See note 1 on p. 239
8	(fn.) 5	*arigāyagovāle*
8	(fn.) 6	See note 1 on p. 210
10	(fn.) 18	I have followed their system
10	(fn.) 20	and also Sanskritized
12	(fn.) 11	thus get separated
16	(fn.) last	(See notes) on p. 310 & on p. 451
17	(fn.) 7	See also note 5 on p. 6
19	(fn.) 11	See note 1 on p. 1
21	(fn.) 9	note 4 on p. 19
63	13	p. 95 (instead of 15)
65	18	*vapur vartate*
86	after l. 9	(*Viṣṇupurāṇa* 5.13.27)
100	9	(2.45)
122	(fn.) last	5&6 read *manmanrpam*
131	(fn.) 20	(correctly)
140	5	*anvabhūvan*
140	9	*sukhena*
140	19	*harṣa*
148	14	add footnote no. 4
148	(fn.) 9	add fn. number 4 before MS. 4 notes
158	last	*kimapi kimapi*
171	8	(Second half of the verse) *nidrārthaṃ jananīkatham iti harer huṃkārataḥ śṛṇvataḥ*
171	9	*vyagra* (instead of *prokta*

Page	Line	Read
171	(fn.) 4	*paddhati: kṛṣṇeneti purātanīṃ nijakathām ākarṇya mātreritām*
177		Second & third halves constitute an *āryā* verse. (awkward numbering regretted)
177	4	*prathamādi-*
184	(fn.) 7	Delete: " (2) *duṣṭa kāliya*, etc. (on p. 86), "
184	(fn.) 7	(2) (instead of (3). .)
215	5	*dhairya-*
264	15	*viṇṇāo*
276	(fn.) 13	*vādina*
286	8	*amarṣa-*
289	8	*tulyatve*
342	(fn.) 11	(Read before: Abhinava) See Vol. I, p. 211; verse 15; & Vol. III, p. 92.
343	(fn.) 11	See fn. 1 on p. 393
376	(fn.) 4	*ubbeaṇīe*
411	8	*iva cchāndasāḥ*
414	(fn.) 2	*dattāśaṅko'ṅganānām*
420	7	*nāṭake*
429	(fn.) 2	See fn. 1, p. 428
429	(fn.) last	*skandau*
430	(fn.) 2	Add: See p. 404, fn. 3. In *Vīthī* it is *avalagita*. In *Prahasana* the expression is *avagalita*.